End. किं बहुना यत्र मम यस्मिन् पक्षे योगेश्वरः कृष्णः स्थितः यत्र पार्थः धनुर्द्धरः उद्यद्गाण्डीवस्तत्र तस्मिन् पक्षे श्रीर्देवता विजयार्थं विजयः शत्रूणां धर्षणं भूतिर्नीतिर्नयः प्रज्ञा जयसाधिका इति । इत्थं मतिर्निश्चयः । इतिकरणं गीता-शास्त्रपरिसमाप्त्यर्थं ॥ इति पैशाचभाष्ये अष्टादशोऽध्यायः ॥

विषयः । श्रीमद्भगवद्गीताया व्याख्येयं ।

No 673. राधातापनी ।

Substance, country yellow paper. Folia, 2. Lines, 7—21 on a page. Extent, 47 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Rádhá Tápani. An apocryphal Upanishad on the divinity of Rádhá, a mistress of Krishṇa. Though running over very much the same subject, the work is distinct from No. CXIV.

Beginning. ॐ आसीन्नियमानन्दं स ब्रह्म यद्दृष्टमसूक्ष्ममव्यक्तमव्यवहार्य्यमग्राह्यमवाच्य-मध्ययमवज्ञेयमतर्क्यमबोध्यमचिन्त्यमसङ्ख्यमेकं न तमो न गन्धवती नोष्णं न शून्यं

न वायुर्न नाग्निर्नापो न पृथ्वी न तत्त्वं, तत् केवलं सिद्धं शुद्धं बुद्धं स ईशः स कालः स सुखद् आदिर्गुरुरनादिनिधनः शिवः पिता स्वयम्भूः स होदयः कृष्णधाम त्रिगुणात् परः। इत्यत्र श्लोका भवन्ति,

ज्ञाने सरस्वतीनिष्ठ सकामे रुक्मिणीप्रियं।

लीलारूपं राधिकायाः सिद्धं सन्न्यासमुत्तमं॥

End. वशिष्ठश्च बृहस्पत्यं चार्व्वाकमध्यापयन्ति यजमानस्य वार्हस्पत्यं, ॐ नमः ॐ नमो मूलधात्रे।

Colophon. इत्याद्यष्टोत्तरभागे रहस्यवर्णने राधोत्तरतापनीयोपनिषत् समाप्ता।

विषयः। श्रीराधिकायास्तत्त्वरहस्यवर्णनं।

No. 674. गीताभूषणभाष्यं।

Substance, country yellow paper. Folia, 101. Lines, 11—12 on a page, Extent, 5188 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Gítábhushaṇa Bháshya. A commentary on the Bhagavadgítá. By Baladeva Vidyábhushaṇa.

Beginning. सत्यानन्ताचिन्त्यशक्त्येकपक्षे सर्वाध्यक्षे भक्तरक्षातिदक्षे।

श्रीगोविन्दे विश्वसर्गादिकन्दे पूर्णानन्दे नित्यमास्तां मतिर्नः॥

अज्ञाननीरधिरुपैति यया विशेषं भक्तिः परा विभजते परिपोषमुच्चैः।

तत्त्वं परं स्फुरति दुर्गमसद्यजस्रं षाड्गुण्यभृत्सरुचितां (?) प्रणमामि गीतां॥

अथ सुखचिद्घनः स्वयं भगवान् अचिन्त्यशक्तिः पुरुषोत्तमः स्वसङ्कल्पायत्त विचित्रजगदुदयादिर्विरिञ्चिचिन्त्यचरणः स्वजन्मादिलीलया स्वतुल्यान् सहाविर्भूतान् पारिषदान् प्रहर्षयन् तथैव जीवान् बहून् अविद्येत्यादि।

End. श्रीमद्गीताभूषणनामभाष्यं यत्नात् विद्याभूषणेनोपचीर्णं। श्रीगोविन्दप्रेममाधुर्य्यलुब्धाः कारुण्यार्द्राः साधवः शोधयध्वं।

Colophon. इति श्रीभगवद्गीतोपनिषद्भाष्ये अष्टादशोऽध्यायः॥

विषयः। श्रीमद्भगवद्गीताया व्याख्येयं।

No. 675. निरालम्बोपनिषत् ।

Substance, country yellow paper. Folia, 4. Lines, 16 on a page, Extent, 64 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Nirálamba Upanishad. An elementary treatise on the Vedánta doctrine, comprising thirty questions, such as: Who is Brahma? who the Creator? who I's'vara? what is duty? &c., &c., propounded by Bharadvája, and their appropriate answers by Brahmá.

Beginning. भरद्वाज उवाच । १ प्रश्नः । किं ब्रह्मेति । ब्रह्मोवाच । उत्तरं । अचिन्त्योपाधिविनिर्म्मुक्तमनाद्यन्तं शुद्धं शान्तं निर्गुणं निरवयवं नित्यानन्दमखण्डैकरसमद्वितीयं चैतन्यं ब्रह्म ॥ २ प्रश्नः । किं सकलं ब्रह्म । २ उत्तरं । अव्यक्तात्ममहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशात्मकं । तेन दृहद्रूपेणाण्डकोषेण कर्म्मज्ञानार्थरूपतया भासमानं सकलशक्त्युपबृंहितं सकलं ब्रह्म । ३० प्रश्नः । को ब्राह्मणः । ३० उत्तरं । ब्रह्मवित् स एव ब्राह्मणः ।

End. इति निरालम्बोपनिषत् समाप्ता ॥

विषयः । १, किं ब्रह्म । २, किं सकलं ब्रह्म । ३, क ईश्वरः । ४, को जीवः । ५, का प्रकृतिः । ६, कः परमात्मा । ७, के ब्रह्माद्याः । ८, का जातिः । ९, किमकर्म्म । १०, किं कर्म्म । ११, किं तपः । १२, किमासुरं । १३, किं ज्ञानं । १४, किमज्ञानं । १५, कः संसारः । १६, को बन्धः । १७, को मोक्षः । १८, किं सुखं । १९, किं दुःखं । २०, कः स्वर्गः । २१, को नरकः । २२, किं परमपदं । २३, क उपास्यः । २४, को विद्वान् । २५, को मूढः । २६, कः सन्न्यासी । २७, किं ग्राह्यं । २८, किमग्राह्यं । २९, कः समाधिः । ३०, को ब्राह्मणः । भरद्वाजप्रश्नानामतत्त्रिंशत्प्रश्नानामुत्तरवर्णनं ।

No. 676. पञ्चीकरणमहावाक्यार्थबोधप्रकारः ।

Substance, country yellow paper. Folia, 16. Lines, 12—14 on a page. Extent, 353 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Prose. Incorrect.

Panchikarana-mahávákyártha-bodha-prakára. A Vedánta treatise founded on the *Panchikaranaprakriyá* of S'ankara Áchárya. From its abrupt commencement I suspect the MS. is imperfect, and does not contain the beginning of the work.

Beginning. अथ शिष्येण सप्त प्रश्नाः कृताः। ते कथं, ततः प्रोवाच। शिष्यस्तु ब्रह्मशब्देन
शब्दितो जीवशब्देन च, तया क उक्तः स्यात्, तदुच्यतां।
माया वा कस्य शक्तिः स्यात् तत्स्वरूपञ्च कीदृशं।
अविद्यायाः कथं रीतिः किमात्मासौ तथा भवेत्॥

End. महावाक्यप्रबन्धो हि सारात् सारतरं महत्।
श्रवणान्मुच्यते जन्तुर्मृत्युसंसारसागरात्॥

Colophon. इति वेदान्तसारासारपञ्चीकरणमहावाक्यबोधः समाप्तः।

विषयः। गुरुशिष्ययोः कथोपकथनच्छलेनाध्यात्मविद्योपदेशः।

No. 677. स्वानुभवादर्शः, सटीकः।

Substance, country yellow paper. Folia, 72. Lines, 10 on a page. Extent, 2193 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Verse and prose. Generally correct.

Svánubhavádars'a. Dissertation on the dualistic or Vaishṇava form of the Vedánta; the text in verse with a commentary in prose. Both anonymous.

Beginning. (मू॰प्रा॰) यस्मात् परं किमपि नास्ति नमोऽस्तु तस्मै
सच्चित्सुखाय विभवे पुरुषोत्तमाय।
नो यत्र वागपि मनो न विरोधनाय
कृष्णाय पूर्णमहमे यदुनन्दनाय॥
अतिदूरतरं निजं स्वयं गुरुशास्त्राण्यविचार्य्यते यदि।
निकटं गुरुशास्त्रबोधनात् प्रकटं स्यात् वत नैरवयं (?) हि तत्॥
(टी॰प्रा॰) चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिप्रचयगमनशिष्टाचार-
परिपालनकालं विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं स्वेष्टदेवतान-
मस्कारात्मकं मङ्गलमाचरन् प्रकरणप्रतिपाद्यमर्थं सङ्क्षेपेण दर्शयति यस्मा-
दित्यादि।

1874. 73

No. V.

NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA,

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, and of the Royal Academy of Science, Hungary; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME II.—PART II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS.

1872.

End. पूर्वाचार्य्यादिष्टलेशोऽयमुक्तो बुद्धिस्थोऽत्र स्वस्य न प्रौढिवादः ।
विद्वांसो येऽनुयाद्यार्थं समर्थाः तेभ्यो भक्त्या मे प्रणामोऽयमस्तु ॥ २१५ ॥
इति श्रीमन्नारायणाश्रमशिष्यमाधवाश्रमविरचितं स्वानुभवादर्शाख्यं प्रकरणं समाप्तं ॥
इदानीं ग्रन्थकर्त्तृत्वाभिमानपरिहारपूर्व्वं सम्प्रदायकर्त्ताचार्य्यनमस्काररूपं मङ्गलमाचरति पूर्वाचार्य्येति । स्पष्टार्थः ।

Colophon. इति (परिसमाप्तिसूचकवाक्यं नास्ति) ।

विषयः । आत्मतत्त्वानुभवकथनं ।

No. 678. अज्ञानबोधिनी ।

Substance, country yellow paper. Folia, 20. Lines, 12 on a page. Extent, 375 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Prose. Generally correct.

Ajnána-bodhiní, alias *Adhyátma-vidyopades'a-vidhi*, alias *Sañkshipta-vedánta-s'ástra-prakriyá*. A commentary on the *A'tmabodha*, a metrical summary of the Vedánta doctrine. By Sañkara Áchárya. Hall's *Contributions*, 105.

Beginning. चित्सदानन्दरूपाय सर्वधीवृत्तिसाक्षिणे ।
नमो वेदान्तवेद्याय ब्रह्मणेऽनन्तरूपिणे ॥
यदज्ञानादिदं भाति यज्ज्ञानाद् विनिवर्त्तते ।
नमस्तस्मै चिदानन्दवपुषे परमात्मने ॥
अथाध्यात्मविद्योपदेशविधिं व्याख्यास्यामः । मुमुक्षवे, श्रद्दधानाय ।

End. क्रियाद्वैतं न कर्त्तव्यं भावाद्वैतं सदा कुरु ।
अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह ॥

Colophon. इति सङ्क्षिप्तवेदान्तशास्त्रप्रक्रिया । इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्करकृतौ वहिर्मुखान्तःप्रकरणमज्ञानबोधिनी समाप्ता ।

विषयः । वेदान्ततात्पर्य्यस्वरूपात्मबोधार्थविवरणं ।

No. 679. विन्दुसन्दीपनं ।

Substance, country yellow paper. Folia, 40. Lines, 13—15 on a page. Extent, 2233 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Vindusandípana. A commentary on the *Siddhánta-vindu* of Madhusúdana Sarasvatí. By Purusottama Sarasvatí, pupil of Madhusúdana Sarasvatí and S'rídhara Sarasvatí. The *Siddhánta-vindu*, otherwise called *Siddhánta-tattva-vindu*, is itself a commentary on the *Das'as'loki*, a metrical abstract of the Vedánta in ten stanzas, by S'aṅkara Áchárya. Hall's *Contributions*, 108.

Beginning. यद्बोधादिदं भाति शुक्तिकारजतं यथा ।
यद्बोधादस्तमायाति न चोदेति तदस्म्यहं ॥
श्रीरामं मुद्रानम्य वक्ति श्रीपुरुषोत्तमः ।
सिद्धान्तविन्दौ तत्त्वार्थसाधकं किमपि स्फुटम् ॥

End. सद्ग्राह्याननिरस्तदोषसचिरादुत्तुङ्गमानं बुधै-
र्यत्सिद्धान्तदुरन्तसिन्धुमकरोदाहृत्य विन्दूपमं ।
सम्यग्लब्धसुदर्शनाय विलसद्वाणीप्रणीतश्रिये
निर्व्याजं मधुसूदनाय गुरवे तस्मै परस्मै नमः ॥
अलमन्यास्वधिभ्रान्तिगर्तेष्वतां विबुधैरिह ।
विन्दुसन्दीपनाभ्यासे युक्तिमौक्तिकपङ्क्तयः ॥

Colophon. इति श्रीमधुसूदनसरस्वतीश्रीधरसरस्वतीपूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य्यश्रीपुरुषोत्तमसरस्वतीविरचितो विन्दुसन्दीपनाख्यो ग्रन्थः समाप्तः ।

विषयः । श्रीमधुसूदनसरस्वतीकृतसिद्धान्तविन्दुव्याख्यानं ।

No. 680. भावार्थदीपिका ।

Substance, country yellow paper. Folia, 84. Lines, 12—13 on a page, Extent, s'lokas. Character, Bengali. Date S. 1909. Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Bhávártha-dípiká. A commentary on the *Bhagavad-gitá.* By Mukunda Dása.

Beginning. श्रीमुकुन्दं नमस्कृत्य तद्दासेन विनिर्म्मिता ।
गीतायाः शास्त्रसारायाः भावार्थस्य प्रदीपिका ॥
वितनुतां सतां मोदं साधकानां विमुक्तिदा ।
यस्य देवस्य दासोऽहं स एव शरणं मम ॥
युद्धार्थं कुरुक्षेत्रं गतानां कौरवपाण्डवानां वृत्तं व्यासप्रसादेन लब्धदिव्यदृष्टिं
स्वसूतं सञ्जयं प्रति धृतराष्ट्रः पृष्टवानिति जनमेजयं प्रति वैशम्पायनो दर्शयति,
धृतराष्ट्र उवाचेति ।

End. शरणागतदीनार्त्तपरित्राणपरायणः ।
यः प्रसिद्धः स एवास्तु मम त्राणपरायणः ॥

Colophon. इति श्रीमुकुन्दविरचितायां भगवद्गीतायां भावार्थदीपिकायामष्टादशोऽध्यायः ।

विषयः । श्रीमद्भगवद्गीताया व्याख्येयं ।

No. 681. भागवतप्रकाशः ।

Substance, English paper. Folia, 14. Lines, 10 on a page. Extent, 296 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Poetry. Incorrect.

Bhágavataprakás'a. An exposition of the doctrine of faith as an element of devotion, as elaborated in the Bhágavata Puráṇa. By Priyádása.

Beginning. वन्दे सुवृन्दारकवृन्दवन्द्यं वृन्दाटवीकुञ्जविराजमानं ।
वेदैश्च सर्व्वैरनुगीयमानं श्रीराधिकावल्लभमिष्टदेवं ॥
हृदब्जं स्वीयानां विकसति समन्ताद्यदुदयान्निशा-
तुल्या माया कुहकवदना याति शमनं ।
कुमार्गस्यालोको भवति तममुं व्यासतनयं
नमामो भास्वन्तं सकलहितरूपं गुरुवरं ॥
नत्वा मुहुर्भागवताङ्घ्रिरेणून्पुंसः समस्तार्थसुसिद्धिहेतून् ।
कुतर्कमायावरणं निवार्य्य करोम्यहं भागवतप्रकाशं ॥

L of C.

अथ खलु भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसीत्यादिश्रुतिवाक्येभ्यो भक्त्या मामभिजानातीत्यादि ।

End. अयं सदा भागवतप्रकाशः प्रकाशतां श्रीहरिभक्तिमार्गं ।
धुनोतु धान्यां (?) हृदयान्धकारं तनोतु साधुषु सुखं सदैव ॥

Colophon. इति श्रीमद्भागवतरसरसिकहृदयहृदानन्दकन्दश्री+सदपदारविन्दामन्दमकरन्दमधुव्रतानुव्रतप्रियादासकृतः श्रीभागवतप्रकाशः सम्पूर्णः ।

विषयः । श्रीमद्भागवतगूढार्थविवरणं ।

No. 682. मण्डलब्राह्मणोपनिषत् ।

Substance, country yellow paper. Folia, 4. Lines, 16 on a page. Extent, 76 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Correct.

Mandala-bráhmana Upanishad. An Upanishad on the adoration of the spirit of the sun as the supreme deity, the mode of meditating on it, and the fruit thereof.

Beginning. ॐ यदेतन् मण्डलं तपति तन् महत् उक्थं ता ऋचः स ऋचां लोकोऽथ यदेतदर्चिर्दीप्यते तन् महाव्रतं तानि समानानि स साम्नां लोकोऽथ य एष एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूंषि यजुषां लोकः ।

End. स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेक्षपुरुषः (?) स एष एवंविदात्मा भवति स यदैवं विदत् स्माल्लोकात् प्रैत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवति मृत्युर्ह्यस्यात्मा (?) भवति ॥

Colophon. इति मण्डलब्राह्मणोपनिषत् समाप्ता ।

विषयः । सूर्य्यमण्डलमुपलक्षीकृत्याध्यात्मविद्याकथनं, तद्ध्यानं, फलश्रुतिश्च ।

No. 683. सन्न्यासपद्धतिः, सन्न्यासविधिः, वा विरजापद्धतिः ।

Substance, country yellow paper. Folia, 6. Lines 11—17 on a page. Extent, 121 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Prose. Generally correct.

Sannyása-vidhi, alias *Sannyása-paddhati*, alias *Viraja-paddhati*. A manual for the performance of the ceremonies necessary for assuming the condition of a Sannyásí. The work is attributed to S'aunaka, but it is apparently a compilation.

Beginning. अथ स्नानादिकं कृत्वा निमन्त्रितान् ब्राह्मणान् आहूय पादौ प्रक्षाल्याचम्य प्राङ्मुख उपविश्य विष्णुस्मरणपूर्वकं प्राणायामतिथिप्रवणञ्च (?) कृत्वा मत्सन्न्यासाङ्गभूतनान्दीमुखश्राद्धमहं करिष्ये इति सङ्कल्प्य वेतालाद्येत्यादिभिरृक्षतैर्भूमिशोधनं कृत्वा ।

End. गुरोर्व्वाक्यं कार्य्यं गुरुसमीपे स्थातव्यं । न गुरोरवधीरणं कार्य्यं ॥

Colophon. इति शौनकप्रोक्तः सन्न्यासविधिः समाप्तः ।

विषयः । सन्न्यासपरिग्रहणविधिकथनं ।

No. 684. प्रकीर्णमन्त्रोपनिषत् ।

Substance, country yellow paper. Folium, 1. Line, 14—15 on a page. Extent, 33 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, New. Verse. Correct.

Prakírṇamantra Upanishad. Minor mystic mantras for the adoration of the Supreme Soul, and the advantages of worshiping therewith.

Beginning. ॐ सर्वेषां खलु भूतानां आत्मा सत्ये प्रतिष्ठितः ।
तेनात्मानमन्तर्द्धाय न किञ्चित् पापमिच्छति ॥
आत्मसत्यात्मसाक्षी यः सतां वन्द्यः प्रतापवान् ।
स पापानि न कुरुते यस्यात्मा भवति प्रियः ॥
जायत्येको म्रियत्येको अश्नात्येकः शुभाशुभं ।
सर्वभूतात्मभूतेभ्यः सम्यग्भूतानि पश्यति ॥

End. इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्ति अग्नीयमं मातरिश्वानमाहुः ॥

Colophon. एते प्रकीर्णमन्त्राः समाप्ताः ।

विषयः । अध्यात्मविषयकमन्त्राः ।

No. 685. दक्षिणकालिकासहस्रनामस्तोत्रं ।

Substance, country yellow paper. Folia, 15. Lines, 6—7 on a page. Extent, 367 s'lokas. Character, Bengali. Date ? Place of deposit, Vanagráma, Ḍháká, Rámachandra Chakravartí. Appearance, old. Prose. Incorrect.

Dakshiṇakáliká-sahasranâma-stotra. A hymn in praise of a form of Durgá named Dakshiṇa-káliká, in which a thousand epithets are strung in verse. The work professes to be a part of the Kálíkula-sarvasva, a Tántric compilation. Almost all the leading divinities of modern Hinduism have hymns of this description sung in their praise. The epithets are usually accepted as so many names of the divinity.

Beginning. कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
यमासाद्य मया प्राप्तमैश्वर्य्यपदमुत्तमम् ॥
संयुक्तः परया भक्त्या यथोक्तनिधिना भवान् ।
कृतमत्यर्थनं देव्यास्त्रैलोक्यविजिगीषया ॥

End. श्रीमत्सद्गुरुभक्तिपूर्वकमहाकालीपराध्यायिनो
मुक्तिर्भुक्तिलयस्तुतिपरा भक्तिः करस्थायिनी ॥

Colophon. इति श्रीकालीकुलसर्वस्वे शिवपरशुराममंवादे श्रीदक्षिणकालिकासहस्रनामस्तोत्रं समाप्तम् ।

विषयः । दक्षिणकाल्याः सहस्रनामकथनं । पूर्वं यदुक्तं, तन्महाकालसंवादयुक्तम् । इदन्तु परशुराममंवादवत् ।

No. 686. हरिनामोपनिषत्, वा कलिसन्तरणोपनिषत् ।

Substance, country yellow paper. Folia, 2. Lines, 6—11 on a page. Extent, 27 s'lokas. Character, Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mís'ra. Appearance, new. Prose. Correct.

Harinâma Upanishad, alias *Kalisantarana Upanishad.* An apocryphal Upanishad affiliated to the Atharva Veda in which the word *Hari*, a name of Vishṇu, is described as the only specific for salvation in the present Kali age. It professes to have been first imparted by Brahmá

to Nárada; but from its language and style, it appears to be a very modern composition, probably not so old as the time of Chaitanya.

Beginning. द्वापरान्ते नारदो ब्रह्माणं प्रतिजगाम कथं नु भवयोगं पर्य्यटन् कलिं सन्तरेय-
मिति। सहोवाच। साधु पृष्टोऽस्मि सर्वश्रुतिरहस्यं गोप्यं तत् शृणु येन कलिं
संसारं तरिष्यसि, भगवदादिविष्णोर्नारायणस्य नामेति। नारदः पुनः पप्रच्छ
किं नामेति। स होवाच। हरे राम हरे राम राम राम हरे हरे। हरे कृष्ण
हरे कृष्ण कृष्ण कृष्ण हरे हरे।

इति षोडशकं नाम्नां कलिकल्मषनाशनं।
नातः परतरोपायः सर्ववेदेषु दृश्यते॥

End. स्वधर्म्मपरित्यागपापात् सद्यः शुचितामाप्नुयात् सद्यो मुच्यते सद्यो मुच्यत।

Colophon. इत्यथर्व्वणोपनिषदि हरिनामोपनिषत् समाप्ता।

विषयः। ब्रह्मनारदकशोपकथनप्रसङ्गेन हरिनाममाहात्म्यं सूचितं।

No. 687. समञ्जसा वृत्तिः।

Substance, country yellow paper. Folia, 109. Lines, 20—21 on a page. Extent, 3052 s'lokas. Character Bengali. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Correct.

Samanjasávritti. Annotations on the original aphorisms of the Vedánta. By Anupanáráyaṇa Tarkas'iromaṇi.

Beginning. ब्रह्मजिज्ञासा। सूत्रार्थसूत्रकृद्भाष्यकृद्गुरुस्मृतिसमञ्जसां।
वृत्तिं श्रीमान् वक्त्यनूपनारायणशिरोमणिः॥
समन्वयाविरोधसाधनफलान्यध्यायार्थाः। तात्पर्य्यनिर्णायकन्यायसूचकत्वात् ब्रह्म-
विचारात्मकशास्त्रस्य स्वार्थनिर्णयापेक्षत्वात् श्रुतीनां समन्वयादिविचारापोद्घात-
कत्वादस्य सूत्रस्य चात्र सङ्गतिः।

End. कायेन मनसा वाचा यत् किञ्चित् सुकृतं कृतं।
कर्त्तव्यं क्रियमाणं वा सर्व्वं कृष्णार्पितं पुरा॥

Colophon. इति श्रीकृष्णद्वैपायनाभिधानमहर्षिवेदव्यासप्रोक्तजयाख्यब्रह्मसूत्रे श्रीमदनूपना-
रायणतर्कशिरोमणिभट्टाचार्य्यविरचितायां समञ्जसायां वृत्तौ चतुर्थाध्याय
चतुर्थपादः। समाप्तश्चायं ग्रन्थः।

विषयः। ब्रह्मसूत्रस्य व्याख्येयं।

No. 683. तत्त्वसङ्ग्रहः ।

Substance, country yellow paper .Folia, 54. Lines, 17—22 on a page. Extent, 1930 s'lokas. Character, Bengali. Date ? Place of deposit, Vasur Bájára, Ḍháká, Dínabandhu Gos'vámí. Appearance, old. Prose. Correct.

Tattvasaṅgraha. A Vaishṇavite exposition of the Vedánta doctrine. By Rádhámohana Gos'vámí Bhaṭṭáchárya, of the family of Advaita, the colleague of Chaitanya. The work is divided into two parts, the first comprising 8 chapters, and the second 6. Contents : First Part, I. Introduction. II. Tattva defined. III. Creation. IV. The influence of Prakrití on creation. V. VI. VII. The nondual theory and its varieties. VIII. Creation according to the Tridaṇḍis. Second Part, I. Introduction. II Pratishṭhá. III. Meaning of the word Bhagavat. IV. The sátvata theory. V. The suddhatattva theory. VI. Reconciliations of the different theories.

Beginning. श्रीमद्द्वैतवंशेन राधामोहनशर्म्मणा ।
प्रणम्य राधिकाकान्तं क्रियते तत्त्वसङ्ग्रहः ॥
अथ तत्त्वनिर्णयः ।
तच्च परापरभेदेन द्विविधं । तत्राद्यमाह, प्रथमे—
"वदन्ति तत् तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" ॥
अद्वयं सजातीयनिष्ठाभावप्रतियोगिज्ञानं स्वप्रकाशरूपं तत्त्वं परमार्थसद्वस्तु ॥

End. अत्राप्युद्देश्यं श्रीकृष्णप्रेममेवादिकं फलं न तु सम्भोगादि । तत्फलस्य न्यूनत्वात् सम्भोगाकाङ्क्षायामैकान्तिकभक्तित्वानुपपत्तेरित्यादिकमालोचनीयम् ।

Colophon. इति कलियुगपावनावतारश्रीमद्द्वैतवंशश्रीराधामोहनगोस्वामिभट्टाचार्य्यकृत-तत्त्वसङ्ग्रहः समाप्तः ।

विषयः । पुस्तकमिदं पूर्वोत्तरभागद्वयेन विभक्तं परिसमाप्तिं गतञ्च । तत्र पूर्वभागे । १, विभागारम्भः । २, तत्त्वनिर्णयः । ३, सृष्टिप्रक्रिया । ४, प्रकृतिः । ५, अद्वैतवादिमतम् । ६, विशिष्टाद्वैतवादिमतम् । ७, त्रिदण्डिनां द्वैताद्वैत-वादिनां मतम् । ८, तन्मते सृष्टिक्रमश्च । उत्तरविभागे—१, उत्तरविभागारम्भः । २, प्रतिष्ठा । ३, भगवत्शब्दार्थः । ४, सात्वतमतं । ५, शुद्धसत्त्वं । ६, मतस-मन्वयश्च ।

No. 689. अद्वैतमकरन्दः, सटीकः ।

Substance, country yellow paper. Folia, 10. Lines, 16—18 on a page. Extent, 518 s'lokas. Character, Nágara. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Verse. Generally correct.

Advaitamakaranda. A Vedánta treatise on the nondual theory, in verse. By Lakshmídhara Kaví. Attached to it is a commentary on the text by Svayamprakás'a Yatí, the disciple of Kaivalyánanda Yogindra.—Hall's *Contributions*, 102.

Beginning. (मू०) कटाक्षकिरणावान्तनमन्मोहाब्धये नमः ।

अनन्तानन्दकृष्णाय जगन्मङ्गलमूर्त्तये ॥ १ ॥

अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।

ब्रह्मैवाहमतः सिद्धः सच्चिदानन्दलक्षणः ॥ २ ॥

(टी०) नित्यं निरन्तरानन्दचिद्घनं ब्रह्मनिर्णयः ।

श्रुत्या तर्कानुभूतिभ्यामहमस्म्यद्वयं परं ॥ १ ॥

अम्बाग्रहोतवामार्द्धं वन्दे चन्द्रकलाधरं ।

लावण्यमधुरासारं कारुण्यरसवारिधिं ॥ २ ॥

End. (मू०) लक्ष्मीधरकवेः सूक्तिशरदम्भोजसम्भृतः ।

अद्वैतमकरन्दोयं विद्वद्भृङ्गैर्निपीयतां ॥

इति श्रीलक्ष्मीधरपण्डितविरचिताद्वैतमकरन्दः समाप्तिमगमत् ।

(टी०) ब्रह्मानन्दरसास्वादमिच्छद्भिर्विबुधोत्तमैः ।

रसाभिव्यञ्जिका ह्येषा परिशील्या सदादरात् ॥

Colophon. इति परमहंसपरिव्राजकाचार्य्यकैवल्यान्दयोगीन्द्रपादकमलभृङ्गायमानस्वयम्प्रकाशाख्ययतिविरचिताऽद्वैतमकरन्दव्याख्या रसाभिव्यञ्जिका नाम समाप्तिमगमत् ।

विषयः । ब्रह्मतत्त्वं ।

No. 690. परमामृतं ।

Substance, country yellow paper. Folia, 8. Lines, —13 on a page. Extent, 155 s'lokas. Character, Nágara. Date ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Prose. Incorrect.

Paramámṛíta. A Vedántic disquisition on the supreme soul, and the mode of adoring him. By Mahádevendra Sarasvatí, a disciple of Prajñánendra.

Beginning. प्रज्ञानमेकं ब्रह्मैव वासुदेवोऽच्युतः शिवः ।
इत्यादिनामधेयैर्यत् तस्मै ज्ञानात्मने नमः ॥ १ ॥
अथ परागदृष्टिविषयप्रवणानां शास्त्रेण पूर्व्वाचार्य्यैश्च शिक्षितं कथमिति चेत
उच्यते, शृणु यस्त्वात्मबुद्धिः कुणपे त्रिधातुके सुधीः कलत्रादिषु भोग्यसत्यधीः ।
यस्तीर्थबुद्धिः सलिलेषु कर्हिचिज् जनेष्वभिज्ञेषु स एव गोखरः ।

End. काश्यां परमामृताख्यं प्रकरणमिदं सुष्ठु सङ्गृह्य कृत्स्नं
श्रीमुखसंवत्सरेऽस्मिन् सुरगुरुबृहमाघकृष्णे दशम्यां ।
ध्यात्वा नत्वा गुरूणां विकशितप्रभुदार्पितं तच्छिवाया-
नेन प्रीणातु देवो मम धीविलसत्पूर्णप्रत्यक्स्वरूपः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमत्प्रज्ञानेन्द्रगुरुवर्य्यपूज्यपादशिष्यमहा-
देवेन्द्रसरस्वतीसङ्गृहीतं परमामृताख्यप्रकरणं सम्पूर्णं ।

विषयः । अध्यात्मविद्यावभासः ।

No. 691. ब्रह्मसंहिता, सटीका ।

Substance, country yellow paper. Folia, 18. Lines, 18 on a page. Extent, s'lokas. Character, Bengali. Date ? Place of deposit, Kágjiṭolá, Ḍháká, Bábu Krishnagovinda Ghosha. Appearance, old. Verse. Generally correct.

Brahma Saṁhitá. An epitome of a large work of this name on the divinity of Krishṇa, with a metrical commentary. By Rupá, brother of Vallabha and Sanátana, immediate followers of Chaitanya.

Beginning. ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणं ॥
सहस्रपत्रं कमलं गोकुलाख्यं महत्पदं ।
तत्कर्णिकारं तद्धाम तदनन्तांशसम्भवम् ॥

(टी०) श्रीकृष्णरूपमहिमा मम चित्ते मह्योयतां ।
यस्य प्रसादाद् व्याकर्त्तुमिच्छामि ब्रह्मसंहितां ॥
दुर्योजनापि युक्तार्था सुचिराद्दर्षिणाङ्कृतिः ।
विचारे तु मयाच स्याद्दर्षोणां स ऋषिर्गतिः ॥
यद्यप्यध्यायशतयुक् संहिता सा तथाप्यसौ ।
अध्यायः सूत्ररूपत्वात् तस्याः सर्वाङ्गतां गतः ॥

End. अध्यायशतसम्पन्ना भगवद्ब्रह्मसंहिता ।
कृष्णापनिषदां सारैः सञ्चिता ब्रह्मणोदिता ॥
इति श्रीब्रह्मसंहितायां भगवत्सिद्धान्तसङ्ग्रहे मूलसूत्राख्यः पञ्चमोऽध्यायः ।

(टी०) सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभानुजः सोऽसौ श्रीरूपो जीवसङ्गतिः ॥

Colophon. परिसमाप्तिसूचकं वाक्यं नास्ति ।

विषयः । श्रीवासुदेवस्य ब्रह्मताप्रकाशिनी बृहद्ब्रह्मसंहिता विद्यते । तत्प्रतिपाद्यमात्र-द्योतिकासौ सङ्क्षिप्ता ब्रह्मसंहिता ६५ श्लोकात्मिका च ।

No. 692. पल्लवदीपिका ।

Substance, country yellow paper. Folia, 9. Lines 6—7 on a page. Extent, 196 s'lokas. Character, Bengali. Date ? Place of deposit, Vanagráma, Ḍháká, Bábu Vrindávanchandra Gañgopádhyáya. Appearance, old. Verse. Generally correct.

Pallavadípiká. A short treatise on incantations for killing, subjugating, and bewitching rivals, &c. By S'ríkṛishṇa Vidyávágís'a Bhaṭṭáchárya.

Beginning. कृष्णां देवीं नमस्कृत्य तथा त्रिपुरसुन्दरीं ।
भद्रकालीं च देवेशीं तथा षट्कर्म्मदेवताम् ॥
श्रीकृष्णविद्यावागीशभट्टाचार्य्येण धीमता ।
क्रियते विदुषां प्रीत्यै कृता पल्लवदीपिका ॥
क्रोधाज् ज्वलन्तीं ज्वलनं वहन्तीं सृष्टिं दहन्तीं दितिजं ग्रसन्तीं ।
भीमं नदन्तीं प्रणमामि कृष्णां रोरूयमानां क्षुधयोग्रकेशीम् ॥

End. निवेद्य पिष्टपानादि तत्फलानि तथा तथा ।

Colophon. परिसमाप्तिसूचकं वाक्यं नास्ति ।

विषयः । मारणमोहनादिविधिकथनं ।

No. 693. वेदस्तुतिटीका ।

Substance, country yellow paper. Folia 31. Lines, 17—18 on a page. Extent, 2093 s'lokas. Character. Nágara. Date S. 1920. Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Prose. Generally correct.

Vedastuti Ṭíká. Annotations on the Tenth Book of the Bhágavata Puráṇa, in accordance with the exposition of S'rídhara Sámí. By Chakra Chuḍámaṇi.

Beginning. सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्म्मणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
अथ श्रीवेदस्तुतिव्याख्या श्रीधरपूज्यपादैर्या कृता सैव तदनुकूलाधिकपदकदम्ब-
संवर्द्धिता व्यक्तार्था यथा स्यात् तथा स्त्रीयानां सुखबोधाय मयात्र लिख्यते ।

End. वृन्दारण्ये निकुञ्जस्थः कविचूडामणिर्द्विजः ।
श्रुतिस्तुतिश्रुतिव्याख्यामकरोत् सर्वसम्मतां ॥

Colophon. इति श्रीवेदस्तुतिटीका चक्रचूडामणिकृता समाप्ता ।

विषयः । श्रीमद्भागवतदशमस्कन्धान्तर्गतश्रुत्यध्यायव्याख्यानं ।

No. 694. कुब्जिकातन्त्रं ।

Substance, country yellow paper. Folia, 33. Lines, 4 on a page. Extent, 453 s'lokas. Character, Bengali. Date ? Place of deposit, Vanagráma, Ḍháká, Bábu Kásinátha Chakravartí. Appearance, old. Verse. Incorrect, and defective.

Kubjiká Tantra. This is an original Tantra; but the MS. was in so disordered a state, that the Paṇḍit who examined it, could not make much of it. According to his report, the MS. comprises fourteen paṭalas, of which the first treats of the faults of women; 2nd the worship of Raktamátriká; 3rd the purification of the centres of the body; 4th worship of Shashṭhí, the protectress of new born infants; 5th worship of Dánkura-kumára; 6th worship of Jayakumára; 7th infructuousness in man; 8th directions for bathing; the rest unintelligible.

Beginning. अथदं सम्प्रवक्ष्यामि कुब्जिकातन्त्रमुत्तमं ।
रक्तमात्री च षष्ठी च डाङ्गुरा जयकुमारकः ॥
चतुर्व्विधः बाधकः स्यान मुनिभिः परिकीर्त्तितः ।
तेषां स्वभावं वक्ष्यामि यथाशास्त्रं निशामय ॥
एतेषां सकलं कार्य्यं जनैः मन्त्रतिकाङ्क्षिभिः ।
निःशरणं स्थापनञ्च बलिदानं विशेषतः ॥
कर्त्तव्यं गुरुवाक्येन ज्ञात्वा शास्त्रस्य लक्षणं ।
चतुर्व्विधो बाधकः स्याज् जायते ऋतुकालतः ॥

End. सिद्ध गुरु श्रीरामेर आज्ञा ।

Colophon. इति कुब्जिकातन्त्रे देवीश्वरसंवादे चतुर्दशः पटलः समाप्तः ।

विषयः । अत्रेयं विशृङ्खला दृश्यते । यद् वङ्गलाभाषया ग्रन्थशेषवाक्यकथनं । परन्तु अस्य विषयाः शुभा इति लिखितोऽयं ग्रन्थः । विषयास्तु यथा—
१, प्रथमपटले स्त्रीदोषलक्षणं । २, द्वितीये रक्तमातृकापूजा । ३, नाड़ीशुद्धिः । ४. षष्ठीदेवीपूजा । ५, डाङ्गुरकुमारपूजा । ६, जयकुमारपूजा । ७, पुंबन्ध्यत्वप्रशमनं । ८, स्नानविधिः । एतत्प्रभृतयः ।

No 695. कृत्यकौमुदी ।

Substance, country yellow paper. Folia, 131. Lines, 6 on a page. Extent, 2848 s'lokas. Character, Bengali. Date ? Place of deposit, Vanagráma Ḍháká, Kásinátha Chakravartí. Appearance, old. Prose. Generally correct.

Krityakaumudí. A compilation on Smṛiti rites. By Jagadánanda. The account furnished of the MS. by the Paṇḍit who examined it, is imperfect.

Beginning. नत्वा दिनपतिं पुंसां चतुर्वर्गफलप्रदं ।
धीरः श्रीजगदानन्दो निर्म्ममे कृत्यकौमुदीं ॥
इह खलु सकलेषु कर्म्मसु कालशुद्धिरावश्यकी । सा च मुनिभिरशुद्ध(?)-भिन्नतयैव निरुक्तति प्रथमं कालशु द्धरव निरुच्यते ।
तत्र शुद्धिदीपिकायां । गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे ।
याम्यायने हरौ सुप्ते सर्वकर्म्माणि वर्जयेत् ॥

End. जातः कनकरेखायां कृष्णपादाब्जषट्पदः ।
नम्रः सर्वेषु धीरेषु परनिन्दापराङ्मुखः ।
धीरः श्रीजगदानन्दो निर्म्मम कृत्यकौमुदीं । समाप्तोयं ग्रन्थः ॥

विषयः । विवाहादिकर्म्मणां दिवसशुद्ध्यादिकथनं ।

No. 696. रथयात्राप्रयोगः ।

Substance, country yellow paper. Folia, 5. Lines, 5 on a page. Extent, 84 s'lokas. Character, Bengali. Date ? Place of deposit, Vanagráma, Ḍháká, Vrindávanachandra Gañgopádhyáya. Appearance, old. Prose. Generally correct.

Rathayátrá Prayoga. A manual for the performance of the ceremonial rites necessary to be observed before taking out an image of Vishṇu, particularly Jagannátha, for airing on a car on the 2nd of the waxing moon in the month of Ásháḍha, June-July.

Beginning. पूर्वदिने अधिवासं कृत्वा अपरदिने कृतप्रातःकृत्यः कृतनित्यक्रियो यजमानः
पूर्वमुख आचम्य स्वस्तिवाचनपूर्वं सङ्कल्पं कुर्य्यात् ।

End. इति स्तुत्वा प्रणम्य दक्षिणाच्छिद्रावधारणं कुर्य्यादिति रथयात्राप्रयोगः, समाप्तः ।

विषयः । रथयात्राविधिः ।

No. 697. शारीरकसूत्रार्थसङ्ग्रहः ।

Substance, English paper. Folia, 54. Lines, 7—10 on a page, Extent 2058 s'lokas. Character, Bengali. Date, SK. 1770. Place of deposit, Sútrapura, Ḍháká, Bhagavánachandra Chakravartí. Appearance, new, Prose. Correct.

S'áriraka-sutrártha-sañgraha. A commentary on the Vedánta Sútras of Vyása. By Rádháramaṇadása Gos'vámí, son of Govardhanalála Gos'vámí.—This work is from the pen of a Dacca Pandit of no repute.

Beginning. श्रीराधारमणं नत्वा राधारमणदासकः ।
ब्रह्मसूत्रप्रवेशाय कुर्व्वे सूत्रार्थसङ्ग्रहं ॥
अथातो ब्रह्मजिज्ञासा । कर्म्मज्ञानानन्तरं कर्म्मणामल्पास्थिरफलत्वाद् ब्रह्मध्यान
कर्त्तव्यं ।

End. अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥ इति चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥

(टी०) भाष्यालोचनसालस्यैर्वैष्णवैः शास्त्रसम्मतः ।

सूत्रार्थसङ्ग्रहः पाद्यः पाठनीयो मुङ्गर्मुङः ॥ ४ ॥

Colophon. इति श्रीगोस्वामिगोवर्द्धनलालतनूजराधारमणदासगोस्वामिकृते शारीरक-सूत्रार्थसङ्ग्रहे चतुर्थाध्यायस्य चतुर्थपादः समाप्तः ॥

विषयः । ब्रह्मसूत्रव्याख्यानं ।

No. 698 परमार्थसारः ।

Substance, country yellow paper. Folia, 8. Lines, 10—20 on a page. Extent, 180 s'lokas. Character, Bengali. Date ? Place of deposit Vasur Bájára, Ḍháká, Dínabandhu Gos'vámí. Appearance, old. Prose, Generally correct.

Paramárthasára. Eighty-five verses in the Áryá metre on the elements of the Vedánta, apparently an imitation of the *Sáṅkhya Káriká* of Í's'vara kṛishṇa. By Sesha Nága.

Beginning. अव्यक्तादण्डमभूदण्डाद् ब्रह्मा ततः प्रजासर्गः ।

मायामयो प्रवृत्तिः संह्रियत इयं पुनः पुनः(?) ॥

मायामयोऽप्यचेता गुणकरणगणः करोति कर्म्माणि ।

तदधिष्ठाता देही सचेतनोऽपि न करोति किञ्चिदपि ॥

End. वेदान्तशास्त्रमखिलं विलोक्य शेषोऽखिलाधारः ।

आर्य्यापञ्चाशीत्या बबन्ध परमार्थसारमिदं ॥

Colophon. इति श्रीशेषनागविरचितः परमार्थसारः समाप्तः ।

विषयः । वेदान्तार्थसारनिरूपणं ।

No. 699. निगमलता ।

Substance, country yellow paper. Folia, 32. Lines, 8 on a page, Extent, 784 s'lokas. Character, Bengali. Date ? Place of deposit. Vanagráma, Ḍháká, Rámachandra Chakravartí. Appearance, old. Prose. Correct.

Nigamalatá. A Tántric compilation on the attainment of perfection through the adoration of women, according to the Kuláchára system. The MS. is incomplete, the first three chapters being wanting.

Beginning. (तृतीयपटलपर्य्यन्तं नास्ति । चतुर्थपटलात)

श्रीपार्व्वत्युवाच । इतोऽधिकं महादेव सङ्क्षेपाच्छृणु यत्नतः ।

जातिविचारणं वाव सधवां विधवां विना ॥

वृद्धां वा शैवनोन्मत्तां कुत्सितां नास्ति वत्सल(?) ।

शक्तेर्दर्शनमात्रेण शाक्तानान्तु महोत्सवम् ॥ इत्यतो विद्यते ॥

End. कवचं वा तदङ्गं वा तदङ्गं वा महेश्वर ।

जानाति स गुरुः साक्षान् मत्समस्तत्समोऽपि वा ॥

इति निगमस्तुतायां पार्वतीश्वरसंवादे पञ्चविंशतितमः पटलः । समाप्तश्चायं ग्रन्थः ।

विषयः । अत्र सर्वत्र नायिकासाधनव्यवस्था, तन्मन्त्राणि च विद्यन्ते ।

No. 700. अद्वैतामृतं ।

Substance, country yellow paper. Folia, 22. Lines, 14—15 on a page. Extent, 776 s'lokas. Character, Nágara. Dated S. 1807. Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, old. Verse. Correct.

Advaitámrita. The preeminence of the Vidánta as a means of salvation. By Jagannátha Sarasvatí, disciple of Harihara Sarasvatí. The subject of the work is treated in the form of a dialogue. Vivekás'rama Yáti, or the saint of the hermitage of dispassion, in course of his search for a peaceful hermitage, encounters Chittavritti, (mind), who calls herself his elder sister, and enters into conversation on the subject of salvation. The work is divided into five kavala or mouthfuls of nectar. Contents: I introduction. II Átma defined, its character. The power of the Godávari, and other rivers to afford salvation; the story of Andhaka. III Proofs of the felicitous character of the soul. IV. Impermanence of worldly pleasures, and nonduality of the soul. V. The difference between spirit, and matter; a quotation on the subject from the Chhándogya Upanishad. Dr. Hall states (Contributions, p. 14) that the work "purports to have been written for the use of one Vivekásrama;" that personage, however, is entirely imaginary, and plays the part of the tutor and not the taught.

Beginning. हरिहरसरस्वती यद्गुरुरीशः परमहंसानां ।
स जगन्नाथपदोत्तरसरस्वतीशब्दसंवेद्यः ॥ १ ॥
कर्म्मादिकण्ठालङ्कारं सारं वेदान्तवारिधेः ।
रचयत्यमलं ग्रन्थमद्वैतामृतसञ्ज्ञकं ॥ २ ॥
आसीत् यतिवरः कश्चिद् विवेकाश्रमसञ्ज्ञकः ।
यत्प्रसादेन बहवो मुक्तिमार्गमुपागताः ॥ ३ ॥

End. जिताहारो जितक्रोधो जगन्नाथसरस्वती ।
तेनायं रचितो ग्रन्थो अद्वैतामृतसञ्ज्ञकः ॥
एतस्य कवलान् पञ्चाशन्नोन्नादवतां गताः ।
अमृतत्वं प्रयान्त्याशु विबुधा यतिसत्तमाः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यहरिहरसरस्वतीप्रियशिष्यश्रीजगन्नाथसरस्वतीविरचितादैतामृते पञ्चमः कवलः समाप्तः ॥

विषयः । अध्यात्मविद्याभ्यासः ।

No. 701. प्रवासकृत्यम् ।

Substance, country paper, 9 × 5 inches. Folia, 10. Lines, 11 on a page. Extent, 160 s/lokas. Character, Nágara. Date of compilation, S. 1663; that of MS. S. 1739. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Correct.

Pravásakṛitya. The duties of a Ságnika Bráhmaṇa, driven to a foreign country for the sake of earning a livelihood or other cause. By Gaṅgádhara, son of Rámachandra.

Beginning. स्वप्रकाशविमर्शाख्यबीजाङ्कुरलतां पराम् ।
शृङ्गाटपीठनिलयां ब्रह्मानन्दमयीं नुमः ॥
धनार्जने तथापत्तौ प्रवासे समुपस्थिते ।
अग्रेभारं प्रतिष्ठाप्य पत्नीपुत्रेषु धर्म्मवित् ॥
प्रवसेद्विधिना सम्यक् तत्र कृत्यमिहोच्यते ।—इत्यादि ।

End. यदत्र सौष्ठवं किञ्चित् तद्गुरोरेव केवलम् ।
यदत्रासौष्ठवं किञ्चित् तन्ममैव गुरोर्न हि ॥ ४८ ॥
संवत् षोड्शके त्रिषष्टिसमये वासन्तिके माधवे
पूर्णान्दौ रविवासरे वृषगते मार्त्तण्डके मण्डले ।

श्रीमद्गुर्जरमण्डले द्विजयुते श्रीसम्भतीर्थे शुभे
श्रीमत्पाठकरामचन्द्रतनयो गङ्गाधरोऽलीलिखत् ॥ ४९ ॥

Colophon. इति श्रीमन्महायाज्ञिकदीक्षितहरिशङ्करानुगतश्रीमन्महायाज्ञिकपाठकरामचन्द्र-सूनुगङ्गाधरविरचितं प्रवासकृत्यं समाप्तम् ।

विषयः । धनार्जनार्थं आपत्तौ च प्रवासे समुपस्थिते, तत्र साग्निककर्त्तव्यकृत्यकथनं ।

No. 702 अच्छावाकप्रयोगः ।

Substance, country paper, 9 × 4 inches. Folia, 38. Lines, 12 on a page. Extent, 750 s'lokas. Character, Nágara. Date, S. 1793. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Achchháváka Prayoga. Directions for the performance of the Achchháváka rite, which constitutes a part of the Dvádas'áha sacrifice. By the Yájñika Raghunátha, son of Rudra Bhaṭṭa.

Beginning. अथवा द्वादशाहस्याच्छावाकप्रयोग उच्यते । तस्य सर्वमग्निष्टोमवत् । द्वादश दीक्षा । द्वादशोपसदः । द्वादश सुत्याः । एवं षट्त्रिंशदहो वा एष यद् द्वादशाहः ।—इत्यादि ।

End. अरङ्गमाम ते वयमरङ्गमाम ते वयोऽशेां॰माघाये अग्निमिन्धतेत्यादि समानमुक्थम् । येऽप्रोद्दो॰स्य राजाऽवो॰ सोम॰ । इति तृतीयः पर्यायः । समाप्तो द्यनीयातिरात्रः ।

Colophon. इति श्रीमद्याचितोपनामकश्रीरुद्रभट्टात्मजयाज्ञिकरघुनाथेन द्वादशाहस्याच्छावाकप्रयोगो विरचितः ।

विषयः । द्वादशाहीयप्रातःसवनमाध्यन्दिनसवनादिकर्मानुष्ठानविधिः ।

No. 703. आशौचकाण्डः ।

Substance, country paper, 10 × 5 inches. Folia, 36. Lines, 11 on a page. Extent, 1000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A's'auchakánḍa. Rules regarding mourning among the different castes. This is a chapter of a great, but scarce, work on the Smriti,

called the *Dinakaradyota.* It was commenced by Divákara Bhaṭṭa, son of Rámakṛishṇa and grandson of Náṛáyana, and completed by his son Vis'ves'vara *alias* Gágá Bhaṭṭa.

Beginning. सारं यच्छ्रुतिशिरसामगोचरं यन्मनोवचसाम् ।
तत् कौशा वचसां शिक्षापाचं महो वन्दे ॥ १ ॥
मीमांसैकधुरन्धरः श्रुतिधरो न्यायेपि वागीश्वरः
साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः ।
यं विद्वन्मणिशेखरो दिनकरः प्रास्तूत विश्वेश्वरं
तेनाशौचनिबन्धनो दिनकरोद्योतोधुना पूर्यते ॥ २ ॥

End. अथापद्य समाध्यक्षनिवहानन्ददायिनी ।
शिवच्छत्रपतेर्भूयाच्छिवद्युमणिदीपिका ॥

Colophon. इति श्रीमद्विद्वन्मुकुटमाणिक्यमरीचिमञ्जरीपुञ्जपिञ्जरितपदद्वन्द्वारविन्दश्रीनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजभट्टदिनकरतनयगागाभट्टापरनामकविश्वेश्वरभट्टपरिपूरिते दिनकरोद्योते अशौचकाण्डे द्रव्यशुद्धिविचारः शुद्ध्युद्योतः समाप्तः ।

विषयः । आशौचपदार्थनिरूपणं । वर्णाशौचातिक्रान्ताशौचानुगमनाशौचादिविविधमृताशौचविषयकव्यवस्थाकथनं ।

No. 704. छन्दोगमन्त्रपाठः ।

Substance, country paper, 10 × 4 inches. Folia 12. Lines, 9 on a page. Extent, 300 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Chhándoya-mantrapáṭha. A collection of the Sáma Vedic mantras required to be recited at the Vrashotsarga ceremony.

Beginning. देव सवितः प्रसुव यज्ञ प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ १ ॥—

End. माता रुद्राणां दुहिता वसूनां स्वसादित्यानामृतस्य नाभिः ।
प्रणु वोच चिकितुषे जनाय मागामनागामदितिं वधिष्ठ ॥ अभूमृत्सृजत ।

Colophon. इति छन्दोगमन्त्रपाठः समाप्तः ।

विषयः । वृषोत्सर्गे पठनीयाः छन्दोगमन्त्राः । अत्र चतुर्दशखण्डाः सन्ति । तत्र द्वितीयखण्डो न मिलति ।

No. 705. वैयाकरणसिद्धान्तरत्नाकरः ।

Substance, country paper, 10 × 4½ inches. Folia, 99. Lines 11 on a page. Extent, 3275 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vaiyákaraṇa siddhánta ratnákara. A commentary on the grammar called the Síddhánta Kaumudi. By Rámakṛishṇa Bhaṭṭa. The MS. is incomplete, and contains only a portion of *Subanta* or declension.

Beginning. विश्वेशं सच्चिदानन्दं लक्ष्मीकान्तमजं विभुम् ।
प्रणम्याथ मुनीन्नत्वा पाणिन्यादींस्तथागुरून् ॥ १ ॥
वेदशास्त्रार्थनिष्णातं तातं तिरुमलाभिधम् ।
शेषाशेषार्थसिद्धान्तकौमुदीमतिगङ्करम् ॥ २ ॥
व्याचिख्यासुर्विधास्येहं रामकृष्णो यथागमम् ।
वैयाकरणसिद्धान्तरत्नाकरमिमं सुधीः ॥ ३ ॥

End. (यतः खण्डितं, तच्छेषो लिख्यते,) अम्से इत्यस्यां दशायां प्रवृत्तायाः पदसञ्ज्ञाया लुप्तप्रकृतिके प्रत्यये एकदेशविकृतन्यायेन प्रवृत्तौ चत्यभावादिति सङ्क्षेपः ।

विषयः । सिद्धान्तकौमुदीव्याख्या सुबन्तारम्भस्यादेशप्रत्यययोरितिसूत्रपर्यन्ता ।

No. 706. पद्धतिसङ्ग्रहः ।

Substance, country paper, 9½ × 4½ inches. Folia, 108. Lines, 8 on a page. Extent, 1900 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Paddhati-sañgraha. A collection of manuals for the performance of Smṛiti rites. By Bhartrihari Yogindra.

Beginning. दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ।
स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ॥ १ ॥
बोद्धारो मत्सरग्रस्ताः प्रभविस्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णं मन्ये सुभाषितम् ॥ २ ॥ अङ्गपद्धतिरुच्यते ।

End. (यतः खण्डितं तच्छेषो लिख्यते) अस्मिन् संवत्सरे अस्माकं देशे तावद् वरुषो(?) नास्ति । शस्यादिकमधिकमधिकप्रकारेण ।

विषयः । अस्मिन् ग्रन्थे अन्न-विद्वच्-कौशार्थ-सुजन-धैर्य-शील-दैव-शृङ्गार-सम्भोग-सुविरक्त-वसन्ताद्यर्तु-वर्षा-वैराग्य-तृष्णा-याच्ञा-दैन्य-कालमहिमा-शीर्वादेश्वरस्तुति-संसार-चतुर्युगधर्म्म विप्रप्रशंसा-कविप्रशंसा-विद्याप्रशंसा-भाग्य-सज्जन-दुर्जनान्यापदेश-सत्सङ्गतिविधिप्रभाव-याचक-लाघव कुपुत्र-धनिक-दरिद्र-परापकार-दत्तवस्तु-देश-काल-स्वर्ग-नरक लोभ-नीतिप्रभृतिविविधपदार्थवर्णनविषयकपद्यसङ्ग्रहोस्ति ।

No. 707. स्कन्दपुराणीयपातालखण्डः ।

Substance, country paper, 9½ × 4 inches. Folia, 151. Lines, 9 on a page. Extent, 3000 s'lokas. Character, Nágara. Date, S. 1799 Sk. 1664. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Skandapuráṇiya Pátála-khaṇḍa. This name is taken from the colophon of the MS., but it is evidently incorrect. According to the Nárada Puráṇa, the Skanda Purána embraces seven khaṇḍas, *viz.*, 1, Máhes'vara; 2, Vaishṇava; 3, Brahma; 4, Kás'í; 5, Avanti; 6, Nágara; and 7, Prabhása, and none of these includes the subjects treated of in this work. The Padma Puráṇa has a Pátála-khaṇḍa, but it treats principally of the history of Ráma and of his ancestors, as given in the Raghuvañsa, and devotes a great portion of its space to a detailed description of Ráma's horse-sacrifice; whereas this work, although beginning with a eulogium on Ráma's house, notices Ráma but casually, and has nothing to say about his horse-sacrifice. What the correct name of the work is, I cannot ascertain. The contents of the Puráṇas given in the Nárada Puráṇa, do not shew that any part of the Puráṇas treats of the Dharmáraṇya Kshetra, the principal subject of the work under notice, and I am, therefore, driven to the conclusion that it is either spurious, or an episode of one of the Upapuráṇas, the contents of which are not on record. The MS. includes 32 chapters as follow: 1, Enquiry about the Dharmáraṇya tírtha. 2, Origin of its name. 3, Yama performs a penance at the place. 4, Vardhaní, a heavenly courtezan, sent to disturb the penance, and its consequences. 5, Duties of the inhabitants

of Dharmáraṇya. 6, Sráddha to be performed at a well there. 7, Origin of Brahmá, and the creation of the universe by him. 8, Átreya, Vas'ishṭha and other Gotras and Pravavas. 9, Story of a marriage between a banker of Dharmáraṇya with a Gandarva nymph. 10, Dedication of a temple to Dharmes'vara by Vishṇu to overcome a Rákshasa who infested Dharmáraṇya. 11, Assignment of the southern gate of the temple to the protection of Gaṇes'a. 12, The dedication of a temple to Vakulárka. 13, Penance by Hayagriva to beautify his equine face. 14, Story of Hayagriva. 15, Temple of A'nandá Deví. 16, Praise of Srímátrí Deví. 17, Story of Karnáṭa, a Daitya. 18, Praise of Indres'vara, and Jayantes'vara. 19, The sacred pools of Dharmáraṇya described. 20, Genealogy of Bhaṭṭáriká, Chhatrá, and Ambiká. 21, The celestial guards of Dharmáraṇya. 22, Investment of the place by Daityas. 23, Anecdotes of Ráma, and his pilgrimages. 25, Ráma requested by the Deví to repair the sacred temples of the place. 26, Land grants by Ráma recorded on copper plates. 27, Sacrifices performed by Ráma at the place. 28, Characteristics of the Káli Yuga, and anecdotes of Kumárapála. 29, Resumption of lands granted to Brahmaṇas by Ráma, and Hanumana's imprecations on the subject. 30, The aforesaid resumed lands restored. 31, Disputes among the donees. 32, Account of the donees, and who they were in their former births; merit of hearing this Puráṇa.

Beginning. जयति रघुवंशतिलकः कौशल्याहृदयनन्दनो रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥ १ ॥
धन्यायोध्या दशरथनृपः सा च मातापि धन्या
धन्यो वंशो रघुकुलभवो यत्र रामावतारः ।
धन्या वाणी कविवरमुखे रामनामप्रपन्ना धन्यो
लोकः प्रतिदिनमसौ रामवृत्तं शृणोति ॥ २ ॥
नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ३ ॥
एकदा सूतमायान्तं दृष्ट्वा तं शौनकादयः ।
परं हर्षसमाविष्टाः पपुर्नेत्रैकचेतसा ॥ ४ ॥
चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ।
अथ तेषूपविष्टेषु तपस्विषु महात्मसु ॥ ५ ॥
निर्दिष्टमासनं भेजे विनयाल्लोमहर्षणिः ।
सुखासीनन्ततस्तं च विश्रान्तमुपलक्ष्य च ॥ ६ ॥

अथाष्टच्छंसे ऋषयः काश्चित् प्रास्तावयन् कथाः ।
पुराणमखिलं तात पुरातेऽधीतवान् पिता ॥ ७ ॥
कच्चित् त्वमपि तत्सर्वमधीषे लौमहर्षणे ।
कथयस्व कथां सूत पुण्यां पापतिरूदनीम् ॥ ८ ॥

End. इदमाख्यानकं सर्वं कथितं पाण्डुनन्दन ।
यच्छ्रुत्वा गोसहस्रस्य फलं प्राप्नोति मानवः ॥
अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत् ।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥
विद्यार्थी लभते विद्यामुत्तमां कर्म्मसाधनीम् ।
तीर्थयात्राफलं तस्य कोटिकन्याफलं भवेत् ॥ ८३ ॥
यः शृणोति नरो भक्त्या नारी वाथ नृपोत्तम ।
निरयं नैव पश्येत् स एकोत्तरशतैः सह ॥ ८४ ॥
शुभे देशे निवेश्याथ क्षौमवस्त्रादिभिस्तथा ।
पुराणपुस्तकं राजन् प्रयतः शिष्टसम्मतः ॥ ८५ ॥
अर्चयेच्च यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
समाप्तौ नृप ग्रन्थस्य वाचकस्यानुपूजनम् ॥ ८६ ॥
दानादिभिर्यथान्यायं सम्पूर्णफलहेतवे ।
मुद्रिकाकुण्डले चैव ब्रह्मसूत्रं हिरण्मयम् ॥ ८७ ॥
वस्त्राणि च विचित्राणि गन्धमाल्यानुलेपनम् ।
देववत् पूजनं कृत्वा गाश्चदद्यात्पयस्विनीम् ॥ ८८ ॥

Colophon. इति श्रीस्कन्दपुराणे पातालखण्डे धर्म्मारण्यं समाप्तम् ।

विषयः । अत्र द्वात्रिंशदध्यायाः सन्ति । तत्र १, अध्याये धर्म्मारण्यकथाकथनविषयको सूतनारदादिप्रसङ्गः, धर्म्मारण्यकथाप्रसङ्गप्रोद्घाटनं च । २, धर्म्मारण्यस्य वर्णनं, तस्य माहात्म्यकथनं, धर्म्मारण्यनामार्थकथनं च । ३, धर्म्मारण्ये धर्म्मराजस्य तपश्चरणं, धर्म्मराजतपोभीतब्रह्मादिदेवकृता महादेवस्तुतिः, धर्म्मराजतपोविघ्नकरणाय इन्द्रकर्त्तृकाप्सरःप्रेषणं, वीणाहस्ताया भूषिताया वर्द्धनीनाम्न्या अप्सरसो धर्म्मराजं प्रति गमनं, स्त्रीमाहात्म्यवर्णनादि च । ४, वर्द्धन्यप्सरोयमसंवादः, धर्म्मराजस्य पुनस्तपः, महादेवाद् धर्म्मस्य वरप्राप्तिः, धर्म्मकृतमहादेवस्तुतिः, धर्म्मारण्यमाहात्म्यादि च । ५, धर्म्मारण्यनिवासिजनकर्त्तव्यम् । ६, धर्म्मवाप्यां श्राद्धस्य कर्त्तव्यता, युगधर्म्मकथनादि च । ७, ब्रह्मण उत्पत्तिः, तत्कृतसृष्टिश्च । ८, विष्णुना सह देवतासंवादः, आत्रेयवशिष्ठकौशिकादिगोत्राणां

तत्प्रवरादीनाञ्चोक्तिः। ९, विश्वावसुगन्धर्वकन्यानां धर्म्मारण्यस्थवणिग्भिः सह विवाहः। १०, लोलजिह्वाचनाम्ना रक्षसा धर्मारण्ये उपद्रवे कृते देवप्रार्थितेन विष्णुना तच्छान्तिः कृता, अतस्तत्र सत्यमन्दिरे धर्म्मेश्वरसंस्थापनं कृतमिति वृत्तान्तोक्तिः। ११, सत्यमन्दिररक्षार्थं दक्षिणद्वारे गणेशस्थापनं। १२, सत्यमन्दिरपश्चिमे वकुलार्कस्थापनं रविकुण्डोत्पत्त्यादि च। १३, हयग्रीवदेवस्य हयमुखस्य रमणीयतासिद्ध्यर्थं धर्म्मारण्ये तपश्चरणं, हयमुखोत्पत्तिवृत्तान्तादिकथनञ्च। १४, हयग्रीवोपाख्यानं। १५, राक्षसादिभयनाशार्थमानन्दादेवीस्थापनं। १६, श्रीमाढदेवीमाहात्म्यकथनादि। १७, कर्णाटकनामदैत्योपाख्यानं, देवीकर्ढकदैत्यवधादि च। १८, इन्द्रेश्वरजयन्तेश्वरमहिमावर्णनादि। १९, धर्म्मारण्यस्थश्वेतीर्थधराक्षेत्रतीर्थवर्णनादि। २०, भट्टारिकाच्छत्राम्बिकादिकुलदेवीनां गोत्रप्रवरकथनं। २१, धर्म्मारण्यदिग्देवतास्थापनं। २२, देवासुरयुद्धे, देवपराजयः, धर्म्मारण्यस्थब्राह्मणादीनां पलायनं, धर्म्मारण्ये लोहासुरादिदैत्यप्रवेशकथनादि च। २३, रामचरित्रवर्णनं। २४, रामस्य तीर्थयात्रा, तत्तत्तीर्थस्नानफलकथनादि च। २५, धर्म्मारण्यस्थदेवमन्दिरादिजीर्णोद्धारकरणार्थं रामं प्रति देवीप्रेरणादि। २६, ताम्रपत्रे धर्मशासनपत्रलेखनादि। २७, धर्म्मारण्ये रामकर्ढकं दानयज्ञादिकरणं। २८, कलिधर्म्मकथनं रामदत्तब्रह्मस्वहरणोद्यतेन कुमारपालेन राज्ञा सह विप्रसंभाषणं, सेतुबन्धे विप्रगमनं, तत्र हनूमदागमनं हनूमद्द्विजभाषणादि च। २९, ब्राह्मणवृत्त्युद्धारार्थं हनुमत्कर्ढकोपायादिकरणं। ३०, ब्राह्मणवृत्तिप्राप्तिः। ३१, रामदत्तवृत्तिभोगिब्राह्मणानां परस्परविरोधोत्पत्तिकथनादि। ३२, तेषां द्विजानां भूतवृत्तान्तकथनं एतद्ग्रन्थश्रवणादिफलकथनञ्च।

No. 708. कुण्डार्कमरीचिमाला।

Substance, country paper, 10 × 4½ inches. Folia, 18. Lines, 10 on a page. Extent, 360 s'lokas. Character, Nágra. Date, S. 1885. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and Verse. Generally correct.

Kuṇḍárka-maríchimálá. A commentary on a metrical treatise on the construction of ten kinds of fire altars. The text is by S'aṅkara son of Nílakaṇṭha, and the commentary by Raghuvíra, son of Viṭhṭhala of the clan Kṛishṇátri.

Beginning. कृष्णात्रिगोत्रोद्भवबूवसिन्धोः समुद्गतो विठ्ठलपूर्णचन्द्रः ।

तस्यात्मजः श्रीरघुवीरसञ्ज्ञः करोति कुण्डार्कमरीचिमालाम् ॥

अत्र भगवान् श्रीभट्टनीलकण्ठसुतो भट्टशङ्करनामानुपपत्तिप्रधानं सुकरोपायञ्च कुण्डप्रकाशकं ग्रन्थमाविष्कर्त्तुं प्रतिजानीते ।

भास्वन्तं नीलकण्ठं पितरमनुसरञ्छङ्करो वक्ति कुण्डं

भू१द्व२र्श्र३ब४ङ्गा५ष्ट६हसं दशशतहवनात्तद्दशघ्नात्तरे स्यात् ।

हस्तः स्यादूर्ध्वबाहोः प्रपदगमखिनः पञ्चमांशोङ्गुलं त-

त्त्रिद्व्यंशस्तद्गजांशो यव उरगलवस्तस्य यूकाष्टलोक्षा ॥ १ ॥

भास्वन्तं कीटभृङ्गन्यायेन ध्यानबलाद्भास्वद्भावप्राप्तं कुण्डं दशविध साङ्गोपाङ्गमित्यर्थाद् ज्ञेयम् ।

End. उपसंहरति । व्यासदोर्ष्णमिति मवदलङ्करोनैकण्ठरिति (?) । दशविधकुण्डप्रकृतिव्यासानामेकहस्तद्विहस्तादिमानभेदेन प्रत्येकं दशविधानां तथा दोर्ष्णां बाहूनां शतसङ्ख्यानामित्यनेन प्रकारेण मितिप्रमाणम् । भट्टशङ्करनामा श्रीमन्नीलकण्ठसुतः अवदत् उक्तवान् । न परैरवगाहिता स्फुटं कुण्डाक निखिलशाङ्करी कृतिः । विदृता रघुवीरदीक्षितैः कुतुकादेव न कामकाम्यया ॥

Colophon. इति कुण्डार्कटीका समाप्ता ।

ॐ अद्येऽर्थं गायत्रीपुरश्चरणहवनोपयोगिकुण्डमण्डपनिर्माणं कर्त्तुं गणेशकूर्मशेषवसुधाविश्वकर्मद्विजपूजनं भूम्यर्घदानानि करिष्ये । निर्विघ्नसिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं करिष्ये । ततः गणपत्यादयः प्रीयन्तामिति विशेषः । मन्त्रः,

आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।

उद्धृतासि वराहेण सशैलवनकानना ॥

मण्डपं कारयामद्य त्वदूर्द्धं शुभलक्षणम् ।

गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भव ॥ (इतः परं पाठो नास्ति ।)

विषयः । दशविधहोमकुण्डनिर्माणप्रकारोद्योतकस्य शङ्करभट्टकृतस्य कुण्डार्कनामग्रन्थस्य व्याख्यानं ।

No. 709. उपाङ्गललितापूजनं, ललिताकल्पोक्तं ।

Substance, country paper, $7\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 26. Lines, 7 on a page. Extent, 300 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and Verse. Generally correct.

*Upáñgalalitá-púja*na. Directions for the adoration of Upáñgalalitá, a form of Durgá. Founded on the *Lalitákalpa*.

Beginning. अथोपाङ्गललितापूजनं। तत्रादौ प्रातःस्नानादिकं विधाय वनस्पतिं प्रार्थयेत्।
आयुर्बलं यशोवर्चः प्रजापशुवसूनि च।
ब्रह्म प्रज्ञाञ्च मेधाञ्च तन्नो धेहि वनस्पते॥ इति वनस्पतिप्रार्थना।—इत्यादि।

End. व्रतमेतत्तु यः कुर्यात्पुत्रवान् धनवान् भवेत्।
विद्यावान् रोगनिर्मुक्तः सुखी भोगी च जायते॥ ९॥
सौभाग्यं लभते नित्यं स्त्रीकन्याव्रतमुत्तमं।
विजयं पुष्टिमारोग्यं यच्चान्यदपि काङ्क्षितम्॥ १०॥
तत्सर्वं समवाप्नोति महादेव्याः प्रसादतः।
इत्येतद् व्रतमाख्यातं सेतिहासं महर्षयः।
शृण्वन् पश्यन्नरो भक्त्या नित्यं सुखमवाप्नुयात्॥ ११॥

Colophon. इति उपाङ्गललितापूजनं समाप्तम्।

विषयः। उपाङ्गललिताया व्रताङ्गीभूतपूजनस्य व्रतकथायाश्च कथनं।

No. 710. सप्तपाकयज्ञशेषः।

Substance, country paper, 10 × 4¾ inches. Folia, 65. Lines, 10 on a page. Extent, 1600 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Saptapákayajna-s'esha. This work is divided into four chapters or *Prasnas*, each comprising from 18 to 23 sections or *adhyáyas*. The sections are generally very short, and give very brief descriptions of matters, apparently, with a view to supply omissions in some original work. From the repeated use of the words *evamáha bhagaván Bodháyana*, both at the ends of sections and in other parts, it would seem that the work is a supplement or *paris'ishṭa* to the Sútras of Bodháyana, by a pupil of his. But looking to its contents, which are of a most miscellaneous character, including almost all the Grihya domestic rites, as also various acts and expiations on particular sacred days, rules regarding domestic economy, and adorations to different divinities, such as are nowhere mentioned in the Grihya Sútra of Bodháyana,

and do not form parts of Grihya rituals, and bearing in mind that the work is written in the Sútra style, I am disposed to think that it is a *Samaya-chárika Dharma Sútra.* Its name, as given above, is not the right one, as it has been obviously formed by putting together the two principal words of the first sentence *athátah saptapákayajñán uktam, tats'esham vyákhyásyáma.* The colophon gives no name, nor is there any at the beginning. Contents: arrangement of altars; making of altars; sand for altars; spreading of kús'a grass on altars; articles required for the Sarvadarvi homa; presiding divinities of auspicious days; addresses to Bráhmaṇs on such days; piercing of the lobes of the ears on the 7th or 8th month after birth; duties on the day on which the natal constellation presides; certain Vedic mantras for the preservation of children; charity to beggars; rites for assuaging adverse supernatural influences on a house; ceremony for the welfare of elephants; coronation; ceremonial bathing for longevity; rites after conception; do. after birth; homa for getting children; duties on the 7th of the waxing moon in Mágha; adoption of children; investiture of Bráhmaṇs with the sacrificial thread; do. of Kshatríyas and Vaisyas; offering of rice to crows and to the fire; investiture for emasculated, deaf and dumb persons; worship of the As'vattha tree; establishing of a figure of Vishṇu; daily worship of ditto; bathing of ditto; establishing of a figure of Rudra; daily worship of ditto; bathing, &c., of ditto; establishment of gods; adoration of the íshṭa-devatá in effigy, or in water, worship through the Gáyatri; worship of Durgá; worship of Kálarátrí on certain specified days; worship of S'rí; worship of Sarasvatí; worship of Vishṇu on certain specified months; worship of the Sun on Sundays; do. of Jyeshṭhá and Kanishṭhá Devís; do. of Viṇáyaka; do. of gods on the day when the natal constellation is on the ascendant; expiatory rites meet when unfortunate accidents occur; do. on the birth of twins; do. for recovery from ill-health; duties on the full-moons of Ás'vina and Kártika; feeding of a thousand Bráhmaṇs to overcome disease, or attack of devils; addresses to Bráhmaṇs after feeding them; s'ráddha for one's ownself; expiation for death by accident; sacrifice of crows; minor balís; cremation and other funeral rites for one's ownself; offerings on the tenth day after death; rites with special prayers; use of water after calls of nature; washing of the face; Dars'a and Paurnamása rites by persons who have not established the sacred

household fire; Agnihotra rite by persons having two wives; payment of debts to gods, men and manes; worship of Agni; duties of persons who have established the sacred household fire on the death of two wives; details of the mode of using fire borrowed from another; duties of Sannyásis; funeral for Yatis; offering of durba grass to Vishṇu; Nándimukha S'ráddha; annual s'ráddha; first anniversary s'ráddha.

Beginning. ॐ अथातः सप्तपाकयज्ञानामुक्तं तच्चेषं व्याख्यास्यामः । पवित्रकरणं प्राचीन-संस्कारप्रणीताप्रणयनं स्रुक्सम्मार्जनमिति दर्शपूर्णमासवत्तूष्णीमथाग्निं परिस्तीर्य दक्षिणेनाग्निमावाह्यत्यादि ।

End. अथैनामुपतिष्ठते ये समाना ये सजाता इति द्वाभ्यामुपस्थायैकं वा पात्र-मसौ पितृभिः पितामहैः प्रपितामहैः सहैतत्ते तिलोदकं प्रदानमग्नौकरणमन्न-प्रदाने यथार्थमूहेदामेचनेन सपिण्डो व्याख्यातः । समाप्तश्च चतुर्थः प्रश्नः । संवत्सरे सपिण्डीकरणं । एकादशे मासि संवत्सरे सपिण्डीकरणम् । अथैकोद्दिष्टेषु । अथातो नान्दीमुखं । अथातोकुतोङ्कुरार्पणविधिं (?) । अथातः सम्प्रवक्ष्यामि । अथातः कपिलसन्न्यासविधिं । अथप आहिताग्निः (?) । अथ गृहस्थस्यो-पासनं । अथातो लौकिकोपासनविधिं । अथ वै भवति जायमानो वै । अथ यदि गृहस्थस्य द्वे भार्ये विन्देत । कथमु खल्वनादिमग्नेः (?) । अथ गृहस्थ-स्यापामनषण्मासानजुह्वुः । अथ वै भवत्यापो वै । अथात आचमनविधिं । अथातः काम्यविधिं । प्रह्वतानुकृतिधर्मोपभोगः (?) । अथातो मृतबलिं । आह्वतानुकृति-हरणानुकृति-धूर्त्तबलिं । इतः खण्डितम् ।

विषयः । आसादनसामग्र्यादिकथनं । स्थण्डिलविधिः । सिकतादोषकथनं । परि-स्तरणविधिः । सर्वदर्वीहोमसामग्रीकथनादि । पुण्याहदेवताकथनं । पुण्याह-वाचनं । सप्तमेऽष्टमे वा मासि कर्णवेधविधिः । जन्मनक्षत्रे आगते कर्त्तव्य-नक्षत्रहोमः । वेदमन्त्रविशेषैर्बालकस्य रक्षाकरणविधिः । ग्रहातिथ्यबलिकर्मा-पहारादिकथनं । गृहशान्तिविधिः । गजशान्तिविशेषकथनं । राजाभिषेक विधिः । शताभिषकविधिः । गर्भाधानजातकर्मविधिः । प्रजार्थहोमः । माघ-शुक्लसप्तम्यां कर्त्तव्यम् । दत्तकपुत्रविधिः । यज्ञोपवीतविधिः । राजन्यवैश्ययो-रुपनयनविधिः । देवतार्चनबलिवैश्वदेवादिविधिः । षण्ढबधिरमूकानामुप-नयनसंस्कारप्रकारः । अग्न्यत्पूजनविधिः । विष्णुप्रतिष्ठाविधिः । महापुरुषा-भिधस्य विष्णोरहरहःपरिचर्याविधिः । वेदोक्तमन्त्रविशेषैर्विष्णोः स्नपनं । रुद्रप्रतिष्ठाविधिः । महादेवस्याहरहःपरिचर्याविधिः । रुद्रस्नपनार्चनविधिः ।

विषयः। पुना रुद्रस्य स्नपनविधिः। पुनः प्रतिष्ठाकल्पकथनादि। प्रतिमायां जले स्थले वाऽपि स्वेष्टदेवतापूजनस्यावश्यकर्त्तव्यतोक्तिः। पूर्वोक्तकतिपयविथुल्लेखादि। व्याहृतिजपस्य तद्रुद्रस्य होमस्य च विधिः। मासि मासि कृत्तिकानक्षत्रदिन दुर्गापूजनविधिः। आदित्यवारेऽङ्गारकवारे वा चतुर्थ्यामष्टम्यां चतुर्दश्यां वा भरण्यां कृत्तिकायां वा कर्त्तव्यस्योपश्रुतिमहाकालरात्र्याद्याख्यदेवीपूजनविधिः। शुक्लपक्षस्य पौर्णमास्यां वा श्रीपूजनविधिः। शुक्लत्रयोदश्यामुत्तराफल्गुनीनक्षत्रदिने वा पुष्यनक्षत्रदिने वा सरस्वतीपूजनविधिः। आषाढकार्त्तिकफाल्गुनशुक्लपक्षेषु द्वादश्यां विष्णुपूजनविधिः। रविवारे सूर्यपूजाविधिः। ज्येष्ठाकनिष्ठादेवीपूजनविधिः। मासि मासि चतुर्थ्यां शुक्लपक्षस्य पञ्चम्यां शुभफलप्राप्त्यर्थं विनायकपूजनविधिः। जन्मनक्षत्रदिवसे अपमृत्युजयार्थं देवपूजनविधिः। अशुभकरघटनाविशेषशान्तिः। यमकजन्मशान्तिः। आरोग्यकामादीष्टिविधिः। कार्त्तिक्यां पौर्णमास्यां वाश्वयुज्यां कर्त्तव्यवृषोत्सर्गविधिः। आपूर्यमाणपक्षे पुण्ये नक्षत्रे जन्मनक्षत्रे ग्रहगृहीते व्याधिग्रस्ते वा सहस्रब्राह्मणभोजनादिविधिः। भोजनस्तुत्यविधिः। जीवच्छ्राद्धविधिः। अपघातमरणकर्त्तव्यनारायणबलिविधिः। वायसबलिविधिः। पूर्वोक्तविषयोल्लेखादि। अनुकृत्याद्याख्यबल्यादिविधिः। जीवतापि दहनप्रभृतिसपिण्डीकरणान्तकर्मणः कर्त्तव्यतोक्तिः। दशदिनेषु कृतबलिविधिः। कृतानुकृतिधर्मापभोगविधिः। काम्यकर्मविधिः। विष्ठात्यागे शौचविधिः। आचमनविधिः। अनाहिताग्निदर्शपूर्णमासादिकथनं। गृहस्थोपास्यकर्मकथनं। अग्निहोत्रादिकर्मसु द्विभार्येण कथमनुष्ठेयं, तदुक्तिः। ऋणत्रयमोचनप्रकारः। अग्न्युपासनाविच्छेदे कर्त्तव्यं। आहिताग्नेर्भार्याद्वयमरणे कर्त्तव्यं। लौकिकाग्निग्रहणादिविधिः। कपिलसन्यासविशेषविधिः। प्रमीतयतिसंस्कारविधिः। विष्णवे दूर्वाद्यङ्कुरार्पणादिविधिः। नान्दीमुखश्राद्धविधिः। एकोद्दिष्टश्राद्धादिविधिः। सपिण्डीकरणविधिश्च॥

No. 711. सूर्यादिपञ्चायतनप्रतिष्ठापद्धतिः।

Substance, country paper, 8½ × 4 inches. Folia, 40. Lines, 7 on a page. Extent, 470 s'lokas. Character, Nágara. Date, Sm. 1866. Place of deposit, Government of India. Appearance, new; the leaves quite fresh. Prose. Generally correct.

Súryádipañchâyatanapratishṭhá Paddhati. Guide to the rituals for the installation of Súrya, S'iva, Gaṇes'a, Durgá and Vishṇu, in a temple or altar. By Divákara, son of Bháradvája Mahádeva.

Beginning. इहैके शैवाः सन्त्यपर उदिताः शक्तिपरमा-
स्ततोऽन्ये गाणेशाः कतिचिदपरे वैष्णवतमाः ।
त एते मार्त्तण्डं प्रतिपरमुखेन स्वत उत
प्रयान्ति त्वामेवाखिलसुसरितो वारिधिमिव ॥
दिवाकरेण विदुषा प्रणम्य तरणिं परं ।
तन्यते सर्वदेवानां प्रतिष्ठापनपद्धतिः ॥

End. ततः स्थण्डिलात्पूर्वस्यामश्वत्थपर्णेषु ऋतशेषं दत्वा विश्वभुजे नमः, सर्वभुजे नमः, आत्मभुजे नमः, परमात्मने नमः, इति चतुर्भिः प्रदक्षिणाः कृत्वा दण्डवन्नमस्कारञ्च विधाय द्वादशब्राह्मणान् भोजयेदिति दिक् ।
उक्तमात्रं मया किञ्चिद् यदुक्तं तन्महात्मभिः ।
अतो निरीक्षितव्येयं प्रतिष्ठापनपद्धतिः ॥

Colophon. इति श्रीभारद्वाजमहादेवसूनुदिवाकरकृता सूर्यादिपञ्चायतनप्रतिष्ठापद्धतिः समाप्ता ।

विषयः । सूर्यमहादेवगणपतिदुर्गाविष्ण्वादिदेवप्रतिष्ठापनप्रकारकथनं ।

No. 712. वृत्तरत्नाकरसेतुः ।

Substance, country paper, $10\frac{3}{4} \times 5\frac{3}{4}$ inches. Folia, 30. Lines, 14 on a page. Extent, 900 s lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, the leaves nearly new. Prose. Generally correct.

Vritta-ratnákarásetu. A commentary on the Vritta-ratnákara, a short treatise or versification. By Haribháshkara, son of Ápóji Bhaṭṭa, grandson of Hari Bhaṭṭa, and great grandson of Purusottama Bhaṭṭa. The work was compiled at Benares in the Samvat year 1733. The Vrittaratnákara has been printed several times in Calcutta.

Beginning. टी० । प्रस्फुरन्मधुपचुम्बितपद्मापङ्कजातजनिपङ्कजनोयम् ।
बध्यते किल जडापि च यस्मात्सारणं तद्धि(?) धाम नमामः ॥

श्रीगुरून् पितरौ चापि नत्वा भास्करशर्मणा ।
वृत्तरत्नाकरे सेतुर्यथामति विरच्यत ॥
ग्रन्थारम्भे यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनमिति गौतमसूत्रोक्तः, सप्रयोजनं शिवप्रणामरूपं मङ्गलं निर्विघ्नग्रन्थस्य सम्बन्धप्रयोजने श्लोकत्रयेणाह । सुख-सन्तानेति ॥

End. टी० । त्र्यम्बकेश्वरपुरीकृतवासाद्ग्रिहोत्रिकुलनीरधिचन्द्रात् ।
पुण्यपूर्वपुरुषोत्तमभट्टादुद्बभूव सुकृतो हरिभट्टः ॥ १ ॥
वेदवाक्यनिचयावचयेन प्रोक्तितो विधिरिवेह बुधौघैः ।
लोकगीतविमलायतकीर्त्तिः सोऽपि सज्जनमणिर्जयति स्म ॥ २ ॥
तस्मादुद्भूतकीर्त्तेः कृतसुकृतभरान्मन्त्रतन्त्रः स्वतन्त्रः
साधूनामग्रगण्यो गदद्लनविधौ मानवानां शरण्यः ।
काशीचेत्राधिवासी हृतकठिनमहच्छत्रुषड्वर्गदम्भः
श्रीमानापाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ॥ ३ ॥
सेतुस्तत्तनयेन शैवनगरे सद्वृत्तरत्नाकरे
नेतुं भास्करशर्मणा विरचितः पारं बुधानां गणं ।
तेनायं ससुरेन्द्रनिकरव्यालोलमौलिस्खल-
च्चन्द्रमरीचिरञ्जितपदो देवो रविः प्रीयताम् ॥ ४ ॥
तरीतुमचिरीकरं यदिह वृत्तरत्नाकरं
महासुमनसामहं मननहेतुमेतुं जडः ।
हरेरिव महोदधौ कपिनिबद्धसेतौ स्फुर-
न्नयन्तु महिमा गुरोश्चरणयोः समुज्जृम्भते ॥ ५ ॥
ऋचिवक्रिहयभूमितवर्षे सद्वसन्तसमये मधुशुक्ले ।
आगतः प्रतिपदीह समाप्तिं सेतुरेष बुधसङ्गमुदेस्तु ॥ ६ ॥

Colophon. इति श्रीमद्ग्रिहोत्रिकुलतिलकायमानश्रीमदापाजीभट्टसूरिसूनुपराभिधान-हरिभास्करविरचितो वृत्तरत्नाकरसेतुः समाप्तिमगात् ॥

विषयः । वृत्तरत्नाकरव्याख्यानं ।

No. 713. रत्नदीपकम् ।

Substance, country paper, $12\frac{3}{4} \times 5$ inches. Folia, 25. Lines, 9 on a page. Extent, 450 s'lokas. Character, Nágara. Date Sm. 1861. Place of deposit, Calcutta Asiatic Society. Appearance, new. Verso. Incorrect.

Ratnadīpaka. Influences of the planets under particular circumstances on the destiny of man. By Gaṇapati, disciple of Gopāla.

Beginning. सिद्धिश्रीगुरुगणपतिसारदाप्रसादाज्जयो मङ्गलाभ्युदयश्च ।

प्रणम्य सारदां देवीं गणेशं शिवनन्दनं ।

ब्रह्मविष्णुमहेशाख्यं वक्षेहं जन्मजं फलम् ॥

विलोक्य नानामुनीनां मतानि सर्वार्थदं जन्मफलं प्रकाशं ।

नत्वा गुरोः पादयुगञ्च मातुः करोमि रम्यं किलरत्नदीपं ॥

श्रीमद्रायकवानवंशविभवः श्रीरामसेवारतः

श्रौतस्मार्त्तशिशेषधर्मनिरतो विद्यादयावारिधिः ।

बुद्ध्या वै जितचन्द्रजातयशसो(?) विद्याजितो वाक्पतिः

कान्त्या वै जितचन्द्रमा भुवि तले गोपालनामा गुरुः ॥ ३ ॥

तस्य प्रसादात् खलु रत्नदीपं वक्ति द्विजोयं किल नार्मदेयः ।

देवद्विजानां परिदासभूतः सौम्यात्मबुद्धिर्द्विजदेवभक्तः ॥ ४ ॥

अथ प्रवक्ष्याम्यथ वर्णभावमयं(?) स्वभावं खलु उच्चनीचं ।

सूर्यादिकानां मृदु वा कठोरं तेनैव भावेन नरो हि योज्यः ॥ ५ ॥

End. एतत्पादपसङ्क्षिते खलखगैः संसेवितव्या परं

दृष्टं वै खलु मानसोपरिगतो जातोथवा पङ्गुकः ।

ह्रस्वो वा विकलोवलम्बधरणो क्लृप्तोऽथ वाल्मियुतो (?)

खञ्जो अङ्गुलिवर्जितो भवति वा वक्रोऽप्यपादोऽथवा ॥ ८ ॥

Colophon. इति श्रीगणपतिकृतेरत्नदीपके शुभमस्तु सिद्धिरस्तु (?) ।

विषयः । १ अध्याये, मङ्गलाचरणग्रन्थरचनाप्रतिज्ञादि । २, तन्वादिभावस्थितरविफलं । ३, तन्वादिभावस्थचन्द्रफलं । ४, तन्वादिभावस्थभौमफलं । ५, तन्वादिभावस्थबुधफलं। ६, तन्वादिभावस्थगुरुफलं । ७, तन्वादिभावस्थशुक्रफलं । ८, तन्वादिभावस्थशनिफलं । ८, तन्वादिभावस्थराहुफलं । १०, रविचन्द्ररविभौमादिद्विग्रहयोगफलं। ११, सूर्यचन्द्रभौमादित्रिग्रहयोगफलं। १२, चतुर्ग्रहयोगफलं । १३, राजयोगकथनं । १४, लाभदयोगकथनं । १५, सुखदयोगचथनं । १६, दारिद्र्ययोगकथनं । १७, रोगदयोगकथनं । १८, चौरयोगकथनं । १९. पापयोगकथनं । २०, २१, जातिभंशयोगतल्लक्षणकथनं । २२, काणयोगकथनं । २३, कुष्ठयोगकथनं च ।

No. 714. सत्योपाख्यानम् ।

Substance, country paper, 13 × 5 inches. Folia, 79. Lines, 7 on a page. Extent, 1185 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, modern. Verse. Generally correct.

Satyopákhyána. The MS. examined is incomplete, and embraces only a portion of the work (chapters 50 to 79), which has the distinctive title of *Rámarahasya khaṇḍa.* Apparently the work is a compilation from one of the Puráṇas. The contents of the fragment examined are as follow: L. A musical entertainment in Vaikuṇṭha, laws of dancing, origin of the names of Ráma, Kṛishṇa, &c. LI. Birth and early life of S'itá, preparations for her marriage. LII. Festal hall of Janaka where many princes arrive in hopes of securing the hands of S'itá. LIII. Vis'vámitra deputed to bring Ráma to the place. LIV. Ráma's arrival at the coart of Janaka, LV. Janaka's hospitality to his guests. LVII. Ráma's breaking the monster bow. LVIII. Das'aratha's arrival at the coart of Janaka. LIX. Reception given him. LXI. LX. Marriage of Ráma and Lakshmaṇa. Heavenly damsels pay their respects to the newly married couple. LXI. Ráma's return home. LXIII. His reception at Kos'ala. LXIV. Nárada's interview with Ráma, LXIV. Reception of Sitá. LXVI. A feast given to Vas'isṭha and other sages by S'itá. LXVII. Ráma's cruise on the Sarayu. LXVIII. He visits Pávakasara, a sacred pool. A picnic there. LXIX. He is roused from his sleep. LXX. Sports with Guhaka. LXXI. A trip to the banks of the Manoramá River. LXXII. A visit to the temple of Vilvahari. LXXIII. A trip to the Ramaṇaka forest. LXXIV to LXXVIII. Ráma and S'itá's recreations. LXXIX. Description of Ayodhyá.

Beginning. शौनक उवाच। सूत सूत महाबुद्धे श्रीरामचरितं वद ।
यस्य श्रवणमात्रेण भवेन्मुक्तो न संशयः ॥
उत्पन्ना च कथं सीता साक्षाल्लक्ष्मीः क्षितेस्तलात् ।
कारणं वद मे विद्वन् रामेणोद्वाहिता पुनः ॥

End. इदन्तु चरितं रम्यं सीताराघवयोः शुभम् ।
श्रुत्वा व्यासान्मया तुभ्यं शौनकेदं प्रकीर्त्तितं ॥
धन्यं यशस्यमायुष्यं पुण्यं वंशविवर्द्धनं ।

सदैव गृण्वतां लोके मङ्गलप्रदमुत्तमं ॥
चतुर्वर्गप्रदं ह्येतच्छ्रोतॄणां मुदकारकम्।
यश्चैतच्छृणुयाद्वापि वाचयेद्वा समाहितः ॥
उभौ तौ सुखमेधेते व्यासवाक्यमिदं शुभं।
वाचकस्य यथाशक्ति पूजां कुर्यान्महामनाः ॥
मङ्गलानि प्रजाभ्यस्तु नृपेभ्यस्तु सदैव हि।
साधुगोविप्रभूमिभ्यः श्रीशो दिशतु मङ्गलम् ॥

Colophon. इति श्रीसत्योपाख्याने सूतशौनकसंवादे रामबालचरित्रे एकोनाशी०——

(इतः परं पाठो नास्ति।)

विषयः। ५० अध्याये, शौनकस्य सूतं प्रति श्रीरामचरित्रप्रश्नः, वैकुण्ठवर्णनं, महालक्ष्म्या अग्रतो वासन्तिकाया अप्सरसो नर्त्तनं, नाट्यधर्म्मोक्तिः, लक्ष्म्याः सकाशात् तस्या अप्सरसो वरप्राप्तिः, भुवि अवतरिष्यमाणानां रामकृष्णादीनां नामनिर्देशश्च। ५१, जनकयज्ञशालातो जानक्युत्पत्तिविवरणं, श्रुतकीर्त्तिमाण्डव्यायुत्पत्तिविवरणं, जानक्या बाल्यलीलादिवर्णनं, सीताविवाहदाने चिन्तायुक्तं जनकं प्रति स्वप्ने महादेवोपदेशः, सीतास्वयम्बरसभानिर्माणादि, तत्सभायां भूपादीनां समागमनं, सीतादर्शनजातभूपति-नानाचेष्टावर्णनञ्च। ५२, धनुर्भङ्गार्थं गतानां भूभुजां वैमुख्यकथनादि, रावणाय सीताप्रदानविषये प्रहस्तस्य जनकेन कथोपकथनञ्च। ५३, सीतावैवाहिकोत्सवे रामस्यानयनार्थं विश्वामित्रमुनेरयोध्यायां गमनादि, रामलक्ष्मणौ नीत्वा विश्वामित्रस्य प्रत्यागमनादि, रामलक्ष्मणरूपलावण्यं दृष्ट्वा विश्वामित्रं प्रति पौरजनप्रश्नादि, ताड़कारूपवर्णनं, रामकर्त्तृकतद्वधादिकथनञ्च। ५४, विश्वामित्रनिकटे जनकदूतागमनादि, रामपादरजःस्पर्शादहल्यामोक्षः, सरामलक्ष्मणेन ऋषिवृन्देन सह विश्वामित्रस्य जनकालयगमनादि, परस्परं कुशलप्रश्नानन्तरं रामलक्ष्मणयो रूपवेशादिवर्णनं, कस्येमौ कुमारावित्यादिजनकप्रश्नस्य विश्वामित्रकर्त्तृकोत्तरदानादि च। ५५, रामादिसमागमे जनकस्य शिष्टाचारवाक्यादि। ५६, भोजनार्थं निमन्त्रितस्य सरामलक्ष्मणमुनिवृन्दस्य विश्वामित्रस्य जनकगृहे गमनं, रामलक्ष्मणवेशभूषादिवर्णनञ्च। ५७, धनुर्भङ्गोत्सववर्णनादि। ५८, दशरथानयनार्थं दूतप्रेरणानन्तरं दशरथस्य जनकालये समज्जमागमनादि। ५९, दशरथानयनार्थं जनकस्य स्वपुरान्निर्गमनम्, उभयसमागमे परस्परं यथाविहितशिष्टाचारकरणादि। ६०, रामलक्ष्मणादिविवाहोत्सववर्णनादि। ६१, सीतासहितरामदर्शनार्थं ब्रह्माण्डादीनामागमनादि, जौतुकदानादि च।

६२, रामलक्ष्मणादिभिः सह दशरथस्य स्वपुर आगमनं। ६३, रामाद्यागमने अयोध्यापुरवासिप्रभृतिकृतमङ्गलोत्सवकथनादि। ६४, इन्द्रप्रेषितनारदस्याप्सरःप्रभृतीनाञ्चायोध्यायामागमनं, रामस्य पुरतो नारदस्याप्सरसश्च नर्त्तनादिकथनञ्च। ६५, पुरस्त्रीणां सीतादर्शनार्थमागमनं, रामसीतारहस्यकथावर्णनञ्च। ६६, जानकीकृतपाकेन वशिष्ठादिद्विजादीनां भोजनं। ६७, रामलक्ष्मणादीनां सपरिवाराणां ससैनिकादीनाञ्च सरय्वां नौकासु गमनादि। ६८, ततो रामस्य सैनिकादिसहितस्य पार्वतीसरोदर्शनार्थगमनादि, रामादीनां वनविहारादिवृत्तान्तकथनं च। ६९, रामनिद्राभङ्गान्तरं वनभ्रमणादि। ७०, रामादीनां गुहेन सह वनविहारादिवृत्तान्तकथनादि। ७१, मनोरमानदीप्रदेशे रामादीनां गमनादि। ७२, रामादीनां बिल्वहरिसमीपे गमनादिवृत्तान्तकथनं। ७३, रामादीनां रमणकवनगमनादिवृत्तान्तकथनं। ७४, ७५, ७६, ७७, ७८, सीतारामयो रहस्यकेलिवृत्तान्तकथनं। ७९, अयोध्यावर्णनादि॥

No. 715. वेदान्तविज्ञाननौका।

Substance, country yellow paper. Folia, 3. Lines, 2—9 on a page. Extent, 25 s'lokas. Character, Bengali. Date. ? Place of deposit, Mánakara, Bardhamána, Bábu Hitalála Mis'ra. Appearance, new. Verse. Generally correct.

Vedánta-vijñána-nauká. The essence of the Vedánta in nine stanzas. By S'aṅkara Áchárya.

Beginning. तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो ह्युपादौ पदे तुच्छबुद्ध्या।
परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि॥ १॥
दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य भक्त्या विचार्य्यस्वरूपं।
यदाप्नोति तत्त्वं निदिध्यास्य विद्वान् परं ब्रह्म नित्यं तदेवाहमस्मि॥ २॥
दयानन्दरूपं प्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेदशून्यं।
अहं ब्रह्मविद्यैकगम्यं तुरीयं परं ब्रह्म नित्यं तदेवाहमस्मि॥ ३॥

End. स्वरूपानुसन्धानरूपां स्तुतिं यः पठेदादरादु भक्तिभावान्मनुष्यः।
शृणोतीह वा नित्यसुयुक्तचित्तो भवेदु विष्णुरत्रैव वेदप्रमाणात्॥ ९॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्कराचार्य्यविरचितं वेदान्तविज्ञाननौकाख्यं प्रकरणं सम्पूर्णम्॥

विषयः। ब्रह्मतत्त्वविषयकाः श्लोका एव॥

No. 716. लघुशब्देन्दुशेखरं ।

Substance, country paper, $9\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia, 475. Lines, 10 on a page. Extent, 11520 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Laghus'abdendu-s'ekhara. A commentary on the *Siddhánta Kaumudí* of Bhaṭṭojí Dikshita. By Náges'a, son of S'iva Bhaṭṭa and Satí Deví. The MS. is incomplete.

Beginning. पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः ।
शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः ॥
याचकानां कल्पतरोररिकक्षज्ञताशनात् ।
शृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥
नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकं ।
मनोरमोमार्द्धदेहं लघुशब्देन्दुशेखरम् ॥

End. खण्डितत्वात् शेषवाक्यं नास्ति ।

विषयः । सिद्धान्तकौमुदीस्थानां सन्ध्यादिकृदन्तपर्यन्तानां प्रकरणानां व्याख्यानं । अत्र प्रायशस्तत्तत्प्रकरणानां व्याख्यानं न सम्पूर्णं, पत्राण्यपि नैकतः क्रमशः संलग्नानि ।

No. 717. पद्यत्रयीव्याख्यानं, सटीकम् ।

Substance, country paper, $12\frac{1}{2} \times 5$ inches. Folia, 38. Lines, 14 on a page. Extent, 1400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Correct.

Padyatrayívyákhyána. A dissertation in verse on the first three stanzas of the *Bhágavata Purána*, designed to establish the divinity of Krishṇa and the preeminence of the Bhakti doctrine. By Sadánanda. Attached to the text is a prose commentary by an unknown author.

Beginning. (टीका०) सकलरसनिवासं सर्वसौन्दर्यसारं मधुरमधुरमूर्त्तिं सर्वदा प्रेमगम्यम् ।
रतिमतिगतिशान्तिश्रीजयाशक्तिसेव्यं व्रजपतिसुतमेकं कृष्णमेव श्रयेहम् ॥
श्रीमद्भागवतायपद्यत्रयीं व्याख्यातुकामो मङ्गलमाचरति ।

(मू०) नत्वा श्रीमाधवं भक्त्या सुखबोधाय सद्गुणाम्।
श्रीमद्भागवते पद्यत्रयव्याख्यां करोम्यहम्॥

End. (टीका०) पुमर्थ इति तत्प्रवृत्तिक्षये न पृथक् यतितव्यमिति अभिप्रायः।
कृतं पद्यत्रयव्याख्यानं भगवति समर्पयति श्रीमदिति त्रिभिः।
इति श्रीमन्मुकुन्दपदारविन्दरसाभिलाषिसदानन्दविरचितं पद्यत्रयीव्याख्यानं समाप्तिमगमत्।

(मू०) श्रीमद्भागवतं पुराणमतुलं तस्याद्यपद्यत्रयं
सारांशो निखिलोऽत्र सूचित इतः काण्डत्रये सम्मतः।
व्याख्यातं तत एतदेव विमलैः पद्यैरुदारक्षणै-

Colophon. रेतेनैव हरिः कृपानिधिरसौ प्रीणातु सद्भक्तिदः॥ ४५॥

विषयः। जन्माद्यस्येत्यादीनां भागवताद्यपद्यत्रयाणां पद्यैर्व्याख्यानम्।

No. 718 आत्मषट्कभाष्यटीका, वा ऐतरेयभाष्यटीका।

Substance, country paper, 10 × 4½ inches. Folia, 57. Lines, 11 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Correct.

Átmashaṭka-bháshya Ṭiká. A gloss on S'aṅkara's commentary on the Aitareya Upanishad. By Abhinava-naráyanendra.

Beginning. ॐ आत्मा वा इदमित्यादिना केवलात्मविचारस्यावसरं वक्तुं इत्तं कीर्तयति।
परिसमाप्तमिति। इत्यादि।

End. अवतु वक्तारमित्यभ्यासोऽध्यायपरिसमाप्त्यर्थो द्वितीयारण्यकपरिसमाप्त्यर्थश्च।
हरिः ॐ।

Colophon. इति श्रीमदभिनवनारायणेन्द्रविरचितात्मषट्कभाष्यटीका समाप्ता।

विषयः। ऐतरेयभाष्यतत्तत्स्थलार्थविवरणम्॥

No. 719. तन्त्ररत्नम्।

Substance, country paper, 10½ × 4½ inches. Folia, 622. Lines, 11 on a page. Extent, 18,650 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tantra-ratna alias *Ṭup Ṭíká.* A commentary on the Mímáńsá Sútras of Jaimini. By Pártha sárathi Mis'ra. The MS. is imperfect, and contains only Chapters IV, V, VI, VII, IX and X of the work. This work, in common with four others, bears the generic name of *Vártika.* Hall's *Contributions*, 170-180.

Beginning. (चतुर्थाध्यायस्य प्रथमपत्रं नास्ति, द्वितीयपत्रस्यादौ लिखितं, यथा—)
र्थ इति वेदितव्यं। पदाङ्के इत्येवमादिष्वप्येवं योज्यमित्यादि।

End. (दशमाध्यायस्य शेषवाक्यं, यथा—)
श्रुतेः यस्त्वसौ कालः सौगमेतस्य कर्मणः।
स च तत्रापि नापेतो यत्राग्नेयोऽस्ति केवलः॥
तस्मात् तत्राप्यवैगुण्याद्बाधो नोपांशुकर्मणः॥

Colophon. इति श्रीपार्थसारथिमिश्रविरचिते तन्त्ररत्ने दशमाध्यायस्याष्टमः पादः।
समाप्तो दशमः।

विषयः। जैमिनीयमीमांसासूत्रार्थविवरणं। मूलसूत्रग्रन्थे १२ अध्यायाः सन्ति। तत्र प्रत्यध्यायविषयस्तु न्यायमाला १५ सूचीपत्रे उक्तः। अस्य तन्त्ररत्नस्य ४, ५, ६, ७, ९, १० एते अध्यायाः वर्त्तन्ते, अन्ये १, २, ३, ८, ११, १२ एते अध्याया न सन्ति। (अतः खण्डितं)।

No. 720. शारीरकन्यायरत्नामणिः।

Substance, country paper, 10 × 5 inches. Folia, 132. Lines, 12—13 on a page. Extent, 2500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'áríraka-nyáya-rakshámaṇi. A gloss on the commentary of S'aṅkara Áchárya, on the Vedánta aphorisms of Vyása. By Apya Dikshita. The MS. is incomplete, containing only the second and the fourth chapters. Hall's *Contributions*, p. 90.

Beginning. (चतुष्पादावच्छिन्नोऽयं ग्रन्थः, तत्रास्माभिरस्य द्वितीय-चतुर्थपादौ प्राप्तौ, तत्र द्वितीयस्याद्यन्तवाक्यानि,) प्रथमे पादे स्पष्टं ब्रह्मलिङ्गानि वाक्यानि निर्णीतानि, अथास्य ब्रह्मलिङ्गानि वाक्यानि निर्णेतुं पादान्तरारम्भः। इदञ्च तत्र तत्र स्फुटीकरिष्यते इत्यादि।

(चतुर्थस्यादिवाक्यादि०)। आनुमानिकमथैकेषामिति चेन्न शरीररूपविन्यस्त-गृहीतेर्दर्शयति च, इत्यादि।

End. आदेशमात्रत्वाश्रवणेनोपासकमूर्धादिषूपसंहृतत्वप्रतीतेर्वेदिवर्हिगार्हपत्यादिकल्प-नप्रतिनिरूढत्वाच्चास्यष्टता।

Colophon. इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभ-श्रीमदद्वैतविद्याचार्य-श्रीविश्वजिच्छ्रीरङ्ग-राजाध्वरिवरसूनो रप्पिदीक्षितस्य कृतौ शारीरकन्यायरत्नामणौ प्रथमाध्यायस्य द्वितीयः पादः।

तस्मात्सिद्धं ब्रह्मजगतो निमित्तमुपादानञ्चेति युक्तं ब्रह्मण उपलक्षणम्।

इति न्यायरत्नामणौ चतुर्थः पादः।

विषयः। द्वितीये ब्रह्मणो जत्कारणत्वं तदाश्रितं सर्वज्ञत्वं सर्वात्मत्वं व्यापित्वं नित्यत्व-मित्येवमादिधर्म्मात्मकानां स्पष्टब्रह्मलिङ्गवाक्यानां निर्णयः।

चतुर्थे, ब्रह्मप्राधान्यत्वप्रतिपादकवेदान्तवाक्योत्पन्नशङ्कानिरासपूर्वकप्रसाधितस-मन्वयदृढीकरणम्।

No. 721. कठवल्लीभाष्यविवरणं।

Substance, country paper, 11 × 4¾ inches. Folia, 34. Lines, 16 on a page. Extent, 1500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Correct.

Kaṭhavallíbháshya-vivaraṇa. A gloss on the commentary of S'aṅkara Áchárya, on the Kaṭha Upanishad. By Gopála Yogí.

Beginning. ब्रह्माद्वयं परानन्दं धर्म्मादीनामगोचरं।

कार्यकारणनिर्मुक्तं शिवं परमुपास्महे॥

नत्वा देवमुमाजानिं स्मृत्वा गुरुपदाम्बुजम्।

ध्यात्वा गौरीमहं कुर्वे कठभाष्यविवेचनम्॥

End. ॐ शब्दो मङ्गलप्रयोजनः कृत्स्नोपनिषदर्थस्मारकः। इतिशब्दो भाष्यसमाप्ति-द्योतनप्रयोजन इति बोध्यम्।

कठवल्लीभाष्यटीका कृता गोपालयोगिना।

अनया प्रीयतां देवो दक्षिणाशामुखः शिवः॥

Colophon. इति कठवल्लीभाष्यविवरणेऽन्तिमा वल्ली समाप्ता।

विषयः। षट्कठवल्लीभाष्यतत्तत्स्थलविशेषार्थव्याख्यानम्।

No. 722. सुकृत्यप्रकाशः ।

Substance, country paper, 11 × 4¾ inches. Folia, 48. Lines, 11 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Sukritya-prakás'a alias *Kritya-prakás'a*. A Smṛiti compilation. By Jválánátha Mis'ra. Contents : I *Achára*, or the daily duties of washing the face, bathing, morning, noon and evening prayers, charity, sacrifices. II. *As'aucha*, or impurities resulting from death, birth, &c., among different castes and orders. III. *Sráddha*, or offerings to the manes. IV. *Asatpratigraha*, or receipt of gifts from persons not religiously qualified to make them. The work in its complete form probably includes several other chapters.

Beginning. वन्देऽहं पदपङ्कजं रमभरं नित्यं विभुं श्रीप्रदं
विघ्नध्वंसपटीयसस्तव विभो देवाग्रपूजाग्रहम् ।
जुष्टं विद्वदुपासकैः प्रतिदिनं मुक्तिक्रमान्वेषिभि-
स्तुष्टश्चेत्सकलं मनोभिलषितं पूर्णं फलं दास्यति ॥ इत्यादि ।

End. स्वप्ने केवलज्योतिषं स्वपिति हि स्वं यान्ति जातं मता
तस्मै सर्वसुसाक्षिणे नम इति कुर्वे सुकृत्यार्पणम् ।

Colophon. इति ज्वालानाथमिश्रकृतधर्म्मशास्त्रे सुकृत्यप्रकाशे असत्प्रतिग्रहप्रकरणम् ।

विषयः । १, आचारप्रकरणे आचारनिर्णयः, ततप्रसंशा । दन्तधावन-स्नानसन्ध्यादि-तर्पण-बलिकर्मातिथिपूजाभोजन-दारागमनादिव्यवस्था च । २, अशौचप्रकरण, सार्ववर्णिकमृताशौचनिर्णयः । ३, श्राद्धप्रकरणे, नानाविधश्राद्धलक्षणविधि-नियमादिकथनं । ४, असत्प्रतिग्रहप्रकरणे, स्तृतकमृतकग्रहणादौ प्रतिग्रह-निषेधः ।

No. 723. लक्ष्मीनिवासाभिधानं ।

Substance, country paper, 10¾ × 4¼ inches. Folia, 26. Lines, 8 on a page. Extent, 650 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Correct.

Lakshminivásábhidhána. A Sanskrit vocabulary, in verse, of words formed with the Unádi affixes. By Sivaráma, son of Kṛishṇaráma, and grandson of Trilokachandra. The first seven folia of the MS. are wanting.

Beginning. (प्रथमतः सप्तपत्राणि न सन्ति) ।

End. काव्यानि पञ्च नुतयो युगसम्मिताश्च टीकास्त्रयोदश तथेष उणादिकोषः ।
भूपालभूषणमयो रसरत्नहारो विद्याविलास इनपूर्वफलाक्षिरब्दे ॥ ३१ ॥
ग्रन्थान्मया विरचितान् परिशीलयन्तु शीलान्विताः सुमनसो मनसो मुदे मे ।
यद्वक्षिशाधितमनल्परुचा समेतं जाम्बूनदं भवति मूल्यविशेषलभ्यं ॥ ३२ ॥
परिश्रमो व्याकरणे काव्यादावपि यः कृतः ।
दिग्यं दर्शिता तस्य शिवरामेण सन्मुदे ॥ ३३ ॥
लक्ष्मोःकीर्त्तीरिमा मध्ये (?) शिवरामप्रसादतः ।
कुरुतां वसतिं शक्रतुल्यभूपालपालिते ॥ ३४ ॥
शिवरामकृतौ कोष उणादन्तैकसङ्ग्रहः ।
लक्ष्मोनिवासे सम्पूर्णः पादोऽयं पञ्चमोभवत् ॥

Colophon. इति श्रीमत्त्रिपाद्युपनामकविलोकचन्द्रात्मजकृष्णरामकृतौ लक्ष्मोनिवासाभिधाने उणादिप्रत्ययान्तशब्दकोषे पञ्चमः पादः ।

विषयः । उणादिप्रत्ययान्तशब्दानां पञ्चभिः पादैर्नामलिङ्गाद्यनुशासनम् ।

No. 724. माधवानलकथा ।

Substance, country paper, $7\frac{3}{4} \times 3\frac{1}{2}$ inches. Folia, 20. Lines, 8—9 on a page. Extent, 323 s'lokas. Character, Nágara. Date, S. 1587. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Mádhavánala-kathá. The amours of Madhávánala, and Kámakandalá, a tale. The lovers are said to have resided at Pushpavati, in the neighbourhood of the palace of King Govinda Chandra. Fol. 3rd, 4th, 7th and 12th wanting.

Beginning. प्रणम्य परया भक्त्या हंसयानां सरस्वतीम् ।
तस्याः प्रसादमासाद्य करिष्यामि कथामिमाम् ॥

End. राजा सहर्षो जातः । उक्तञ्च ।
विजेतव्या लङ्का चरणतरणीयो जलनिधिर्विपक्षः
पौलस्त्यो रणभुवि सहायाश्च कपयः ॥
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रिया सिद्धिः सत्त्वे वसति महतां नोपकरणे ॥
ततो राजा माधवानलश्च कामकन्दला जाता ॥ ७ ॥

Colophon. इति माधवानलकथा समाप्ता ।

विषयः । पुष्पावतीनगरीश्वरस्य गोविन्दचन्द्रस्य राज्ञो गृहवर्त्तिनो माधवानलस्य ब्राह्मण-वटोः कामकन्दलावेश्यायाश्च वृत्तान्तविशेषकथनं । अत्र तृतीय-चतुर्थ-सप्तम-द्वादशपत्राणि न सन्ति । अतः खण्डितम् ।

No. 725 मुण्डकभाष्यटिप्पणं ।

Substance, country paper, 10 × 4½ inches. Folia, 11. Lines, 13 on a page. Extent, 400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Muṇḍaka-bháshya-ṭippaṇa. A gloss on S'aṅkara's commentary on the Muṇḍaka Upanishad. Anonymous.

Beginning. यदक्षरं परं ब्रह्म विद्यागम्यमितीरितं ।

यस्मिन् ज्ञाते भवेज् ज्ञातं सर्वं तत्स्याममंशयम् ॥

ब्रह्मोपनिषद्गर्भोपनिषदाद्या अथर्वणवेदस्य बह्व्य उपनिषदः सन्ति । तासां शारीरके अनुपयोगित्वेनाव्याचिख्यासितत्वादृश्यत्वादिगुणको धर्मोक्तेरित्याद्य-धिकरणोपयोगितया मुण्डकस्य व्याचिख्यासितस्य प्रतीकमादत्ते, ब्रह्मा देवानां इत्यादि ।

End. ग्रन्थद्वारेण विद्यायाः प्रकृतत्वसम्भवात् न सर्वत्र ब्रह्मविद्याप्रदानमिति सूचय-न्नाह, एतां ब्रह्मविद्यां वदेतेति ।

Colophon. इति मुण्डकभाष्यटिप्पणं ।

विषयः । मुण्डकभाष्यतत्तत्स्थलविशेषार्थविवरणं ।

No. 726. श्यामापूजापद्धतिः ।

Substance, country paper, 9½ × 3¼ inches. Folia, 19. Lines, 6 on a page. Extent, 250 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'yámápújá Paddhati. A manual for the worship of Dakshiṇákálí. Anonymous.

Beginning. अथ श्यामापूजापद्धतिः। पादौ प्रक्षाल्याचम्य मन्त्राचमनं कुर्यात्। तद्यथा, क्रौमिति त्रिर्जलं पीत्वा, इत्यादि।

End. ततो मूलमन्त्रेण पूर्णाहुतिं दत्वा संहारमुद्रया स्वेष्टदेवतां हृदये समानीय क्षमस्वेति विसृज्य दक्षिणां दत्वाच्छिद्रावधारणं कुर्यात्।

Colophon. इति सङ्क्षेपहोमपद्धतिः॥

विषयः। दक्षिणकालिकापूजनाद्यङ्गीभूतविधिकथनं।

No. 727. न्यायसारः।

Substance, country paper, 10 × 3½ inches. Folia, 18. Lines, 9 on a page. Extent, 370 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Nyáya-sára. An elementary treatise on the Nyáya. By Bhásarvajña. Dr. Hall notices a commentary on this work by Bhaṭṭa Rághava, *Contributions*, 26.

Beginning. प्रणम्य शम्भुं जगतः पतिं परं समस्ततत्त्वार्थविदं स्वभावतः।
शिष्यप्रबोधाय मयाभिधास्यते प्रमाणतद्भेदतदन्यलक्षणम्।
सम्यगनुभवसाधनं प्रमाणम्। इत्यादि।

End. तत्सिद्धमेतत्। नित्यसंवेद्यसुखं न विशेषः। आत्यन्तिको दुःखनिवृत्तिः पुरुषस्य मोक्ष इति।

Colophon. इति श्रीभासर्वज्ञविरचिते न्यायसारे तृतीयः परिच्छेदः। समाप्तोयं न्यायसारः॥

विषयः। प्रमाणप्रमेयानुमानजात्यादिकतिपयपदार्थानां नैयायिकनयेन सङ्क्षिप्तलक्षणकथनं।

No. 728. नारायणप्रबोधोत्सवः वा प्रबोधोत्सवः।

Substance, country paper, 9½ × 4¼ inches. Folia, 8. Lines, 10 on a page. Extent, 200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Náráyaṇa-prabodhotsava. Rules for the celebration of a feast on the 12th of the waxing moon in the month of Kártika, that is on the day after the close of the *Cháturmásyá* fast, which commences on the 11th of the waxing moon in the month of Ásháḍha, and lasts for four months, terminating on the 11th of the waxing moon in Kártika. The first day is called *S'ayana ekádas'í* or the day on which Vishṇu, according to the Puráṇas, falls asleep, and the last, *Utthána ekádas'í* or the day of his waking. This is evidently a Hindu adaptation of the Buddhist *Vassá*, which lasted for four months of the rainy season, during which the monks were permitted to reside in hermitages and cells, and to abstain from peregrination and begging. There is every reason to believe that the Buddhists copied it from the Vedic ceremony of *Cháturmásya*, which lasted for four months, but not always during the rains. The most prominent features of the fast as now observed are continence, abstinence from certain rich articles of food, bedding, shaving and other luxuries, eating on the bare earth, and other privations; each devotee fixing his own course of observances. The feast which the MS. describes, is intended to mark the termination of the fast by rejoicing, like the *Rámzán* of the Muhammadans, or the last day of the Lent among Roman Catholic Christians. Annexed to the work is a ritual for the celebration of the marriage of Náráyaṇa with the Tulasí plant on the day preceding the feast. Anonymous.

Beginning. अथ कार्त्तिकशुक्लद्वादश्यां पारणाविचारस्तथा प्रबोधोत्सवश्च विचार्यते ।
कार्त्तिकशुक्लद्वादश्यां रेवतीयोगरहितायां पारणं कार्यम् ।

End. चातुर्मास्यव्रतसमाप्तिरप्यत्रैवेति केचित् । कार्त्तिकमासव्रतोद्यापनं चातुर्मास्यव्रतोद्यापनं च चतुर्दश्यां पूर्णिमायां वेत्यपरे ।

Colophon. इति श्रीनारायणप्रबोधोत्सवो व्रतनिवेदनं सङ्क्षेपतस्तुलसीविवाहप्रयोगश्च समाप्तः ।

विषयः । हरिप्रबोधनाङ्गीभूतकर्त्तव्यानुष्ठानकथनादि, तुलसीविवाहप्रयोगकथनं च ।

No. 729. व्रतोद्यापनविधिः, शालग्रामदानविधिः ।

Substance, country paper, 11 × 5 inches. Folia, 45. Lines, 11 on a page. Extent, 1125 s'lokas. Character, Nágara. Date, S. 1890, SK. 1755. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Vratodyápanavidhi. Rituals to be observed on the last or concluding day of certain prescribed penances, as also what are to be gone through on the occasion of giving away an ammonite stone (*s'álagráma*).

Beginning. अथ सङ्क्षेपतो व्रतार्कोक्तानि व्रतोद्यापनानि प्रयोगरीत्या उच्यन्ते। तत्रादौ सर्वतोभद्रकारिका।

End. (खण्डितत्वात्परिसमाप्तिवाक्यादिकं नास्ति)।

विषयः। सर्वतोभद्रादिचक्रनिर्माणविधिः। सङ्कटचतुर्थीनागपञ्चमीजन्माष्टम्यादिविविध-व्रतोद्यापनविधिः। शालग्रामदानविधिश्च। (इतःपरं खण्डितं)।

No. 730. आचारमयूखः।

Substance, country paper, 11 × 4¾ inches. Folia, 80. Lines, 9 on a page. Extent, 1800 s'lokas. Character, Nágara. Date, S. K. 1729. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

A'cháramayúkha. A compendium of diurnal religious duties which should be observed by all strict Hindus. By Nílakaṇṭha Bhaṭṭa, son of S'aṅkara Bhaṭṭa. The author has treated of the whole circle of the Smṛiti, in separate compendia under the generic title of *Mayúkha* or the Mirror, and this is one of them.

Beginning. पादौ दिवाकरस्याहमवलम्बे मुहुर्मुहुः।
यत्पादालम्भितं पद्मं पद्मारोहति सम्प्रति॥
श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं तत्तन्निबन्धानपि सन्निबन्धान्।
चिरन्तनाचारचयं च बध्नात्यथाङ्किकं सम्प्रति नीलकण्ठः॥

End. अनेन विधिना यस्तु शान्तिं कुर्वीत शक्तितः।
तस्य वर्षशतायुष्यं भवत्येव न संशयः॥ १४॥

Colophon. इति श्रीमीमांसापारावारपरीणधुरीणभट्टशङ्करसूनोर्भट्टनीलकण्ठस्य कृता आचारमयूखः समाप्तः।

विषयः। शयनादुत्थाय प्रातःस्मरणदन्तधावनमलमूत्रत्यागस्नानसन्ध्यातर्पणपूजनबलिवैश्व-देवादिदैनन्दिनाचारानुष्ठानव्यवस्थाकथनं।

No. 731. विश्वकर्मीयशिल्पं ।

Substance, English paper, $9\frac{3}{4} \times 7\frac{1}{2}$ inches: a 4to. volume. Folia, 63. Lines, 20 on a page. Extent, 1224 s'lokas. Character, Nágara. Date, 1872. A. D. Place of deposit, Calcutta, Bábu Rájendralála Mitra. Appearance, new. Verse. Incorrect, and corrupt.

Vis'vakarmíya S'ilpa. A treatise on the manual arts attributed to Vis'vakarmá, the divine architect; but apparently a compilation. as it is written in the Tántric style, having S'iva for its narrator. The MS. has been copied for me from an old Codex in the Library of the Rájá of Tanjore. There are in it many lacunæ and several Tamil words which, I understand from Mr. Burnell, through whose kind aid I have got the copy, have crept in, owing to the circumstance of the original, in the Halakánáḍá character, having short notes interspersed in the Tamil language. This peculiarity characterises almost all the S'ilpa MSS. in the Tanjore Library. None of the MSS. examined by Mr. Burnell is perfect, or even tolerably correct. Contents: I. Origin of Vis'vakarma; derivation of the words *Takshaka* (carpenter) *vardhaki* (sculptor) &c. II. Height of man in different ages of the world; wood and stone for the formation of images. III. Sacraments for sculptors and carpenters. IV. Halls for the consecration of S'iva and other gods. V. Proportions of images of the planets and lingams. VI. Formation of cars. VII. Consecration of cars. VIII. Forms of Bráhmi, Mahes'vari and other goddesses. IX. Sacrificial or Brahmanical thread. X. Sacrificial threads of gold, silver, and munja fibre; the different sides where images of gods and goddesses are to be placed; qualities of a kind of stone called *Hemas'ilá* or "golden stone" to be found to the south of the Meru mountain. XI. Images of Indra, Máhes'vari, and other gods and goddesses. XII.—XIII. Crowns, crests and other head ornaments. XIV. Movable and fixed thrones for images; crests and other ornaments for the head; repairs of temples. XV. Proportions of doors of temples for lingams. XVI. Proportion, of doors for other temples. XVII. Temples for Vighnes'a. Most of these chapters appear imperfect and fragmentary, and the work is obviously incomplete.

Beginning. कैलासशिखरे रम्ये नानारत्नसमाकुले ।
नानाद्रुमसमाकीर्णे नानावृक्षसमाकुल ॥

नानाप्सरोभिरुषिते नानासुरगणाद्दत ।
नानारक्षोभिराकीर्णे नानागन्धर्वसेविते ॥
नानामुनिगणाकीर्णे नानापुष्पसमाकुले ।
किन्नरैर्नारदेनापि सुत्ये तुम्बुरुभिः सह ॥
दिव्याङ्गनासमागीते सर्वदा देवसन्निधौ ।
आकाशगङ्गासलिलैः शीतलैरुपशोभिते ॥
श्रुतिस्मृतिपुराणाद्यैरितिहासैः सुविश्वलैः (?) ।
स्तूयमानैस्तु ऋषिभिः सनन्दसनकादिभिः ॥
+सयवसप्तद्वीपा च समुद्राश्च विनीयते (?) ।
एतयान्तु समाकर्त्तुं समर्थस्तन्मनाः शिशवः (?) ॥
इत्युक्तो देवदेवेशो भुवनाधिपतिः शिवः ।
समीक्ष्य विश्वकर्माणं तस्य मे सृजतीश्वरः (?) ॥ इत्यादि ।

End. द्वारस्तम्भस्य दीर्घेण दशनवाष्टभागतः ।
एवं भागशिरोत्सेधं द्वारस्तम्भस्य योजयेत् ॥

Colophon. शिवमयं शिल्पग्रन्थः सम्पूर्णः ॥

विषयः । १, अध्याये विश्वकर्मोत्पत्तिः, कर्मविशेषभेदेन व्यवहृततक्षकवर्द्धक्यादिशब्दव्युत्पत्तिश्च । २, सत्यादियुगजातनरोचितप्रमाणं, यज्ञीयकाष्ठेन प्रस्तरेण, वा देवप्रतिमानिर्माणे मानादि । ३, तक्षकस्य गर्भाधानादि संस्कारकथनं, गर्भोत्पत्तिकथनादि च । ४, शिवलिङ्गादिप्रतिष्ठार्थं सभानिर्माणादि । ५, ग्रहप्रतिमानिर्माणप्रमाणं, लिङ्गपीठनिर्माणप्रमाणादि च । ६, रथनिर्माणविधेः कथनं । ७, रथप्रतिष्ठाविधिः । ८, ब्राह्मीमाहेश्वर्यादीनां स्वरूपादिवर्णनादि । ९, यज्ञोपवीतलक्षणं । १०, सुवर्णरजतमौञ्ज्यादिनिर्मितयज्ञोपवीतकथनं, दिग्भेदेन देवस्थापनप्रकारादि, मेरुदक्षिणस्थितहेमशिलाकथनादि च । ११, लक्ष्मीब्राह्मीमाहेश्वर्यादिदेवीन्द्रादिदिक्पालग्रहादिमूर्त्तिनिर्माणप्रकारः । १२, १३, मुकुटकिरीटजटामुकुटादिनिर्माणप्रकारादि । १४, स्थावरास्थावरसिंहासननिर्माणप्रकारादि । पुनर्विशेषेण किरीटललाटपट्टिकादिनिर्माणप्रकारः । देवताया मन्दिरस्य च जीर्णोद्धारप्रकारः । १५, लिङ्गमूर्त्तिमन्दिरद्वारादिकथनं । १६, प्रतिमामूर्त्तिमन्दिरद्वारादिकथनं । १७, विघ्नेशमूर्त्तिमन्दिरादिनिर्माणादिविधिः ।

No. 732. सामयाचारिकसूत्रं ।

Substance, country paper, 11 × 4¾ inches. Folia, 24. Lines, 11—12 on a page. Extent, 840 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Correct.

Sámayácháriká Sútra. This is a fragment of the S'rauta Sútra of Ápastamba of which it forms, according to Mr. Burnell, chapters XXVI and XXVII. It treats of *Upanayana*, or the investiture of the sacrificial thread; *Brahmacharya*, or the study of the Vedas by a tutor, including the duties of the teacher and the taught; proper and improper food; the domestic duties of the four orders; and funeral. An excellent edition of this work has been published by Professor Buhler of Bombay.

Beginning. अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः ॥ १ ॥ धर्मज्ञसमयः प्रमाणम् । वेदाश्चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः । इत्यादि ।

End. पाणिग्रहणादार्याजात्यायेन भिक्षणे सवर्णा सह विलयन (?) चत्वारो व्याख्याताः । चेत्रमेकादश ।

Colophon. इति द्वितीयः प्रश्नः ।

विषयः । १, पटले वर्णाश्रमधर्मः । उपनयनं । उपनीतधर्माः । उपनयनकालः । काल अनुपनीते प्रायश्चित्तादि । आचार्यकुलवासकालनिर्द्धारणं । त्रैवर्णिकब्रह्मचर्यविधिः । त्रैवर्णिकभैक्ष्यचर्याः । भोजनविधिः । समिदाद्याहरणादि । २, तपःकरणाकरणफलादि । त्रैवर्णिकाभिवादनं । अध्ययननियमादि । गुरुस्थापनविधिः । स्वशयनविधिः । आचार्योपासना । ब्रह्मचारिनियमाः । गुरुदक्षिणादि । आत्मप्रशंसावर्जनादि । आचरणनियमादि । शिष्यं प्रत्याचार्यकर्त्तव्यता । ३, उपाकर्मकृत्यम् । अनध्यायः । वपनादि । पुनरनध्यायादि । ४, स्वाध्यायनियमादि । महायज्ञब्रह्मयज्ञकर्त्तव्यादि । मातृपित्रादिगुरुजनशुश्रूषादि । भूतबलिप्रभृति । अभिवादनयोग्यादि । कुशलप्रश्नादि । ५, कर्मविशेषेषु उपवीतिभवनं । आचमननियमादि । भोजनपात्रनिर्द्देशः । भोज्यान्नशाकादि । मद्यपाननिषेधः । पेयापेयक्षीरादि । करञ्जपलाण्ड्याद्यभक्ष्यमूलादि । भक्ष्याभक्ष्यपशुपमत्स्यादि । ६, भोज्याभोज्यान्नादिकथनं । ७, धर्माधर्मविचारः, अशुचिकरपदार्थादि । ८, आध्यात्मिकयोगानुष्ठानादि । ९, क्षत्रियादिहननप्रायश्चित्तकथनादि । १०, पतितापतितादिकथनं । ११, मूत्रपुरीषादिविधिः ।

(इति प्रथमप्रश्नस्य)। द्वितीयप्रथमपटले गृहमेधिव्रतायुक्तिः। २, बलिवैश्व-देवादिकर्मकथनं। ३, अतिथिपूजनादिकथनं। ४, मधुपर्कादिकथनादि। ५, त्रैवर्णिककर्त्तव्याध्ययनाध्यापनादिकर्मोपदेशादि। ६, दायार्हपुत्रादिकथनं। ७, पिष्टमेधादि। ८, नित्यश्राद्धभोजननियमादि। ९, चतुराश्रमादिकीर्त्तनादि। १०, ११, राज्ञो विशेषधर्मकथनादि। (इति द्वितीयप्रश्नः)।

No. 733. शारदातिलकं।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 134. Lines, 14 on a page. Extent, 3100 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Bábu Rájendralála Mitra. Appearance, old. Verse. Generally correct.

S'áradátilaka. A Tántric compilation of great repute in Bengal. By Lakshmaṇa Des'ikendra, son of S'ríkṛishṇa, and grandson of Vijaya Áchárya, of the Várendra clan. The work comprises 25 chapters. Contents: 1. Víjamantras of different divinities; 2, different divinities and their appropriate S'aktís; 3, 4, initiation in mystic mantras; 5, eighteen appropriate Sañskáras or sacraments for neophytes; 6, caste; 7, 42 letters of the alphabet; 8, worship with mystic mantras; 9, mantra and adoration of Jagaddhátrí; 10, do. of Tvaritá Deví; 11, do. of Durgá; 12, do. of Tripurá; 13, do. of Gaṇes'a; 14, do. of Chandramá; 15, do. of Vishṇu; 16, do. of Nṛisiñha; 17, do. of Purushottama; 18, do. of Mahes'a; 19, mystic mantra for the attainment of every desirable object; 20, do. of Aghora; 21, Gáyatrí as a mystic mantra, and the mode of adoring with it; 22, mystic mantra of Atidurgá; 23, do. of Traiyambaka; 24, mystic diagrams; 25, various forms of Yoga meditation.

Beginning. नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमा-
द्व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत्।
शब्दब्रह्म यदूचिरे सुकृतिनस्येतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः॥
अन्तस्मितोल्लसितमिन्दुकलावतंसमिन्दीवरोदरसहोदरनेत्रशोभि।
हेतुस्त्रिलोकविभवस्य नवेन्दुमौलेरन्तः परं दिशतु मङ्गलमादराद्वः॥
संसारसिन्धोस्तरणैकहेतून् वन्दे गुरून् मूर्द्ध्नि शिवस्वरूपान्।
रजांसि येषां पदपङ्कजानां तीर्थाभिषेकश्रियनावहन्ति॥

सारं वक्ष्यामि तन्त्राणां शारदातिलकं शुभम्।
धर्मार्थकाममोक्षाणां प्राप्तेः प्रथमकारणम्॥

End. महाबलाय प्रणतोस्मि तस्मै संविल्लतालिङ्गनशीतलाय।
येनार्पितं मुक्तिफलं विपक्वमाम्नायशाखाभिरुपाश्रितेभ्यः॥
तस्माद्भदखिलदेशिकवारणेन्द्रः षट्कर्म्मसागरविहारविनोदशीलः।
यस्य त्रिलोकवितनं विजयाभिधानमाचार्यपण्डित इति प्रथयन्ति सन्तः॥
तन्नन्दनो देशिकदेशिकोऽभूच्छ्रीलक्ष्मण इत्यभ्युदितप्रभावः।
यत्पादकारुण्यसुधाभिषेकाल्लक्ष्मीं परामश्नुवते कृतार्थाः॥
आचार्यविद्याविभवस्य तस्य जातः प्रभोर्लक्ष्मणदेशिकेन्द्रः।
विद्यास्वशेषासु कलासु सर्वास्वपि प्रथां यो महतीं प्रपेदे॥
आदाय सारमखिलं निखिलागमेभ्यः श्रीशारदातिलकनाम चकार तन्त्रं।
प्राज्ञः स एष पटलैरिह तन्त्र (२५) सङ्ख्यैः प्रीतिप्रदानविधये विदुषां चिराय॥
अनाद्यन्ता शम्भोर्वपुषि कलितार्द्धेन वपुषा
जगद्रूपं शश्वत् सृजति महनीयामपि गिरम्।
सदर्था शब्दार्थस्तनभरनता शङ्करवधू-
र्भवद्भूत्यै भूयाद्भवजनितदुःखौघशमनी।

Colophon. इति श्रीशारदातिलके पञ्चविंशतितमः पटलः।

विषयः। १ पटले देवदेवीनां पृथङ्मन्त्राचरसङ्ख्यानिर्देशादि। २, देवतच्छक्तीनां नाम्नां मन्त्राणाञ्च कथनादि। ३, दीक्षाङ्गकर्म्मकथनादि। ४, दीक्षाकरणप्रकारादि। ५, साधकस्याष्टादशसंस्कारकथनादि। ६, वर्णतन्त्रादिकथनादि। ७, द्विचत्वारिंशदक्षरकभूतलिपिकथनादि। ८, श्रीमन्त्रतज्जपध्यानपूजनादिकथनादि। ९, जगद्धात्रीमन्त्रतज्जपध्यानपूजनादिकथनादि। १०, त्वरितादेवीमन्त्रतज्जप॰कथनादि। ११, दुर्गामन्त्रतज्जप॰कथनादि। १२, त्रिपुरामन्त्रतज्जप॰कथनादि। १३, गणपतिमन्त्रतज्जप॰कथनादि। १४, चन्द्रमोमन्त्रतज्जप॰कथनादि। १५, विष्णुमहामन्त्रतज्जप॰कथनादि। १६, नृसिंहमन्त्रतज्जप॰कथनादि। १७, श्रीपुरुषोत्तममन्त्रतज्जप॰कथनादि। १८, महेशमन्त्रतज्जप॰कथनादि। १९, समस्तपुरुषार्थदमन्त्रतज्जप॰कथनादि। २०, अघोरमन्त्रतज्जप॰कथनादि। २१, गायत्रीरूपमन्त्रतज्जप॰कथनादि। २२, अतिदुर्गामन्त्रतज्जप॰कथनादि। २३, त्र्यम्बकमन्त्रतज्जप॰कथनादि। २४, मन्त्रभेदकथनादि। २५, योगसाधनप्रकारादि।

No. 734. श्राद्धचन्द्रिकाप्रकाशः, अनुक्रमणिकासहितः।

Substance, country paper, $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 125. Lines, 9 on a page. Extent, 2233 s'lokas. Character, Nágara. Date, S. 1866, SK. 1731. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse and prose. Correct.

S'ráddha-chandriká-prakás'a. A dissertation on S'ráddhas or offerings of the funeral cake to the manes at stated times, the merit thereof, the persons who should make the offerings, the proper times when they should be made, and general rules for making them. By Divákara Bhaṭṭa, son of Mahádeva, and grandson of Bálakṛishṇa. Appended to the work is a short index by the author's son, Vaidyanátha.

Beginning. जानकीनयनदृग्गोचरं मानिनां नयनयोरगोचरं।
नीलमेघरुचिरच्छविं सदा भावयेन्मनसि राघवं मुदा॥
यत्कीर्त्या धवलीकृतं त्रिभुवनं नाम्ना जगत्पावितं
यन्मूर्त्या विनिवारितं बहुतरं पापं महापापिनाम्।
यद्ग्रन्थैः कठिनं जगाम लघुतां द्वैतं व्रतादिस्थले
तस्याहं शिरसा नमामि चरणौ श्रीनीलकण्ठप्रभोः॥
नत्वा साम्बं तथा तातं जनयित्रीं गुरूनपि।
दिवाकरेण विदुषा तन्यते श्राद्धचन्द्रिका॥
तत्रादौ श्राद्धप्रशंसा हेमाद्रौ कूर्मपुराणे। (इत्यादि)

End. भारद्वाजकुलोदधौ समभवच्छ्रीबाललक्ष्मणाभिधः
सोमो लाञ्छनवर्जितः प्रतिदिनं सन्तोषलक्ष्मिद्वतां।
तत्सूनुः प्रथमो महामणिरिव प्रख्यातकीर्त्तिर्गुणै-
रासीच्छास्त्रवने मृगेन्द्ररचनो नाम्ना महादेवकः॥
तत्पुत्रेण दिवाकरेण विदुषा निष्पादिता चन्द्रिका
त्यक्त्वाहङ्कृतिमुन्नतां सुमनसः सम्पश्यतां हे बुधाः॥
यद्यस्ति स्वयमेतदीयकृतिनो वाच्यः कथं निर्णय-
स्तर्ह्येवं निपुणं विभाव्य हृदये दूष्यं वचो मामकं।
उक्तं नात्र मया स्वयं स्वरचितं यद्रुद्रपादादिभिः
प्रोक्तः श्राद्धविनिर्णये तदखिलं स्पष्टं परं ज्ञप्तये॥
सन्दिष्टं गुरुदत्तमन्त्रकृपया शार्दूलविक्रीडितं
तेन श्रीरविमण्डलान्तरगतो नारायणः प्रीयताम्॥

Colophon. इति श्रीभारद्वाजमहादेवभट्टात्मजदिवाकरविरचिते धर्मशास्त्रसुधानिधौ श्राद्धचन्द्रिकाप्रकाशः समाप्तिमकारि। (इतः परं पत्रचतुष्टयात्मकः पाठ एतद्ग्रन्थानुक्रमणिकाभूतो दिवाकरात्मजवैद्यनाथविरचितोऽस्ति।)

विषयः। पितृद्देशेन कर्त्तव्यस्य श्राद्धकर्मणः प्रशंसालक्षणाधिकारिदेशकालपात्रादीनां निर्णयकथनं।

No. 735. विख्यादपुराणं।

Substance, country paper, 10 × 4¼ inches. Folia, 47. Lines, 9 on a page. Extent, 1100 s'lokas. Character, Nágara. Date, S. 1775. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vikhyáda Purána. I suspect this to be a Tántric compilation. In it Mahádeva, in reply to a query of Kártika, describes the journey of the pious from India to the region of S'iva. The MS. is apparently incomplete, and comprises only 14 chapters.—Contents: 1. Praise of those who desire to follow the great journey *Mahápraslhána;* the terminus of that journey. 2. Proceeding northwards the traveller first sees the Hemavat Liṅga and its temple, and there attains perfect juvenescence. 3. Rivers, hermitages, and mansions to the north thereof. 4—5. Next, a mountain named Aprasáda, and certain villages around it, 6—7. Next, Chandravegá River, and certain temples of Kedára, Nandís'vara, Hemastamba, &c. 8. Next, a mansion containing several forms of Mahádeva. 9. Next, Mandákiní River and the foot of the Kailás'a mountain. 10. The road to the north of it branches into three, leading respectively to the regions of Brahmá, Vishṇu, and S'iva; praise of those three regions. 11. Arrival at the peak of the Kailása mountain. 12 to 14. The sights to be seen there, and the blessings which S'iva bestows on the traveller.

Beginning. कार्त्तिकेय उवाच। अहं पृच्छामि देवेश साधकानां हिताय च।
महापन्येन पश्यन्ति कथं सत्यञ्च मानवाः॥
तस्यार्थं च फलं ब्रूहि सत्यं देव सदाशिव।
गच्छन्ति साधकाः सर्वं स्वयं देहेन शङ्कर॥

End. पश्चिमे च दिशाभागे उदयं शशिभास्करौ।
वह्निवाहिमघायान्ति नैव कल्प च नान्यथा(?)॥

Colophon. इति श्रीविष्ण्वादपुराणे शम्भुस्कन्दसंवादे स्वर्गवासो नाम चतुर्दशः पटलः। (इतः परमेकपत्रात्मकः पाठोऽस्ति। अतः खण्डितमिदमित्यनुमीयते)।

विषयः। साधकस्य शिवलोकगमनस्य पन्थैव महापन्थेत्युच्यते। तत्र मार्गे यानि यानि वस्तूनि दृश्यन्ते तेषां शिवस्कन्दसंवादच्छलेन चतुर्दशपटलेषु प्रपञ्चः। तत्र १, पटले महापन्थगामिसाधकप्रशंसा, महापन्थं गच्छन्ति तत् कुत्र महापन्थोऽस्तीति कार्त्तिकप्रश्नोत्तरञ्च। २, शिवलोकं गन्तुमुत्तरतो गच्छता प्रथमं हेमवल्लिङ्गो यो दृश्यत ततो या पुरी दृश्यते यथा च शरीरकल्पो भवति, इत्यादेर्वर्णनं। ३, ततोऽप्युत्तरं गते यद्यन्नगाश्रमपुरादिदर्शनं भवति, तद्वर्णनादि। ४, ५, ततोऽप्युत्तरं गते अप्रसादनामकमहागिरेः पुरादेर्दर्शनं भवति, तद्वर्णनादि। ६, ७, ततोऽप्युत्तरं गते यच्चन्द्रवेगातटस्थादिव्यर्षिपुरीकेदारनन्दीश्वरहेमसभादिदर्शनं भवति, तद्वर्णनादि। ८, ततोऽप्युत्तरं गते यत् पुरीत्रिनेत्रदशभुजमहादेवादिदर्शनं जायते, तद्वर्णनादि। ९, ततोऽप्युत्तरं गते मन्दाकिनीगङ्गाकैलासपर्वतादि यद् दृश्यते, तद्वर्णनादि। १०, ततोऽप्युत्तरं गते दृष्टस्य मार्गत्रयस्य शिवब्रह्मविष्णुलोकभोगादेश्च वर्णनं। ११, साधकस्य कैलासप्राप्तिः, कैलासवर्णनं, महादेवकर्तृकं साधकाय वरदानमेवमादि। १२, १३, १४, साधकानां यमेन्द्रब्रह्मविष्णुलोकदर्शनादि, तत्तल्लोकवर्णनं च। १४ पटलात्परं सिद्धिदायकमन्त्रकथनं। (ततः पटलसमाप्तिर्नास्तीति खण्डितमेतदित्यनुमीयते)।

No. 736. प्रेमामृतं।

Substance, Palm leaf. Folia, 18. Lines, 2—3 on a page. Extent, 223 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalakhaṇḍa, Vikramapura, Ḍháká, Vaikuṇṭhanátha Chakravartí. Appearance, old. Prose and Verse. Generally correct.

Premámṛita. This is a miscellany in prose and verse, on the early career of Kṛishṇa, and on love for him, or the highest manifestation of faith in the divinity. The work is written in the form of a Chámpu, and is attributed to Chaitanya Deva, the great Vaishṇavite reformer of Nadiyá.

Beginning. यं ब्रह्मा वरुणेन्द्ररुद्रमरुतस्तन्वन्ति दिव्यैः स्तवैः
वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः।

ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिना
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

अपिच। जयति जननिवासो देवकीजन्मवादो
यदुवरपरिषद्भिर्दोर्भिरस्यन्दधर्म्मं।
स्थिरचरवृजिनघ्नः सस्मितश्रीमुखेन
व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥

End. ततस्तत्र विविधमन्मथक्रीड़ामनुभूय द्विजभवनगमनं चक्रे।
राधा सखीजनैः सह भावमादाय मथुरां गतवती ॥ इति दानखण्डः ॥

Colophon. इति चैतन्यदेवविरचितं प्रेमामृतं समाप्तम।

विषयः। गद्येन पद्येन च श्रीकृष्णस्य कतिपयलीलारसभावा वर्णिताः।

No. 737. धातुरहस्यं।

Substance, yellow country paper. Folia, 82. Lines, 6 on a page. Extent, 1322 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalakhaṇḍa, Vikramapura, Ḍháká, Vaikuṇṭhanátha Chakravartí. Appearance, old. Prose. Correct.

Dhúturahasya. An elementary treatise on Sanskrit roots and the class of grammatical affixes called *Krit.* By Rámakánta. The MS. is incomplete, and the work is rare, but of no great importance.

Beginning. नत्वा गुरुपदद्वन्द्वं रामकान्तेन यत्नतः।
बालावबुद्धये धातुरहस्यं सङ्ग्रहीयते ॥
वाच्याभ्यासा दशेहादौ इनन्तासाः पुनश्च ते(?)।
कृदन्ताश्च ततो वाच्यमखिलं चर्करीतकं(?) ॥
वाच्यः कर्त्रादिभेदेन त्यासुत्पत्तिर्विनिर्णयः(?)।
उक्तानुक्तविचारश्च कृतिपठाश्च निर्णयः(?) ॥

End. यथा जाज्वनीति सङ्ग्रहे न जा घटो(?)।

Colophon. इत्यतः खण्डितम्।

विषयः। कृदादिप्रत्ययविवरणं।

No. 738. गुप्तसाधनतन्त्रं ।

Substance, yellow country paper. Folia, 21. Lines, 6—7 on a page. Extent, 484 s'lokas. Date ? Place of deposit, Maṇḍalakhaṇḍa, Vikramapura, Ḍháká, Kálíkumára Bhaṭṭáchárya. Appearance, old. Verse. Generally correct.

Guptasádhana Tantra. An original Tantra on the esoteric, secret adoration of S'aktí, according to the Kaula cult. The MS. examined comprises twelve chapters, but the work in its entirety is probably much larger.

Beginning. कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
तं कदाचित् सुखासीनं भगवन्तं त्रिलोचनं ॥
पप्रच्छपरया भक्त्या देवी लोकहिताय वै ।
देव्युवाच । देव देव महादेव लोकानुग्रहकारक ।
कुलाचारस्य माहात्म्यं पूर्वं वै सूचितं मया ॥
तत् कथं गोपितं देव मम प्राणेश्वर प्रभो ।
कथयस्व महाभाग यद्यहं तव वल्लभा ॥

End. नित्यं नित्य महेशानि यः स्मृश्नेन् (?) मन्त्रमुत्तमं ।
स पूतः सर्वपापेभ्यः सदाशिवसमो भवेत् ॥

Colophon. इति गुप्तसाधनतन्त्रे द्वादशः पटलः ।

विषयः । १, पटले । कुलाचारतत्साधनकथनं । २, ३, पञ्चाङ्गोपासनादि । ४, आत्मसिद्ध्युपायः । ५, मासिकजपविवरणं । ६, दक्षिणायाः प्रकारादि । ७, मन्त्रोद्धारप्रभृति ।

No. 739. जातिमाला ।

Substance, yellow country paper. Folia, 2. Lines, 8 on a page. Extent 67 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalakhaṇḍa, Vikramapura, Dháká, Bábu Vaikuṇṭhanátha Chakravartí. Appearance, old. Verse. Generally correct.

Játimálá. An account of the origin of the different Hindu castes, differing in some respects from the well-known work of this name which forms a part of the *Rudra Yámala Tantra.* The MS. is imperfect and the author's name cannot be ascertained.

Beginning. ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णाश्चतुर्विधाः ।
वर्णानां सङ्करोत्पत्तिं निशामय महामुने ॥
आदौ विष्णोर्मुखाज्जाता ब्राह्मणा वेदपारगाः ।
तद्बाहोः क्षत्रिया जाता उर्व्यां वैश्या धनान्विताः ॥

End. तेलङ्गाय ततो देयं ततस्तु चर्म्मकारिणे(?) ।
ताथलाय प्रदातव्यं चाण्डालाय ततः परम् (?) ॥ इत्यतः खण्डितः ॥

विषयः । जातिनिर्णयकथनं ॥

No. 740. मुण्डमालातन्त्रम् ।

Substance, country yellow paper. Folia, 15. Lines, 5—8 on a page. Extent, 416 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalakhanda. Vikramapura, Dháká. Bábu Vaikunthanátha Chakravartí. Appearance, old. Verse. Generally correct.

Mundamálá Tantra. This is one of the original Tantras of the Kaula class, but the MS. is incomplete, and contains only the first six chapters. Contents: 1. The science of one syllable, or a mystic mantra of one syllable with which Indra worshipped the Devi. 2. The alphabet. 3. Places most appropriate for worship. 4. Articles of offering. 5. Initiation. 6. Mystic diagrams for worship.

Beginning. सर्वानन्दमयीं नित्यां सर्वाम्नायनमस्कृतां ।
सर्वसिद्धिप्रदां देवीं नमामि सकलेश्वरीं ॥
देव्युवाच । देव देव महादेव परमानन्दनन्दन ।
प्रसीद गुह्यवक्तान्तः(?) कथयस्व प्रियंवद ॥

End. इह लोके सुखं सर्वं देवा गणमतन्यत(?) ।
गोप्तव्यं तत् प्रयत्नेन यस्मै कस्मै न विश्वसेत् ॥

Colophon. इति मुण्डमालातन्त्रे षष्ठः पटलः समाप्तः ॥

विषयः । १ पटले, एकाक्षरीविद्या, या च देवराजेन साधिता पूर्वं । २, अक्षमालाया नामानि फलानि च । ३, साधनस्थानानि । ४, निवेद्यवस्तूनि, बलिदानि च । ५, दीक्षाविधिः, गुरुलक्षणानि च । ६, पूजायन्त्रप्रभृतयः । पुस्तकमिदं समाप्तिं न प्राप्तम् । प्रथमपटलात् षष्ठपटलपर्य्यन्तं विद्यते ॥

No. 741. मृतवत्सा-चिकित्सा ।

Substance, palm leaf. Folia, 11. Lines, 4—5 on a page. Extent, 241 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalkhaṇḍa, Vikramapura, Ḍháká, Bábu Vaikuṇṭhanátha Chakravartí. Appearance, old. Prose. Generally correct.

Mṛitavatsá chikitsá. Treatment of women who miscarry, or suffer abortion, or whose children die soon after birth. Anonymous.

Beginning. गर्भस्यमृतं जातमृतं वा पचान्मासार्द्धवत्सरात् ।
म्रियते त्रिद्विवर्षे वा यस्याः सा मृतवत्सिका ॥

End. इत्यनेन वंशपत्रे लिखित्वा सिरसि बाहौ वा रक्तवस्त्रेण बध्वा धारयेत् ।

विषयः । मृतवत्सात्वप्रशमनोपायः ।

No. 742. दशकर्म्मदीपिकीया विवाहपद्धतिः ।

Substance, palm leaf. Folia, 20. Lines, 3 on a page. Extent, 285 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalkhaṇḍa, Vikramapura, Ḍháká, Bábu Vaikuṇṭhanátha Chakravartí. Appearance, old. Prose. Generally correct.

Viváhapaddhati. A treatise on marriage, forming a part of a large work on the ten principal sacraments or Sañskáras, and entitled *Das'a-karma-dípiká.* By Pas'upati, the elder brother of Haláyudha, who lived in the court of Lakshmaṇa Sena of Bengal.

Beginning. प्रथमं स्वस्तिवाचनपूर्वकं सूर्य्यः सोम इति पठित्वा । इत्यादि ।

End. ततः शान्तिं कृत्वात्मानमभिषिच्याच्छिद्रावधारणं कुर्य्यात् ।

Colophon. इति राजपण्डितपशुपतिकृतायां दशकर्म्मदीपिकायां विवाहपद्धतिः समाप्ता ।

विषयः । यजुषां वैवाहिककर्मप्रयोगकथनं ।

No. 743. भुवनेश्वरीसहस्रनामस्तोत्रम् ।

Substance, country yellow paper. Folia, 10. Lines, 5—6 on a page. Extent, 179 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalkhanda. Vikramapura, Dháká, Vaikunthanátha Chakravartí. Appearance, old. Verse. Generally correct.

Bhuvanes'varí-sahasranáma-stotra. A hymn to Bhuvanes'varí, a form of Durgá, in which a thousand epithets are strung together in her praise. The work is acknowledged to be a section of the Meruviraha Tantra.

Beginning. श्रीपार्वत्युवाच । देवदेव महादेव सर्वशास्त्रविशारद ।
कपालखड्वाङ्गधर चिताभस्माङ्गलेपक ॥
या आद्या प्रकृतिर्नित्या सर्वशास्त्रेषु गोपिता ।
अस्याः श्रीभुवनेश्वर्य्या नामाष्टकसहस्रकम् ॥

End. भयमपि मधुमिश्रैः कुङ्कुमाद्यैर्विशेषात् ॥

Colophon. इति शिवपार्वतीसंवादे मेरुविरहतन्त्रे श्रीभुवनेश्वरीसहस्रनामस्तोत्रं समाप्तम् ॥

विषयः । भुवनेश्वरीसहस्रनामकथनादि ।

No. 744. त्रिपुरसुन्दरीमन्त्रनामसहस्रम् ।

Substance, country yellow paper. Folia, 13. Lines, 3—5 on a page. Extent, 201 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalkhanda., Vikramapura, Dháká, Bábu Vaikunthanátha Chakravarti. Appearance, old. Correct.

Tripurasúndarí-mantra-námasahasra. A hymn, similar to the last, in praise of Tripurasundarí, another form of Durgá. It is an extract from the Vámakes'vara Tantra of Púrnánanda Paramahañsa.

Beginning. कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
कल्पपादपमध्यस्थे सिद्धगन्धर्वसेविते ॥
मणिमण्डपमध्यस्थे नानापुष्पोपशोभिते ।
तं कदाचित् सुखासीनं भगवन्तं जगद्गुरुं ॥

End. देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभं ।
स याप्स्यति न सन्देहः स्ववराजस्य कीर्त्तनात् ॥

Colophon. इति वामकेश्वरतन्त्रे पूर्णानन्दपरमहंसविरचिते श्रीकार्त्तिकेयशिवसंवादे श्रीमहात्रिपुरसुन्दरीमन्त्रनामसहस्रं समाप्तम् ॥

विषयः । त्रिपुरसुन्दर्याः सहस्रनामस्तवकथनं ।

No. 745. व्यवस्थासारसङ्ग्रहः ।

Substance, country yellow paper. Folia, 17. Lines, 5—6 on a page. Extent, 307 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalkhaṇḍa, Vikramapura, Ḍháká, Vaikunṭhanátha Chakravarti. Appearance, old. Prose. Generally correct.

Vyavasthá-sára sañgraha. Dissertations on the ages of the moon and astral conjunctions favorable for particular ceremonial observances. The MS. is incomplete, and the author's name is not ascertainable.

Beginning. गुरोः पादयुगं नत्वा रामगोविन्दशर्म्मणा ।
क्रियते बालबोधाय व्यवस्थासारसङ्ग्रः ॥
तत्रादौ तिथिव्यवस्था निरूप्यते ।

End. वचनात् सौरभाद्रे उभयोरपि पक्षयोश्चतुर्थीतिथिमात्रे चन्द्रो नेक्षितव्यः ।
इत्यतः खण्डितः ॥

विषयः । तिथ्यादिव्यवस्थानिरूपणं ।

No. 746. पराभिधानं, अथवा अनेकार्थध्वनिमञ्जरी ।

Substance, country yellow paper. Folia 7. Lines 6, on a page. Extent, 139 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalkhaṇḍa, Vikrampur, Ḍháká, Vaikunṭhanátha Chakravarti. Appearance, old. Verse. Generally correct.

Parábhidhána alias *Nánártha-dhvanimañjarí.* A Sanskrit vocabulary of words having various meanings, compiled from the works of Amara, Rudra, and Gaṅgádhara, and the Dharaní Kosha and Ratra Kosha. By Gada Siñha. The work is sometimes called Nánárthadhvanimañjarí.

Beginning. शब्दाम्भोधिर्यतोऽनन्तो यतो व्याख्या प्रवर्त्तते ।
गुरवे शम्भवे तस्मै नित्यं वागात्मने नमः ॥

End. अमरद्रुगङ्गाधरधरणीरत्नकोषानालोक्य सङ्क्षेपात् ।
नानार्थध्वनिमञ्जरीयमभिहिता श्रीगदसिंहेन परमयत्नात् ॥

Colophon. इति श्रीगदसिंहविरचिता अनेकार्थध्वनिमञ्जरी समाप्ता ।

विषयः । नानार्थशब्दकथनं ।

No. 747. मन्त्रप्रदीपः ।

Substance, country yellow paper. Folia, 71. Lines, 6 on a page. Extent, 1207 s/lokas Character, Bengali. Date ? Place of deposit, Maṇḍalagaḍ, Vikramapura, Ḍháká, Vaikuṇṭhanátha Chakravarti. Appearance, old. Verse. Generally correct.

Mantra-pradipa. A dissertation on mystic mantras, their derivations, meanings, and uses, as also the uses of mystic diagrams in the adoration of S'ákta divinities. By Kás'ínátha Bhaṭṭácharya.

Beginning. यामासाद्य विधीयते विधिबलिध्वंसीशदेवादिभिः
स्वीयं स्वीयमतीव दुष्करतरं कर्म्म क्षणाल्लीलया ।
सा दुर्गा भवदुर्गदुर्गतिहरा सर्वान्तरस्थायिनी
पूर्णं वो विदधातु सर्वमनिशं चेतोगतं यद्भवेत् ॥
वार्द्धक्यादिति सर्वभूधरधवो मेना तु शैत्यादिति
प्रोवाच स्मरशासनादिति पुनर्मेनाकसीमन्तिनी ।
इत्थं संशयकोटिभिः कवलितः कोऽप्येष कल्पः कवेः
शम्भोः शैलसुताकरप्रणयने भूयाद्दिवं भूतये ॥

End. पशुभावात् परो भावो नास्ति चास्मिन् कलौ युगे ।
तस्मात् सर्वं परित्यज्य अनाश्रमं विभावय ॥

Colophon. इति काशीनाथभट्टाचार्य्यविरचिते मन्त्रप्रदीपे वामाचारनिरूपणं नाम चतुर्थः परिच्छेदः ।

विषयः । मन्त्रार्थमन्त्रचैतन्यकरणयोनिमुद्रानिरूपणप्रभृतयः ॥

No. 748. शब्दमाला ।

Substance, country yellow paper. Folia, 61. Lines, 6—7 on a page. Extent, 1666 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalgaḍa, Vikramapura, Ḍháká, Vaikunthanáth Chakravarti. Appearance, old. Verse. Correct.

S'abdamálá. A Sanskrit vocabulary. By Gopínátha S'armá. A work of this name by Rámesvara Sarmá is noticed by Wilson, which he describes as "a work of limited extent and value, and is little better than a supplement to the Amarakosha." He takes its date to be prior to that of the *Mediní.* Essays III, 231.

Beginning. अमन्दानन्दवृन्दारवृन्दारकशिरोमणि,—

सेव्यमानमहं वन्दे भवान्याश्चरणाम्बुजम् ॥

प्रणम्य चरणाम्भोजं भवान्या बालबोधिनी ।

क्रियते शब्दमाला वै श्रीगोपीनाथशर्म्मणा ॥

पुंस्त्रीनपुंसकान् शब्दान् वाच्यलिङ्गांश्च वाचकान् ।

यथाप्रज्ञं प्रवक्ष्यामि समासांश्च समासतः ॥

End. शब्दवत्साधनं लिङ्गत्रये (इत्यतः खण्डिता)

विषयः । शब्दानां वाच्यलिङ्गाद्यनुशासनं ।

No. 749. वटाश्वत्थविवाहः ।

Substance, country yellow paper. Folia, 4. Lines, 5—6 on a page. Extent, 65 s'lokas. Character, Bengali. Date ? Place of deposit, Maṇḍalagaḍa, Vikramapura, Ḍháká, Vaikunthanátha Chakravarti. Appearance, old. Prose. Generally correct.

Vaṭás'vattha-viváha. A manual for the celebration of marriage between the *Ficus religiosa* and the *Ficus indicá*, a religious ceremony of some merit in the estimation of modern Hindus. Anonymous.

Beginning. तत्र विवाहपूर्वदिने सायं संयम्य कृतनित्यक्रियः सुहृद्भिः सहितः अश्वत्थ-

वटयोः समीपं गत्वा घटं संस्थाप्य स्वस्तिवाचनं कृत्वा सङ्कल्पं कुर्य्यात् ।

विष्णुरों तत्सत अद्येत्यादि ।

End. वटमूले चस्तं दत्वा पठेत् । वटवृक्ष महाभाग सर्वप्राणिहितो भव ।

पुत्रायुर्धनवृद्ध्यर्थं तुभ्यं नित्यं नमो नमः ॥ (परिसमाप्तिसूचकं वाक्यं नास्ति) ।

विषयः । वटाश्वत्थयोर्विवाहदानप्रकारः ।

No. 750. आनन्दलहरीतत्त्वदीपिका ।

Substance, country yellow paper. Folia, 8. Lines, 8 on a page. Extent, 276 s'lokas. Character, Bengali. Date ? Place of deposit-Mandalagada, Vikramapura, Dháká, Vaikunthanátha Chakravarti. Appearance, old. Correct.

A'nandalaharí-tattradípiká. A commentary on the *A'nandalaharí*, a hymn in praise of S'iva, by S'aṅkara A'chárya.—By Gaṅgahari.

Beginning. नत्वा गुरुं गणपतिं देवीं त्रिपुरसुन्दरीं ।
तन्त्राण्यथ समालोक्य ज्ञात्वा गुरुमतं तथा ॥
युक्त्या च स्वयमारोप्य श्रीगङ्गहरिधीमता ।
आनन्दलहरीतत्त्वदीपिका क्रियते मुदा ॥
इह खलु शक्तिखण्डनं कुर्वतः श्रीशङ्कराचार्य्यस्य सर्वाणीन्द्रियाणि विकुण्ठितानि आसन् पुनरपि इत्यादि ।

End. सर्वदेवमयं ब्रह्म सर्ववेदमयं तथा ।
सर्वयोगमयं तद्धि सर्वज्ञानमयं तथा ॥ इत्यतः खण्डिता ।

विषयः । आनन्दलहरीवाक्यार्थव्याख्यानं ।

No. 751. धीररञ्जिका ।

Substance, country yellow paper. Folia 35. Lines, 6—8 on a page. Extent, 1054 s'lokas. Character, Bengali. Date ? Place of deposit, Mandalagad, Vikramapura, Dháká, Vaikunthanátha Chakravarti. Appearance, old. Prose. Incorrect.

Dhírarañjiká. A commentary on the *Kumára sambhava* of Kálidása. By Govindaráma S'armá.

Beginning. यल्लीलया स्मरहरोऽपि बभूव मुग्धो योगीन्द्रवृन्दपरिवन्द्यपदारविन्दं ।
तस्या गिरीन्द्रदुहितुः पदपद्मयुग्ममातिष्ठतां हृदि सतां त्रिदशौघसेव्यम् ॥
मानन्दं चरणाभिवन्दनभवत्प्रोद्गाढहर्षाश्रुभिः
संश्लिष्टाननभूरिगद्गदवचा देवेन्द्रवृन्दार्चितं ।
पादाब्जं परिवन्द्य शङ्करविभोर्गोविन्दरामो द्विजः
व्याख्यातं वितनोति पण्डितमुदे यत्नात् कुमारीयकम् ॥

End. घटजलरूपसन्यदानवर्द्धितत्वादित्यपि पुत्रवत् वत्सलाः ॥ इत्यतः खण्डिता ।

विषयः । कुमारसम्भवस्य व्याख्यानं ।

No. 752. वाजपेयपद्धतिः, वा वाजपेयक्रतोरुद्गात्रप्रयोगः ।

Substance, country paper, $9\frac{1}{2} \times 4$ inches. Folia, 34. Lines, 9 on a page. Extent, 900 s lokas. Character, Nágara. Date, S. M. 1846. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Vájapeya-paddhati. A manual for the performance of a ceremony called *Vájapeya*, in which spirituous libations form the most important offerings. The work describes the duties of the Udgátri priest.

Beginning. उद्यत्कोटिसहस्ररश्मिकिरणन्यक्कारकारिच्छवि-
प्रध्वस्ताखिलभक्तमानसगुहाज्ञानान्धकारावलिः ।
यो वृन्दारकवृन्दवन्दनशिरःसङ्घृष्टनखीकृता-
लक्तस्वच्छपदाम्बुजद्वयतलो विघ्नेश्वरोव्यात्स नः ॥
अथ वाजपेयक्रतोरुद्गात्रप्रयोगो लिख्यते ।

End. प्रस्तोता उदवसानीये प्रधानयागकाले गायन्ति त्वत्युद्गृशीयं सामवचं गायेत् ।
उद्गृशीय ऋषिः अनुष्टुप्छन्दः इन्द्रो देवता उदवसानीयायं सामगान
विनियोगः ।

Colophon. इति वाजपेयस्य पद्धतिः समाप्ता ।

विषयः । वाजपेययज्ञानुष्ठानप्रयोगः ।

No. 753. शुल्वसूत्रविवरण कात्यायनीयं ।

Substance, country paper, $9\frac{3}{4} \times 4\frac{3}{4}$ inches. Folia, 32. Lines, 10 on a page. Extent, 700 s lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'ulvasútravivaraṇa. A commentary on the *S'ulvasútra* of Kátyá-zana. The work treats of the formation of altars. By Mahidhara, who says he compiled it in the Samvat year 1846, in compliance with an order to that effect of his tutor Ratnes vara Mis'ra.

Beginning. यस्य लीलावशेनेदं जन्मस्थितिलयं व्रजत्।
आनन्दैकरसं वन्दे तमुमासहितं शिवम्॥
श्रीचक्रिंहं नमस्कृत्य रमेशं भक्तवत्सलं।
शुल्वस्य विवृतिं वक्ष्मि भाष्यवृत्त्यनुसारिणीम्॥
श्रीमान् कात्यायनः पञ्चदशशाखासाधारणं कल्पसूत्रं विरच्य तत्र कथित-वेद्यादिमानोपयोगितया शुल्वं परिशिष्टं चिकीर्षुः प्रतिजानीते। रज्जुसमासं वक्ष्यामः।

End. तत्र दोषदरिद्रस्य गूढमन्त्रमधीयता।
समाप्तेयं क्रिया शौल्वा कात्यायनमहात्मनः॥
इत्यादयोऽन्येऽपि श्लोका द्रष्टव्याः।

Colophon. इति शौल्वे विवरणे महीधरविनिर्म्मिते वेदीष्टकान्ता इवा षष्ठीयं कण्डिकागमत्। समाप्तं शुल्वसूत्रविवरणं॥
रसवेदाङ्गभूवर्षे (१८४६) मास्यन्त्ये धवले दले।
त्रयोदश्यां रवेर्वारे वाराणस्यां महीधरः॥
श्रीरत्नेश्वरमिश्रस्य गुरोः केशवजन्मनः।
आज्ञया विवृतिं शौल्वीं भाष्यवृत्त्यनुसारिणीं॥
विदुषां सुखबोधाय यथाबुद्ध्यनुसारतः।
भाष्यं रामकृतां वृत्तिं सूत्राण्यालोच्य तत्त्वतः॥
नीलकण्ठो रामनाथः सिताभश्चन्द्रशेखरः।
भैरवेशः कृपासिन्धुस्तेन तुष्येन्न केशरी॥
इति श्रीमन्महीधरविरचितं शुल्वसूत्रविवरणं समाप्तम्॥

विषयः। १ कण्डिकायां, शालावेदीनिर्माणार्थं शङ्कुनिखातपूर्वकं प्राच्यादिदिक्साधनं। २, चतुरस्रादिकथनं। ३, दीर्घचतुरस्रसमचतुरस्रादिभेदः। ४, वेद्युत्तर-श्रोण्यादिभागमानं। ५, वेदिभागविशेषेषु एकद्व्यादिपुरुषप्रमाणं। ६, वेद्यामिष्टकाचयनादि॥

No. 754. दर्शपूर्णमासः।

Substance, country paper, 9½ × 4 inches. Folia, 61. Lines, 8—9 on a page. Extent, 1000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally corrrect.

Darsapúrṇamása. Directions for the performance of the Darsa Paurṇamása rites according to the rules of As'valáyana and Apastamba.

Beginning. अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य दर्शेन यक्ष्ये पूर्णमासेन यक्ष्य इति सङ्कल्प्य ।

End. भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः स्वाहा । इत्यापस्तम्बशाखायां दर्शपूर्णमासौ समाप्तौ ॥

विषयः । आश्वलायनापस्तम्बानुयायी दर्शपूर्णमासेष्टिप्रयोगः ।

No. 755. समयाचारतन्त्रं ।

Substance, country yellow paper, 9½ × 4 inches. Folia, 16. Lines, 9 on a page. Extent, 300 s'lokas. Character, Nágara. Date ?. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Samayáchára Tantra. An original Tantra treating the details of the Kaula cult. Contents : meaning of the word *Samayáchára ;* a mantra of Sarasvatí ; a hymn to Vijayá ; Tántric duties, and the necessity of observing them ; the fourteen articles of offering necessary for S'ákta worship, and their purification ; the five daily prayers ; various kinds of gesticulation for effecting pacification, subjugation, paralysis, disputes, absence of mind, and destruction ; eastern, western, northern and southern sects of Kaulas, their special divinities, and their rosaries ; various kinds of seats for worship with special objects ; places meet for counting the rosaries ; sacraments for mantras ; two classes of Kaulas, the Vámáchára and the Dakshiṇáchára ; enumeration of Tantras and Yámalas ; the five essentials of Tantra worship—fish, flesh, gesticulation, wine, and female society ; procedure for acquiring influence over S'aktí ; places sacred to S'aktí ; sacrifices ; special mantras ; special sacraments for mantras, on their birth, vivification, &c. ; females to be accepted as S'aktí and males as S'iva ; wet and dry forms of worship.

Beginning. श्रीपार्वत्युवाच । भगवंस्त्वं गुणाधार सर्वज्ञ करुणानिधे ।
इदानीं श्रोतुमिच्छामि समयाचारमुत्तमम् ॥
यः पुरा समयाचारः पूर्वाम्नायेषु कीर्त्तितः ।
तं पुनः श्रोतुमिच्छामि षडाम्नायेषु यद्भवेत् ॥

End. षडाम्नायषु कथितं तन्त्रं सर्वत्र दुर्लभं ।
तथा गोप्यञ्च सुभगे मार्टजारपदं यथा ॥ ७१ ॥
यदि चेद्वै वरारोहे मया तुभ्यं प्रकाशितं ।
अतस्त्वापयेन्नित्यं यतस्त्वं मम वल्लभा ॥

Colophon. इति श्रीउमामहेश्वरसंवादे समयाचारतन्त्रं समाप्तम् ॥

विषयः । समयाचारशब्दार्थः । वाग्वादिनीमन्त्रः । विजयास्तोत्रं । तन्त्रोक्तकर्म्मणो यथोक्तकाले कर्त्तव्यत्वोक्तिः । क्षीरदधितक्रादिचतुर्द्रव्योक्तिः । तच्छोधनप्रकारः । प्रातर्मध्याह्नादिपञ्चजपकालः । शान्तिवश्यस्तम्भनद्वेषणोच्चाटनमारणादिषट्कर्म्मानुकूलमुद्राकथनादि । पूर्वदक्षिणपश्चिमोत्तराम्नायकथनं । पूर्वादितत्तदाम्नायदेवताकथनं । उक्ताम्नायमालाभेदः । शान्त्यादिकर्म्मसु आसनभेदः । जपस्थानं । मन्त्राणां पुन्नपुंसकादिकथनं । वामदक्षिणाचारादि । तन्त्रयामलादिपरिभाषाकथनं । मत्स्यमांसमुद्रामैथुनमद्यादिपञ्चमकारकथनादि । शक्तिसाधनादि । पीठस्थानकथनादि । सात्त्विकराजसादिबलिः । मन्त्रविशेषाः । मन्त्राणां जननजीवनताडनबोधनादिसंस्काराः । स्त्रीपुरुषादौ शक्तिशिवभावनादि । आर्द्रशुष्काचारकथनादि ।

No. 756. कात्यायनप्रयोगसारः ।

Substance, country yellow paper, 9½ × 4 inches. Folia, 91. Lines, 9 on a page. Extent, 1500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Kátyáyana prayogasára. Easy rules for the performance of the ceremonies recommended in the Kalpa Sútra of Kátyáyana. By Devabhadra Páṭhaka, son of Balabhadra and Bhágírathí. The author says that he has followed the Karkabháshya and the Daivabhásya, with their Paddhatis, by Ananta, Ráma, and Padmanábha. The MS. is incomplete.

Beginning. श्रीविघ्नेशं याज्ञवल्क्यं मुनिं कात्यायनं गुरुम् ।
अस्मद्दृष्टजनानां सद्गुरुञ्च हरिशङ्करम् ॥
गङ्गाधरं पाठकञ्च यागकालविवेचकम् ।
भागीरथीं मातरञ्च पितरं वल्लभद्रकम् ॥

पिटभूतिं भट्टयज्वं वासुदेवञ्च शङ्करं।
गर्गं कर्कमनन्तञ्च श्रीहरिस्वामिमाधवौ॥
सम्प्रदायप्रणेतॄंश्च रामं शुल्वप्रकाशकम्।
यज्ञविद्याप्रणेतारं परमं वेदयाज्ञिकम्॥
दीक्षितं श्रीधरं रेणुं पद्मनाभं गदाधरम्।
महादेवं हरिहरमित्यादीन् पूर्वयाज्ञिकान्॥
प्रणम्य मनसा वाचा कर्मणापि च भक्तितः।
सूत्रं कातीयं तद्भाष्यं कार्कं दैवं सपद्धतिं॥
अनन्तकृतं रामपद्धतिं याज्ञिकप्रियाम्।
अन्वयष्टिं पद्मनाभं सम्प्रदायाख्यपद्धतिम्॥
ग्रन्थानेतान् समङ्गीकृत्य निजबुद्ध्या विमृश्य च।
ततोऽपि याज्ञिकानाञ्च सम्प्रदायो यथाधुना॥
तथा कर्कानुसारेण ज्योतिष्टोमक्रतोर्ऋजुः।
प्रयोगसारनामासौ प्रयोगो रच्यते यतः॥
सूत्रवाक्यं समुल्लिख्य प्रयोगलेखनं न हि।
कृतं पूर्वरतस्तस्य लेखनं क्रियते मया॥

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति।)

विषयः। (अथ शुक्लैकादशीकृत्यं, तत्र) सोमेष्टिविचारः। अग्निषोमीयपशुः। वपायागः। विमितादिमानार्थं शालारज्जुप्रमाणकथनादि। दीक्षादिकालः। दीक्षाप्रयोगः। दीक्षणीयेष्टिः। कृष्णाजिनदीक्षा। प्रवर्ग्ये महावीरसम्भारः। यूपच्छेदनादि। (अथ द्वादशीकृत्यं, तत्र) प्रायणीयेष्टिः। सोमक्रयः। इडान्तातिथ्येष्टिः। अवान्तरदीक्षा। प्रवर्ग्यप्रचरः। उपसदिष्टिः। (अथ त्रयोदशीकृत्यं,) द्वितीयोपसदिष्टिः। (अथ चतुर्दशीकृत्यं, तत्र) तृतीयोपसदिष्टिः। अग्निषोमीयपशुः। पशुपुरोडाशनिर्णयः। अवदानलक्षणादि। (खण्डितत्वान्न सर्वविषयः प्राप्तः)

No. 757. वैयाकरणसिद्धान्तमञ्जूषा।

Substance, country yellow paper, 12 × 5 inches. Folia, 380. Lines, 9 on a page. Extent, 8360 s'lokas. Character, Nágara. Date, Sm. 1906. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Vaiyákaraṇa-siddhánta-manjúshá. A dissertation on the Syntax of Sanskrit Grammar. By Nages'a Bhaṭṭa, son of S'iva Bhaṭṭa and Satí Deví. This work enjoys a high and well-deserved repute.

Beginning. नागेशभट्टविदुषा नत्वा साम्बशिवं लघु ।
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥
तत्र वाक्यस्फोटो मुख्यः । लोके तस्यैवार्थबोधकत्वात् ।

End. अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितात् ।
न्यायतन्त्रं रामरामाद्वादिरक्षोघरामतः ? ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥
वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।
परिष्यू (क्षिं) त्योक्तवांस्तेन प्रीयतामुमया शिवः ॥
कृतस्तर्कोऽस्य नाभ्यास इति चिन्त्यं न पण्डितैः ।
इषदोऽपि हि सन्तीर्णा पयोधौ रामयोगतः ॥

Colophon. इति श्रीमदुपाध्यायोपनामकसतीगर्भजशिवभट्टसुतनागेशकृतौ वैयाकरणसिद्धान्त-मञ्जूषाख्यस्फोटकः ॥

विषयः । शक्तिलक्षणाव्यञ्जनात्मिकशब्दबोधजनिकृतेर्विचारादि । वर्णध्वन्यात्मकशब्द-विचारादि । जातिस्फोटनिष्कर्षः । धातुनिपातार्थनिर्णयः । तिङर्थविचारः । कृदर्थविचारः । प्रातिपदिकार्थनिरूपणम् । प्रथमादिविभक्त्यर्थनिरूपणम् । समस्यमानशब्दार्थविचारादि च ।

No. 758. बौधायनाग्न्याधानं ।

Substance, country yellow paper, 10 × 4½ inches. Folia, 39. Lines, 9 on a page. Extent, 780 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Baudháyanágnyádhána. A guide to the Agnyádhána ceremony according to the rules of Bodháyana. Contents: Proper times for the ceremony; Madhuparka; altar; auspicious days; mantras to be muttered by the Adhvaryu and others; rites for the manes and cattle; Brahmodana rite; Paramána rite; Agnihotra homa; Anvárambhaníya ishṭi.

Beginning. अथाग्न्याधानं निरूप्यते। तस्य कालः शिशिरवसन्तग्रीष्मर्त्तवः।

End. यथादैवतमुज्जितिवाचनं(?) यजमानभागप्राशने प्रजापतेरित्येतस्य स्थाने भद्रान्न० स्योनः। ब्राह्मणतर्पणान्तं समानं। सन्तिष्ठते व्रीह्याग्रयणं। (समाप्तिवाक्यं नास्तीत्यतः खण्डितमनुमीयते)

विषयः। आधानोपयोगिमासतिथिनक्षत्रादिकथनं। मधुपर्ककथनं। अग्न्यायतनं। पुण्याहवाचनं। अध्वर्युप्रभृतिजपः। गोपिण्डयज्ञः। ब्रह्मौदनादि। पवमानेष्टिः। अग्निहोत्रहोमः। अन्वारम्भणीयेष्ट्यादि।

No. 759. जगच्चन्द्रिका, बृहज्जातकमूलसंहिता।

Substance, country yellow paper, 9 × 3¾ inches. Folia, 321. Lines, 9 on a page. Extent, 5451 s'lokas. Character, Nágara. Date, Sm. 1531. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Jagachchandriká. A commentary on the Brihajjátaka, a treatise on astronomy and astrology. By Bhaṭṭotpala. The work was completed by the author, on Thursday the 5th of the waxing moon, in the month of Chaitra. Saka year 788.

Beginning. ब्रह्माजशङ्कररवीन्दुकुजज्ञजीवशुक्रार्कपुत्रगणनाथगुरून् प्रणम्य।
यः सङ्ग्रहोर्कवरलाभविदङ्बुद्धेरावन्तिकस्य तमहं विदणोमि कृत्स्नं॥
यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्योतिषं
तस्योच्छित्तिभयात् पुनः कलियुगे संश्रित्य यो भूतलं।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्यं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते॥
वराहमिहिरादधौ सुबहुभेदतोयाकुले
ग्रहर्क्षगणयादसि प्रचुरयुक्तिरत्नाकरे।
भ्रमन्ति परितो यतो लघुधियोऽर्थलुब्धास्ततः
करोमि विदतिस्तवं निजधियाऽहमत्रोत्पलः॥

End. दिनकरोऽर्कः, तदादिकाः सर्वे एव ग्रहाः, मुनयो वशिष्ठादयः, गुरुरादिदासः, तेषां चरणप्रणिपातकरणेन पादपाद' नमस्कारकरणेन यः कृतप्रसादोऽनुग्रहः तेन मतिर्बुद्धिर्यस्य तेन दिनकरमुनिगुरुचरणप्रणिपातसततप्रसादभागिना मयेदं

शास्त्रमुपसंहृतं सङ्क्षिप्तं कृतं। तस्मात् प्रणेतृभ्यः पूर्वशास्त्रकारिभ्यो नमस्करणेन यः कृतप्रमादः।

Colophon. इति श्रीभट्टोत्पलविरचितायां जगच्चन्द्रिकाभिधानायां दृष्टजातकविवृतौ उपसंहाराध्यायः षड्विंशः॥

पुरा विहितकर्मपाकभवसन्दर्शने जनोपचारितिप्रविगथ सर्वविपध्वामहमिपादध्यै(?)।

अर्थिनामुत्पलं(?) चक्रे वृत्तये विवृतिस्त्रवम्।

चिन्तामणीति विख्याता टीकेयं शास्त्रवल्लभा॥

सप्तसार्द्धसहस्राणि मानमस्या ह्यनुष्टुभाम्।

प्रीतिदिष्टैः(?) परित्यज्य टीकाः सम्यक् विचार्य च॥

उपयोगेश्वरे शास्त्रे चेत्सङ्गाच्चः कृतेपराधतः।

व्याख्येयं यन्मया त्यक्तं यच्च युक्तिविवर्जितं।

भ्रान्त्या च लिखितं यच्च तत्सर्वं स्पष्टतां न यत्॥

चैत्रमासस्य पञ्चम्यां सितायां गुरुवासरे।

वसुष्टाश्वमिते शाके कृतेयं विवृतिर्मया॥

विधाय टीकां शास्त्रेऽस्मिन् यत् क्वचित् पुण्यमर्जितम्।

तेन निर्मत्सरो भूयात् भोजन्यालङ्कृतो जनः॥

विषयः। १ अध्याये, राशिप्रभेदः। २, ग्रहयोनिभेदः। ३, तिर्यक्पक्षिस्थावरादीनामुत्पत्तिः। ४, गर्भाधानकालः। ५, जन्मविधिः। ६, सद्योमरणारिष्टयोगः। ७, आयुर्गणना। ८, दशाविभागः। ९, तनुधनसहजाद्यष्टस्थानविशेषस्थितग्रहशुभाशुभकथनं। १०, कर्मविशेषेण जीविका। ११, राजयोगकथनं। १२, ग्रहयोगविशेषादिकथनं। १३, सुनफादिचन्द्रयोगाः। १४, द्विग्रहयोगाः। १५, प्रव्रज्यायोगाः। १६, राश्यनुसारिशीलादिकथनं। १७, ग्रहदृष्टिफलम्। १८, तन्वादिभावस्थरव्यादिप्रत्येकग्रहफलकथनं। १९, मिश्रफलविचारः। २०, राशिक्षेत्रस्थानादिभिर्ग्रहाणां प्रकीर्णभावविचारः। २१, अनिष्टयोगः। २२, स्त्रीजातकनिर्णयादि। २३, मृत्युयोगाः। २४, नष्टजातकप्रकारः। २५, द्रेष्काणविचारः। २६, प्रश्नतिथिबलाबलादिकथनं।

No. 760. अद्वैतब्रह्मसिद्धिः ।

Substance, country yellow paper, 10 × 4½ inches. Folia, 182. Lines, 10 on a page. Extent, 8500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Advaita-brahma-siddhi. An essay on the non-dual Vedánta theory, designed to establish the identity of the human and the divine souls. By Madhusúdana Sarasvatí pupil of Náráyana Áchárya. The MS. is incomplete. It is, I believe, a portion of the work which is described in Dr. Hall's catalogue under the name of *Advaita-siddhi.* *Contributions*, p. 157.

Beginning. ॐ नमामि सद्गुरुं शान्तं ब्रह्मानन्दमुनीश्वरं ।
यत्कृपालवलेशेन सत्तर्कस्फुरणं मम ॥
श्रीमन्नारायणाचार्यं सनातनशिवं सदा ।
वन्देऽहं वाङ्मनःकायैर्द्वैतध्वान्तनिवृत्तये ॥
श्रुतिसिद्धञ्च यद् ब्रह्म सच्चिदानन्दमद्वयम् ।
तदत्र चिन्त्यते तर्कैर्मनोमलनिवृत्तये ॥

End. (खण्डितत्वाच्छेषवाक्यं नास्ति)

विषयः । १ मुद्गरे, देहतत्त्वनिरूपणादि । २, नास्तिकषड्दर्शनमतखण्डनम् । ३. जीवतत्त्वशोधनच्छलेन सत्याद्यवान्तरवाक्याखण्डार्थतोपपत्तिः । ४, सत्यं ज्ञानमनन्तं ब्रह्मेत्यवान्तरवाक्याखण्डार्थतोपपत्तिः । ५, तत्त्वमस्यादिमहावाक्याखण्डार्थतोपपत्तिः । ६, ब्रह्मणो निर्गुणत्वापपत्तिः । ७, ब्रह्मणो निर्गुणत्वे प्रमाणोपपत्तिः । ८, ब्रह्मणो निराकारत्वसिद्धिः । ९.ब्रह्मणो ज्ञानत्वानन्दत्वाद्वितीयत्वनित्यत्वसाक्षित्वोपपत्तिः । १०, ब्रह्मणो जगदुपादानत्वोपपत्तिः । ११, ब्रह्मणो जगन्निमित्तत्वोपपत्तिः । १२, ब्रह्मणो जगदुपादानत्वे प्रमाणत्वोपपत्तिः । १३, स्वप्रकाशत्वलक्षणोपपत्तिः । १४, स्वप्रकाशत्वोपपत्तिः । १५, आत्मनः स्वप्रकाशत्वोपपत्तिः । १६, ब्रह्मणः शब्दावाच्यत्वं । १७, सामान्यतो भेदखण्डनं । १८, विशेषतो भेदखण्डनं । १९, भेदप्रतिनिधिविशेषखण्डनं । २०, भेदपक्षके प्रत्यक्षभङ्गः । २१, जीवब्रह्मभेदानुमानभङ्गः । २२, जीवभेदानुमानभङ्गः । २३, जीवभेदानुकूलतर्कभङ्गः । २४, भेदपक्षकेऽनुमानभङ्गः । २५, २६, भेदश्रुतेरनुवादकत्वादि । २७, भेदश्रुतेः षड्विधतात्पर्यलिङ्गभङ्गः । २८, ऐक्यस्वरूपोपपत्तिः । २९, जीव-

ब्रह्माभेदे प्रमाणं । ३०, एक्यश्रुतेरुपजीव्यबाधाभावः । ३१, तत्त्वमसिवाक्यार्थ-निरूपणम् । ३२, अहं ब्रह्मास्मीत्याद्यनेकश्रुतिस्मृत्यर्थकथनं । ३३, जीवब्रह्माभेदानुमानं । ३४, बिम्बप्रतिबिम्बन्यायेनैक्यसिद्धिः । ३५, खण्डितत्वान्नात्रान्ये विषया लिखिताः ॥

No. 761. दानमयूखः ।

Substance, country yellow paper, 11 × 4 inches. Folia, 44. Lines, 13 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse and prose. Generally correct.

Dánamayúkha. On the sixteen great religious gifts. By Nílakaṇṭha, son of S'aṅkara Bhaṭṭa. Contents: (1) gift of silver of the weight of the donor; (2) gift of a golden globe, (3) gift of a thousand heads of cattle; (4) gift of a cow made of gold; (5) gift of a horse made of gold; (6) gift of a horse attached to a golden car; (7) gift of a golden elephant attached to a similar car; (8) gift of five ploughs, with bullocks and an area of land in which the same may be used; (9) gift of gold and land; (10) gift of a golden wheel; (11) gift of a jewelled creeper; (12) gift of seven rats made of gold; (13) gift of a jewelled cow; (14) gift of a golden jar decorated with jewels; (15) gift of the five elements represented by golden images; (16) gift of golden flights of steps. The advantages of making the above gifts and the ceremonial rites to be observed in giving them away are also described in detail. For another work of this author, vide No. 730.

Beginning. अथ तुलादानपुरुषप्रकारः । अथ तुलापुरुषदानप्रयोगः । तत्राधिवासनात् पूर्वदिने कृतैकभक्तादिरधिवासनदिने यजमानो देशकालौ सङ्कीर्त्य ब्रह्महत्यादिसर्वपापनाशपूर्वकसर्वमन्वन्तरकालावच्छिन्नसर्वलोकपालस्थानाधिकरणकवासोत्तर—इत्यादि ।

End. विभागस्तु तुलापुरुषवधात्ततः पुण्याहवाचन-ब्रह्मादिपूजनविसर्जनमण्डपादि-प्रतिपादन-ब्राह्मणभोजनाशीर्वादग्रहण-मङ्गलाचारादीनि । इति महाभूतघटदानं ।

Colophon. इति श्रीमीमांसकशङ्करभट्टात्मजभट्टनीलकण्ठकृते दानमयूखे षोडशमहादानानि समाप्तानि ॥

विषयः। तुलापुरुष-रजतादिमयतुला—हिरण्यगर्भ-सुवर्णादिनिर्मितब्रह्माण्ड—सुवर्णनिर्मितकल्पवृक्ष—गोसहस्र—हिरण्यनिर्मितकामधेनु—हिरण्यनिर्मिताश्व—हिरण्यनिर्मिताश्वयुक्तरथ—हेमनिर्मितहस्तियुक्तरथ—सप्तसारदारुमयपञ्चलाङ्गलमहितभूमि—सुवर्णमयभूमि—सुवर्णमयषोड़शारविश्वचक्र—चामीकरनिर्मितकल्पलता—काञ्चननिर्मितप्रादेशमात्रसप्तकुण्ड—रत्नमयीधेनु—रत्नयुक्तकाञ्चनघट—सुवर्णमयमहाभूतघटादिषोडषमहादानफलविधिप्रयोगकथनं।

No. 762. भुवनदीपकटीका।

Substance, country paper, 11 × 5 inches. Folia, 31. Lines, 10 on a page. Extent, 1100 s'lokas. Character, Nágara. Date, Sm. 1816. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Incorrect.

Bhuvanadípakaṭíká. A commentary on the Bhuvanadípaka, a treatise on astronomy and astrology.

Beginning. सारस्वतमित्यादि। व्या०। सरस्वत्याः सम्बन्धि सारस्वतं तच्च तत् महस्य तत्रमस्कृत्य मया ज्ञानमुच्यते प्रकटीक्रियते।

End. शीघ्र एकराशौ तथा दशि(?) प्राग्वज्जातभवद्योगो मध्यो मुसरिकाभिधः।
मिथो दश विना खेटा द्वायान्तः(?) शीघ्रगो ग्रहः॥

Colophon. इति श्रीभुवनदीपकस्य टीका समाप्ता।

विषयः। भुवनदीपके वक्ष्यमाणानि ३६ द्वाराणि सन्ति, तद्व्याख्यानं। तत्र द्वाराणि यथा, १ द्वारे, मेषादिलग्नाधिपाः। २, उच्चनीचविचारः। ३, ग्रहाणां परस्परं मित्रशत्रुत्वादिविचारः। ४, राहोरुच्चनीचगृहाणि। ५, राहुतः सप्तमस्थस्य केतोर्विचारः। ६, ग्रहस्वरूपस्वभावादि। ७, द्वादशस्वपि भावेषु कुत्र किं विचार्यं। ८, अभीष्टकालनिर्णयः। ९. लग्नाधिपादिविचारः। १०, विनष्टो ग्रहः कीदृश उच्यते। ११, राजयोगचतुष्टयं। १२, लाभालाभविचारः। १३, लग्नेशावतिस्थितिसद्भावफलं। १४, अस्य गर्भस्य क्षेममस्ति वा न वा। १५, गर्भिण्याः प्रसवकालादिविचारः। १६, युगलबालकस्य प्रसवज्ञानं। १७, गर्भस्य मासमङ्गा। १८, विवाहिताऽविवाहितापरीक्षा। १९, विषस्वरूपकन्यालक्षणं। २०, भावविशेषस्यग्रहफलं। २१, विवाहादिविचारणा। २२, वादिप्रतिवादिविवादादौ जयपराजयविचारः। २३. ग्रहसङ्कीर्णभावादिनिर्णयः। २४, विदेशस्थप्रश्नादि। २५, पथिकस्य आगमनप्रश्नः। २६, मृत्यु-

योगः २७, दुर्गभङ्गः। २८, चौर्यकर्मविचारः। २९, महर्घ्यविचारः। ३०, नौकागमनकुशलतादि। ३१, इष्टलाभालाभादिविचारः ३२, लग्नपतेः सकाशात् कस्मिन् मासि लाभः। ३३, द्रःकाणादिफलं। ३४, अद्भुतदोषज्ञानं। ३५, राजादीनां कस्मिन् दिने किं भवतीति। ३६, अस्मिन् गर्भे पुत्रपुत्रिकास्तीत्यादि॥ (प्रश्नग्रन्थोयम)

No. 763. मल्लारिमाहात्म्यं, ब्रह्माण्डपुराणान्तर्गतक्षेत्रखण्डीयं।

Substance, country yellow paper, $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 63. Lines, 9 on a page. Extent, 550 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance old. Verse. Generally correct.

Mallárimáhátmya. Legendary account of a place of pilgrimage called Mallári. This professes to be an episode of the *Khetra Khaṇḍa* of the Brahmáṇḍa Puráṇa. Contents : 1. A hermitage assailed by a demon of the name of Malla. 2. The sages of the hermitage repair to Indra for aid. 3. Thence they go to Vaikuṇṭha; thence to Kailása. 4. Description of Kailása. 5. Description of the court of S'ambhu. 6. Description of the person of S'iva. 7. The sages relate to S'iva their grievance. 8. The army of S'iva. 9. The encampment of the demon. 10. Defeat of the demon's forces. 11. Destruction of Khadgadañshṭrá by Saḍánana. 12. Destruction of Ulkámukha and Kuṇṭaloma by Nandi. 13. Destruction of Manikásúra by Mártaṇḍa Bhairava. 14. Vishṇu's embassy to Malla. 15. Combat between Malla and Ghritamárí. 16. Overthrow of Malla by S'ambhu. 17. Prayer of Malla to S'iva. 18. Praise of S'iva by the Devas. 19-20. Kapila and other places of pilgrimage described. 21. Directions for worshipping the image of S'iva at Mallári. 22. Speech of the Enemy of Mallári (S'iva) to the sages. 23. Mantras of Mallári.

Beginning. वाग्वक्त्रोपज्ञनेत्रोल्लसरागकरभासुरं।
गजास्यं सुन्दरं वन्दे इन्दारकगणार्चितं॥
विघ्नेशचरणाम्भोजमकरन्दोद्विन्दवः।
सिञ्चन्तु भारतीं वल्लीं नतानां वदनालये॥
कैलासाचलचूडाग्रे मणिसुन्दरमन्दिरे।

यप्रच्छ पार्वती कान्तं रहस्यानन्दसुन्दरं ॥
श्रीपार्वत्युवाच । प्रियं किं दुर्लभं लोके किमाश्चर्यकरं परम् ॥
क्षेत्रं तीर्थं सदा नृणां भुक्तिमुक्तिफलप्रदम् ॥
अवतारेण केन त्वं सर्वेषां सुलभः सदा ।
कैर्व्रतैस्त्वं समाराध्यः कथयाशु मम प्रभो ॥

End. नित्यं नमामि भवसागरतारणाय मल्लारिपादयुगलं परमार्थरूपम् ।
इन्द्रादिवन्दितमशेषसुखप्रदेयं चिन्तामणिं सकलमङ्गलकामधेनुम् ॥

Colophon. इति श्रीब्रह्माण्डपुराणे क्षेत्रखण्डे मल्लारिमाहात्म्ये त्रयोविंशतितमोऽध्यायः ॥ २३ ॥

विषयः । १ अध्याये, मल्लाख्यदैत्यकृतर्ष्याश्रमपीडनं । २, दैत्यभयभीतानां ऋषीणां शक्रभवने गमनादि । ३, ऋषीणां वैकुण्ठे गमनादि । ४, कैलासवर्णनं । ५, शम्भुसभावर्णनं। ६, शिवमूर्त्तिवर्णनं । ७, शिवस्य निकटे मणिकमल्लाख्ययोर्दैत्ययोरुपद्रवनिवेदनं । ८, शिवसैन्यवर्णनं । ९, दैत्यचमूवर्णनं । १०, मार्त्तण्डभैरवसैन्यकर्टकमल्लासुरसैन्यवधः । ११, षडाननकर्टकखड्गदंष्ट्रवधः । १२, जयनन्दिकर्टकोल्कामुखकुन्तलोमदैत्यवधः । १३, मार्त्तण्डभैरवकर्टकमणिकासुरवधः। १४, युद्धनिवृत्तौ प्रबोधनार्थं मल्लदैत्यनिकटे शिवकर्टकं विष्णुप्रेरणादि । १५, मल्लदैत्येन सह घृतमारीयुद्धं । १६, शम्भुकर्टकमल्लासुरवधः । १७, किञ्चिज्जीवितशेषमल्लदैत्यकृतशिवस्तुतिः । १८, देवकृतशिवस्तुत्यादि । १९, २०, कपिलतीर्थादिकतिपयप्रधानतीर्थकथनं । २१, मल्लारिशिवपूजनविधिः । २२, ऋषीन् प्रति मल्लारिवाक्यं। २३, मल्लारिमन्त्रकथनादि ।

No. 764. अग्निष्टोमपद्धतिः, कात्यायनसूत्रपद्धत्यन्तर्गता ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 28. Lines, 10 on a page. Extent, 580 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Agnishṭomapaddhati. Directions for the performance of the Agnishṭoma sacrifice, according to the rules of Kátyáyana, founded on the Mádhyndini S'ákhá of the White Yajur Veda. By Yájñika Deva, son of Prajápati. The work is a fragment of the author's *Kátyáyana-sútra-paddhati.*

Beginning. अथ माध्यन्दिनसवनमुच्यते. तत्र पूर्वमाग्नीध्रीयस्य पश्चादुदङ्मुखोपविष्टस्य यजमानस्य लोकद्वारीयसामगानं(?) होमस्य। ततः सर्वे ऋत्विजः सयजमानाः स्नाताः सवनवह्निष्णोपस्थानादिधिष्ण्याभिमन्त्रणान्तं समर्पणं कुर्वन्ति।

End. तदानीमेव पुनरुद्धृत्य स्वयमेवाग्निहोत्रहोमः। प्रातर्होमस्तु स्वकाल एव। अत ऊर्द्ध्वं सभ्यातर्पणवैश्वदेवक्रिया नातः प्राक्।

Colophon. इति श्रीविरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ अग्निष्टोमपद्धतिः।

विषयः। आग्निष्टोमीयमाध्यन्दिनसवनप्रयोगकथनम्।

No. 765. वाराणसीदर्पणकारिकाप्रकाशिका, वा दर्पणप्रकाशिका।

Substance, country paper, 12 × 5 inches. Folia, 45. Lines, 10 on a page. Extent, 1000 s'lokas. Character, Nágara. Date, Sm. 1898. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Váráṇasídarpaṇ-kás'ikáprakás'iká, alias *Darpaṇaprakás'iká*. A commentary on his poem in eleven cantos on Benares. By Vatsarája, son of Rághava Tripáṭhí, and grandson of Gaṇesa Agnihotrí.

Beginning. भट्टोजिदीक्षितं नत्वा रामाश्रमगुरुं पुनः।
वत्सराजः करोत्येतां काशीदर्पणकाशिकां॥
गुरुपादरजःपूरस्फुरत्तेजःस्फुजः स्फुजः।
राजन्ते वत्सराजस्य मानसे सच्छिरःस्फुजः॥
वाराणसी दर्पणकाशिकाञ्च प्रकाशिकाख्यां प्रतनोति धीमान्।
श्रीवत्सराजः किल विश्वनाथकृपाकटाक्षाङ्कुरितप्रसादः॥

End. चरमप्रसादसमाप्तिं ज्ञापयन्नाह। श्रीति। प्रत्यक्षभावसमुद्रे। एकादशरुद्राः, तत्सङ्ख्याक इति यावत्। कालेशः, रुद्रः, तस्य यः कण्ठः, तस्य कविरिव कविर्यस्य सः। दर्पणस्य श्यामप्रभत्वादित्यर्थः। शोभा कान्तिर्द्युतिरित्यमरः। प्रसादात्मकस्य महारुद्रस्य नाम विश्वेश इति सर्वेषु एकादशसु अन्तिमः। एकादशरुद्रात्मकोऽयं ग्रन्थः॥ १६॥ ग्रन्थसमाप्त्युत्तरं संवत्सरादिकं निबध्नन्नाह। विश्वेशोत्तमेति। अष्टमूर्तिर्महादेवः। ताभिर्गणितं चाब्दे संवत्सरे। अङ्कानां वामतो गतिरित्यष्टाङ्कः। देव्याः, महः, उत्सवः, तस्य भावः, तया। दिव्ये-

दिवसैः । महसु महसामहेति विश्वः । नवदिवसा इति नवाङ्कः । रसाः षट् षडङ्कः । विश्वनाथ एक एवेत्येकाङ्कः । अन्यत् स्पष्टम् । संवत् षोडशाष्टनवतिमिते वर्षे इति फलितोऽर्थः । अङ्कतोऽपि १६९८ ।

Colophon. इति श्रीमद्वाराणसीवासित्रिपाठिकुलतिलकसामवेदोपाध्यायश्रीगणेशाग्निहोत्रिसूनुसूरित्रिपाठिश्रीमद्रामवसूनुश्रीवत्सराजकृते प्रकाशश्वरसः कामं समाप्तिमगाच्छुभम् ॥

विषयः । मङ्गलाचरणं, शिववर्णनं, नारदविश्वेश्वरकथोपकथनं, विश्वनाथकर्तृकदेवताभ्यो वरदानं, शिवस्य मन्दराचलेन सह साक्षात्कारः, मन्दरकर्तृकशिवस्थापनं दिवोदासस्य विश्वनाथसाक्षात्कारः, काशीमाहात्म्यं, वाराणसीवर्णनं, दिवोदासराज्यस्थापनप्रपञ्चः, पृष्ठङ्गारादिवर्णनं इत्यादिविषयगर्भितस्यैकादशप्रकाशपरिच्छिन्नस्य वाराणसीदर्पणकाव्यस्य व्याख्यानं ।

No. 766. हठदीपिका ।

Substance, country paper, $9\frac{3}{4} \times 4$ inches. Folia, 20. Lines, 20 on a page. Extent 500 s'lokas. Character, Nágara. Date, Sm. 1689. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse. Generally correct.

Haṭhadípiká alias *Haṭhapradípiká*. An essay on a peculiar form of Yoga meditation called *Haṭhayoga*. By Svátmáráma. Contents: 1. Introduction; Yoga teachers; importance of the Yoga proved; place for its performance; the mode of sitting; rules regarding food. 2. Use of the Práṇáyáma; six ways of washing and purifying the guts. 3. Various forms of gesticulation and diverse postures. 4. Procedure for Samádhi. Signs of perfection, &c. Hall's *Contributions*, p. 15. This is a more complete and correct text than No. 250.

Beginning. नमामि त्रैपुरं धाम । अथादिनाथाय नमोऽस्तु तस्मै येनोपदिष्टा हठयोगविद्या ।
विराजते प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहणीव ॥
प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठयोगोऽवदिश्यते ॥

End. विद्यातीर्थे जगति विबुधाः साधवः सत्यतीर्थे
गङ्गातीर्थे मलिनमनसा योगिनो ज्ञानतीर्थे ।

राधातीर्थे(?) धरणिपतयो दानतीर्थे धनाढ्या
लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ति ॥

Colophon. इति श्रीस्वात्मारामविरचितायां हठदीपिकायां चतुर्थोऽध्यायः ॥

विषयः। १ अध्याये, हठयोगेन संसिद्धानां गोरक्षनाथादीनां कथनं, हठयोगसाधनस्थलनिर्देशः, हठयोगग्रथमाङ्गभूतस्वस्तिकाद्यासनोक्तिः, आहारनियमश्च। २, प्राणायामाभ्यासप्रकारकथनं, नाडीशोधकधौतीवस्तिनेतित्राटकनौलिककपालभातीतिषट्कर्मकथनं, प्राणायामाभ्यासारम्भः, पूरककुम्भकादिफलाक्तिश्च। ३, खेचर्यादिनानाविधमुद्राबन्धादिकथनं, शुक्रादिस्तम्भफलकथन, कुण्डलिन्यादियोगिशक्तिकथनादि च। ४, समाधिक्रमकथनं, लयप्रकारः, नादानुसन्धानादि च ॥

No. 767. श्राद्धसूत्रपद्धतिः, कातीया।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 41. Lines, 7 on a page. Extent, 500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

S'ráddhasútra paddhati. Directions for performing Párvaṇa s'ráddha according to the rules of Kátyáyana. The MS. is incomplete, and the author's name is unknown.

Beginning. शिवञ्च विघ्नहर्त्तारं गुरुञ्च दमनं तथा।
अम्बिकां शारदां चापि वन्दे विघ्नोपशान्तये ॥
कात्यायनकृते श्राद्धसूत्रे व्याख्यापुरःसरम्।
प्रयोगपद्धतिं कुर्वे याज्ञवल्क्यादिसम्मताम् ॥

End. (खण्डितत्वात् समाप्तिवाक्यं नास्ति।)

विषयः। पार्वणश्राद्धप्रयोगविधायककातीयसूत्रव्याख्यानं।

No. 768. आश्वलायनब्राह्मणपञ्चिका।

Substance, country paper, $10 \times 5\frac{1}{2}$ inches. Folia, 27. Lines, 10 on a page. Extent, 574 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A's'valáyana-brahmaṇa-pañchiká, alias *Aitareya Bráhmaṇa*. This is an imperfect MS. containing only the 5th Book. Professor Haug has published an edition of the text together with an English translation.

Beginning. विश्वं वै देवा देवतास्तोमहवेहन्ति सप्तदशस्तोमा वै रूपं मान जगतोच्छन्दो यथादेवतमेतेन यथास्तोमं यथासाम यथाछन्दसं राध्नोति ।

End. यज्ञस्य देवता मेन्द्रमेव तदुद्गीथं करोतीन्द्रो वै यज्ञ इन्द्रो यज्ञ इन्द्रान्मानागादिन्द्रवन्तष्टुध्वमित्येवैनंसदाह तदाह ।

Colophon. इत्याश्वलायनब्राह्मणस्य पञ्चमपञ्चिकायां पञ्चमोऽध्यायः । पञ्चमपञ्चिका समाप्ता ।

विषयः । १ अध्याये, द्वादशाहस्य तृतीयचतुर्थाहकर्त्तव्यसूचनं । २, पञ्चमषष्ठाहकर्त्तव्याक्तिः । ३, सप्तमाष्टमाहकृत्यसूचनं । ४, नवमाहकृत्यषष्ठ्यपडहाडत्यादिकथनं । ५, प्रायश्चित्तहोमकथनं ॥

No. 769. आश्वलायनगृह्यकारिका ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 26. Lines, 11 on a page. Extent, 780 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

A's'valáyana-grihya-káriká. Memorial verses containing the rules of the Gríhya Sútra of A's'valáyana. The MS. is defective at the end and the author's name cannot be ascertained. Contents: Technical terms; sthálipáka; the rites after conception, &c.; sacrifice to Vaísvadeva; the sandhyá prayers; *Upákarma* or putting on of new sacrificial thread, &c. in the month of S'rávaṇa; offerings to the manes; vástuhoma, &c.

Beginning. आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोगं वक्ष्मि केषाञ्चिद् वृत्तिकारादिभाषितं ॥

End. (खण्डितत्वात् शेषवाक्यं नास्ति) ।

विषयः । सर्वकर्म्मसाधारणपरिभाषा, स्थालीपाककथन, गर्भाधानादिसंस्कारोक्तिः, बलिवैश्वदेवादिकथनं, सन्ध्योपासनोपाकर्म्मादिकथनं, पितृयज्ञः, क्षेत्रकर्षणवास्तुकर्म्मादिकथनञ्च ॥

No. 770. ब्रह्मसिद्धान्तं वा ब्रह्मसिद्धान्तपद्धतिः ।

Substance, country paper, 10 × 4 inches. Folia, 61. Lines, 5 on a page. Extent, 500 s'lokas. Character, Nágara. Date, Sm. 1806. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Brahma-siddhánta alias *Brahma-siddhánta-paddhati.* A Tántric miscellany on theology, metaphysics, cosmogony, &c. Contents: Brahma a void, its character; the cosmic mass, its character; generation from that mass of S'iva, from him of Bhairava, and from him of S'ríkaṇtha, &c. The origin of Prakṛití consisting of the five primary elements from the last; the organic and sensuous faculties—sleep, dreaming, and waking; will and the other four sensuous faculties; their agency in the creation of the world. Iḍá, piṅgalá, and other arterial paths to those faculties; thirteen vital airs, including Práṇa, samána, &c.; growth of the different members of the body; the essential elements of the body; the principal receptacles in the body; the proper mode of performing *práṇáyáma* and the advantage thereof; praise of Yógis.

Beginning. ————————त्रिविधं गर्भसम्भवेत् (?) ।

यदा नास्ति स्वयं कर्त्ता कारणं न कुलाकुलं ।

अव्यक्तपरमं तत्त्वमनामा विद्यते तदा ॥

End. वैद्यो रोगिणे तुर्वादिदरिद्रशूरोभोरुधार्म्मिका । पापकारो ज्ञानो रागी तत्त्वविकर्मशीलोपायेन ते दास्यकामे वयान्तिति(?) ॥

Colophon. इति योगशास्त्रब्रह्मसिद्धान्तपद्धतिः सम्पूर्णम् (?) ।

विषयः । शून्यब्रह्मनिरूपणं, तस्य गुणाः, ब्रह्माण्डपिण्डस्य तद्गुणानाञ्च कथनं, तत्पिण्डात् शिवस्य तस्माद् भैरवस्य तस्मात् श्रीकण्ठादीनामुत्पत्तिः, ततः पञ्चतत्त्वात्मकप्रकृतिपिण्डोत्पत्तिः, क्षुत्तृष्णादिकथनं. अन्तःकरणस्य तद्गुणानाञ्च कीर्त्तनं, सत्त्वरजस्तमो महाकालजीवात्मकपञ्चकुलशस्य तद्गुणानाञ्च कीर्त्तनं, जाग्रत्स्वप्नसुषुप्त्याद्यवस्थाकथनं, इच्छाक्रियादिशक्तिपञ्चकस्य प्रत्यकस्य पञ्चपञ्चगुणकथनं, कर्म्मकामचन्द्रसूर्य्याग्निस्वरूपप्रत्यक्षाचरणपञ्चकस्य तद्गुणानां कलानाञ्च कीर्त्तनं, इडापिङ्गलादिनाडीनां तद्द्वारस्य च कथनं, प्राणसमानादिदशवायुकथनं, शरीराङ्गप्रत्यङ्गोत्पत्तिकथनं, शुक्रमज्जादीनां प्रमाणं, आधारस्वाधिष्ठानादिचक्रकथनं, प्राणायामप्रकारस्तत्फलकथनादि, अवधूतलक्षणयोगमार्गप्रसंशादिकथनं ।

No. 771. कोशलागमः ।

Substance, country paper, 10 × 4½ inches. Folia, 28. Lines, 10 on a page. Extent, 500 s'lokas. Character, Nágara. Date, Sm. 1816. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Kos'alágama. This is a very defective MS. wanting both the beginning and end. It supplies a series of diagrams, and gives directions how to calculate therefrom the probable good and evil effects, and astrological influences under particular circumstances, of villages, houses, vehicles, dwellings, wells, wheels, commencement of journeys, &c.

Beginning. गजखरर्त्वयुगाश्वमहोगुणा द्विसहिता मघवा दिशि क्रमात् ।
गृहपतेरभिधा पुरदिङ्मिता वसुहृता भवनस्य दशा च सा ॥
अथ ग्रामवासचक्रम् ।

End. इष्टस्त्रयस्त्रिं२२शद्युतास्ततो भक्ताः पञ्च१५५शद्शेषास्तत्कालघटी फल । क्षय-वित्तसुखोत्साह भो ५क्लेशा९ जयो मृत्यु८ र्जयः ९ सुखं १० । नन्दा च शिलाभः १३ सुखं १४ दुःखं १४ क्रमात् ।

Colophon. इति गृहप्रकारं समाप्तम् । (अस्य नाम्नि प्रारम्भे च सन्देहः । प्रारम्भे प्रतिज्ञा-वाक्यं नास्ति, खण्डितत्वात् समाप्तिवाक्यञ्च नास्ति ।)

विषयः । ग्रामवास-वाहन-वासु-कूपचक्र-याचाचिनाडीचक्र-सेवाचक्रादिकतिपयचक्रा-दिद्वारा शुभाशुभगणना ।

No. 772. चन्द्रालोकः ।

Substance, country paper, 9 × 4 inches. Folia, 20. Lines, 9 on a page. Extent, 360 s'lokas. Character, Nágara. Date, Sm. 1733. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Chandráloka. A treatise on Rhetoric in ten chapters. By Jayadeva, son of Mahádeva. The work is held in high repute by Vaishṇavas, but it is rare.

Beginning. उच्चैरस्यति मन्दतामरसतां जायत्कलङ्कैरव-
ध्वंसं हसयते च यासु मनसामुल्लासिनो मानसे ।

दुष्टोद्यन्मदनाशनर्चिरमलालोकत्रयीदर्शिका
मा नेत्रचितयोव खण्डपरशोर्वाग्देवता दीव्यतु ॥
हंहो चिन्मयचित्तचन्द्रमणयः संवर्द्धयध्वं रसान्
रे रे खेरिणि निर्विचारवनिते मास्मत्प्रकाशीभव ।
उल्लासाय विचारवीचिनिचयालङ्कारवारां निधे-
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ॥

End. पीयूषवर्षप्रभवं चन्द्रालोकमनोहरं ।
सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम् ॥
जयन्ति याजकश्रीमन्महादेवाङ्गजन्मनः ।
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रातद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
प्रणीतस्तेनासौ सुकविजयदेवेन दशभि-
श्चिरं चन्द्रालोकः सुखयतु मयूखैर्दशदिशः ।

Colophon. इति श्रीपीयूषवर्षपण्डितश्रीजयदेवविरचिते चन्द्रालोकालङ्कारे अभिधास्वरू-
पाभिधानो नाम दशमो मयूखः ॥

विषयः । १मयूखे, शब्दवाक्यप्रकारकथनं । २, शब्दवाक्यादिगतदूषणनिर्णयः । ३, काव्यलक्षणोक्तिः । ४, आलङ्कारिकगुणोक्तिः । ५, श्लेषोपमापरिकरादिविविधा-लङ्काराणां लक्षणोदाहरणयोः कथनं । ६, करुणादिरसस्य वैदर्भ्यादिरीतेश्च कथनं । ७, ८, वस्त्वलङ्काणां भेदकथनं । ९, लक्षणनिरूपणं । १०, नाम-निर्देशादिकथनं ।

No. 773. धर्मसिन्धुसारः, अनुक्रमणिकासहितः ।

Substance, country paper, $9\frac{3}{4} \times 5\frac{1}{2}$ inches. some of the leaves are yellow. Folia, 467. Lines, 12—14 on a page. Extent, 12575 s'lokas. Character, Nágara. Date, Sm. 1910, Sk. 1775. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Dharmasindhusára. A compendium of modern ceremonial rites on the model of the *Nirṇayasindhu.* By Kás'ínátha Upádhyáya, son of Ananta Upádhyáya, who was the younger brother of Yajñes'vara Upádhyáya, and son of Kás'í Upádhyáya Súri.—The work comprises

three books, of which the last is divided into two parts. Contents: I. Calculations of proper times for ceremonies. II. Calendar of ceremonies for the twelve months of the year beginning with Chaitra; diurnal duties of religious people; imperative duties; Sthálipáka, Balivais'vya homa; consecration of wells, tanks, &c.; consecration of rosaries; consecration of images of gods; coronation; starting on journeys; influence of planets on mortals; pacification of adverse supernatural influences. III. Duties of persons whose parents are living; persons who should perform s'ráddhas; time meet for s'ráddhas; ritual for s'ráddhas; mourning; cremation; expiatory rites; duties of hermits.

Beginning. श्रीविट्ठलं सुकरुणार्णवमाशुतोषं दीनेष्टपोषमघसंहतिसिन्धुशोषम् ।
श्रीरुक्मिणीमतिमुषं पुरुषं परं तं वन्दे दुरन्तचरितं हृदि सच्चरन्तम् ॥
वन्दे प्रतिघ्नन्नमघानि शङ्करं धत्तां स मे मूर्द्ध्नि दिवानिशं करं ।
शिवाच्च विघ्नेशमथो पितामहं सरस्वतीमाशु भजेऽपि तामहम् ॥
श्रीलक्ष्मीं गरुडं सहस्रशिरसं प्रद्युम्नमीशं कपिं
श्रीसूर्यं विधुभौमविद्गुरुकविच्छायासुतान् षण्मुखं ।
इन्द्राद्यान् विबुधान् गुरुंश्च जननीं तातं त्वनन्ताभिधं
नत्वार्यान् वितनोमि माधवमुखान् धर्माब्धिसारं मितं ॥
दृष्ट्वा पूर्वनिबन्धान्निर्णयसिन्धुक्रमेण सिद्धार्थान् ।
प्रायेण मूलवचनान्युज्झित्य लिखामि बालबोधाय ॥
तत्र कालः षड्विधः । वत्सरः, अयनं, ऋतुः, मासः, पक्षः, दिवस इति ।

End. मूलभूतानि पद्यानि विकृतानि क्वचित् क्वचित् ।
निर्विकाराण्यपि नवान्यपुक्तान्यत्र कानिचित् ॥
मीमांसाधर्मशास्त्रज्ञाः सुधियोऽनलसा बुधाः ।
कृतकार्याः प्राङ्निबन्धेस्तदर्थं नायमुद्यमः ॥
य पुनर्मन्दमतयोऽलसा अज्ञाश्च निर्णयम् ।
धर्मं वेदितुमिच्छन्ति रचितस्तदपेक्षया ॥
निबन्धोऽयं धर्मसिन्धुसारनामा सुबोधनः ।
अमुना प्रीयतां श्रीमद्विट्ठलो भक्तवत्सलः ॥
प्रेम्णा सद्भिर्यन्यः सेव्यः शब्दार्थतः सदोषोऽपि ।
संशोध्य(?) वापि हरिणा सुदाममुनिसतुषष्टथुकमुष्टिरिव ॥
श्रीकाशुपाध्यायवरो महात्मा बभूव विद्वद्द्विजराजराजः ।

तस्मादुपाध्यायकुलावतंसो यज्ञेश्वरोऽनन्त इमावभूतां ॥
यज्ञेश्वरो यज्ञविधानदक्षो दैवज्ञवेदाङ्गसुशास्त्रशिक्षः ।
भक्तोत्तमोऽनन्तगुणैकधामानन्ताङ्घ्रयोऽनन्तकलावतारः ॥
एषोऽत्यजज्जन्मभुवं स्वकीयां तां कौङ्कणाख्यां सुविरक्तशाली ।
श्रीपाण्डुरङ्गे वसतिं विधाय भीमातटे मुक्तिमगात्सुभक्त्या ॥
तस्यानन्ताभिधानस्योपाध्यायस्य सुतः कृती ।
काशीनाथाभिधो धर्मसिन्धुसारं समातनोत् ॥

Colophon. श्रीमत्काश्युपाध्यायसूरिसूनुयज्ञेश्वरोपाध्यायानुजानन्तोपाध्यायसूरिसुतकाशीनाथोपाध्यायविरचिते धर्मसिन्धुसारे तृतीयपरिच्छेदोत्तरार्द्धं समाप्तम् ॥

विषयः । १ परिच्छेदे, काल-सङ्क्रान्ति-व्रत-तिथीष्टि-याग-श्राद्ध-ग्रहणादिनिर्णयः । २, तृतीयाचतुर्थ्यादितिथिव्रतविशेषमन्वादि-दशावतारजयन्ती-दमनोत्सव-चैत्रवैशाखादिद्वादशमासकृत्य-प्रकीर्णकनिर्णयः । ३, पूर्वार्द्धे, गर्भाधानायुद्वाहान्तसंस्कारदन्तधावनस्नानहोमादिनित्यकृत्य-स्थालीपाक-बलिवैश्वदेवादि-वापीकूपतडागायुत्सर्ग-मालासंस्कार-स्थिरदेवप्रतिष्ठादि-राजाभिषेक-यात्रा-गोचरफलाद्भुतशांत्यादिनिर्णयः । ४ उत्तरार्द्धे, जीवत्पितृकर्त्तव्यकर्म-श्राद्धाधिकारिश्राद्धकाल-श्राद्धपद्धति-सूतकान्त्येष्टि-प्रायश्चित्त-सन्यासग्रहणादिनिर्णयः ॥

No. 774. प्रयोगरत्नीयचरकसौत्रामणी, वा बोधायनचरकसौत्रामणी ।

Substance, country paper, 10 × $4\frac{3}{4}$ inches. Folia, 3. Lines, 16 on a page. Extent, 150 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Prayogaratnía-charaka-sautrámaṇi alias *Bodháyana-charakasautrámaṇi*. This is a chapter of a comprehensive work called *Prayogaratna*, or a manual for the performance of religious rites. The chapter under notice treats of the ceremony named *Sautrámaṇi*, in which the principal offering is a spirituous liquor made from rice, *i. e.*, a kind of arrack. By S'eshanáráyaṇa. The author follows the rules of Bodháyana.

Beginning. सौत्रामणीं व्याख्यास्यामः । पूर्वेद्युर्नान्दीश्राद्धाद्यपरेद्युः स्नानादिनिविष्टमित्यन्ते चरकसौत्रामण्या यजे इत्युपव्याहरणम् ।

End. इति पूर्णाहुतिं हुत्वा समारोप्यायतने मथित्वा विहृत्य मनस्वतीं हुत्वा सायमग्निहोत्रं जुहोति । सन्निष्ठते सौत्रामणी ।

Colophon. इति श्रीम॰शेषनारायणोक्ते प्रयोगरत्ने चतुर्थः ।

इति बोधायनचरकसौत्रामणी समाप्ता ॥

विषयः । सौत्रामणीष्टिप्रयोगः ॥

No. 775. अग्निप्रयोगः ।

Substance, country paper, $10\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 29. Lines, 11 on a page. Extent, 750 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Agniprayoga. A manual for the performance of the Agnishṭoma rite, according to the rules of Bodháyana. Anonymous.

Beginning. बोधायनं नमस्कृत्य व्याख्यास्यं पुरातनान् ।

अग्निप्रयोगं वक्ष्यामि विष्णुदत्तान्वयोऽग्निचित् ॥

उक्तः सर्वप्रकृतिभूतो ज्योतिष्टोमोऽग्निष्टोमः । अथेदानीं सर्वप्रकृतिविकृति-साधारणमग्निष्टोमेन सह व्याख्यातुमारभते ।

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति) ।

विषयः । अग्निष्टोमप्रयोगः ॥

No. 776. रसहेमः, वा कङ्कालीरसहेमः ।

Substance, country paper, 12 × 5 inches. Folia, 16. Lines, 20 on a page. Extent, 1200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Rasahema alias *Kañkálirasahema.* A pharmacopœia of mercurial and other metallic preparations. The MS. is incomplete. It gives receipts for upwards of two hundred kinds of metallic compounds.

Beginning. श्रीभैरवं प्रणम्यादौ सर्वज्ञं त्रिजगत्प्रभुम् ।

श्रीभारतीञ्च विघ्नेशं वन्दे प्रत्यूहशान्तये ॥

अथ ध्यायन् समायातः श्रीकङ्कालीययोगिनः ।

हविष्यान्नं भुवि स्वापं हविष्यञ्चापि भोजनम् ॥

क्रियाभ्रष्टे न सिध्यन्ति तपोनिष्ठे फलन्ति हि ।
सूतदोषांस्ततः शुद्धिं संस्कारान् प्राग् वदाम्यहम् ॥

End. (खण्डितत्वात्परिसमाप्तिवाक्यादि नास्ति ।)

विषयः । पारदलोहादिद्रव्यद्वारा नानाविधरसायनौषधनिर्माणप्रकारः ।

No. 777. उपग्रन्थसूत्रम् ।

Substance, country paper, 10½ × 4 inches. Folia, 36. Lines, 7—8 on a page. Extent, 1600 s'lokas. Character, Nágara. Date, Sm. 1642. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Incorrect.

Upagrantha Sútra. A sútra work treating of expiations and details in connexion with various Kalpa rites.

Beginning. अथ सम्यत्सिद्धिरनादेशे स्तोत्रीयातः शते विशेषसङ्ख्यासमस्त्राख्ये प्रत्येकमर्च्छा-द्विनियमो ज्योतिष्टोमेन वतमुक्थे त्रिपञ्चाशे—इत्यादि(?) ।

End. पुरीषपदशेषाणि निधानान्याचार्याः स्वरितान्तानि यथाधीतं वा तेषु रीपाच्च विध्यच्छेदोधिकाराद्वागन्तोवागतः(?) ॥ १३ ॥

Colophon. इत्युपग्रन्थसूत्रे चतुर्थः प्रपाठकः । इत्युपग्रन्थसूत्रं समाप्तम् ॥

विषयः । १ प्रपाठके, गायत्र्यादिच्छन्दःकथनं, यज्ञत्रुटिनिमित्तकप्रायश्चित्तोक्तिः; सत्राय दीक्षितेन कर्त्तव्यादि च । २, अक्रीतसोमापहरणप्रायश्चित्तं, सोमकलशे भग्ने प्रायश्चित्तादि, सोमे दग्धे प्रायश्चित्तं, पृष्ठानुकल्पादि च । ३, वैश्यवर्णकल्पोक्तिः प्रवर्ग्यशंसये कर्त्तव्यम्, एकाहस्तोत्राणि, षड्हकृत्यं, द्वादशाह-षड्हद्वयन्तरपृष्ठ-स्तोत्रीयादिकथनं, गानेक्षरपदिर्लोपश्च तन्न्यायसमुद्देशव्याख्यादि । ४, प्रति-हारोदाहरणकथनादि ॥

No. 778. उत्सर्गमयूखः ।

Substance, country paper, 10 × 5 inches. Folia, 26. Lines, 8—9 on a page. Extent, 520 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Utsarga Mayúkha. Directions for consecrating tanks, wells, &c., and purifying them should they happen to be polluted by the death of a monkey, or a cat, or by other cause. By Nílakaṇṭha Bhaṭṭa. *Vide* No. 761 for another work of this author.

Beginning. उक्त्वा दानविधिन्नाम राममाराध्य भास्करं ।
उत्सर्गविषये भट्टनीलकण्ठो वदत्यथ ॥ तत्र जलाशयोत्सर्गप्रशंसा विष्णुधर्मोत्तरे ।

End. ततोऽभिषेकग्रहपूजाग्निपूजाविसर्जनशय्यादानमण्डपाद्युपस्करप्रतिपत्तिविप्रभोजनभूयसीदानकर्मेश्वरार्पणानि जलाशयोत्सर्गवत् ॥

Colophon. इति श्रीमीमांसकभट्टनीलकण्ठकृते भास्करे जलाशयारामोत्सर्गमयूखः ।
इति उत्सर्गमयूखः समाप्तः ॥

विषयः । वापीकूपतड़ागाद्युत्सर्गस्य विधिः प्रयोगश्च, वाप्यादिषु मार्जारवानरादिमृतकाद्युपघाते तत्प्रायश्चित्तकथनं च ।

No. 779. मोमहणविलासः, व्याख्यासहितः ।

Substance, country paper, $9\frac{3}{4} \times 5\frac{1}{4}$ inches. Folia, 160. Lines, 9—10 on a page. Extent, 8000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Momahaṇavilása. A treatise on the diseases peculiar to women and children, and on aphrodisiacs. By Momahaṇa, son of Prayágadása, a Kshatríya of Kálpi. The work was completed on Saturday, the 4th of the month of Chaitra, 1468, during the reign of Muhammad Sháh, son of Firuz Sháh.

Beginning. यं स्मृत्वा ललितां प्रजापतिरिमां सृष्टिं व्यधान्मानवीं
श्रीकण्ठस्त्रिघकान्यदनुजश्रेणीं जघान द्रुतम् ।
चक्रे रणमरुर्दुर्हृदा सुरहा चक्रे च्युतस्वञ्जयं (?)
तं प्रत्यूहनिवृत्तये गणपतिं वन्देऽहमिष्टप्रदं ॥
यत्कर्मातालपयनादुद्धता(?) वारिराशयः सप्त ।
एकीयन्ति युगान्ते तमहं वन्दे गणेशानं ॥
चत्रान्वये वीहलगोत्रजन्मा प्रख्यातकीर्त्तिः किल वाघलाख्यः ।
आसीद्यदाख्यां बिभराम्बभूवुस्तद्वंशजाः सन्ति हि वाघलाख्याः ॥
यद्वंशजानां भूत्यर्थं बभूव कुलदेवताः ।

मरोट्टवासिनी देवी सर्वदुर्हन्निकृन्तनी ॥
तस्य कुलेऽतिथिभक्तः प्रसिद्धनामा बभूव हरिवाघलः ।
यस्य दानस्य तुलायां लघुतां भजतीह कर्णदानमपि ॥
तस्यात्मजोऽभूद्भिरामकान्तिः प्रयागदासो गुणवान् वदान्यः ॥
विरुदावली यस्य बभूव मच्यां मर्यादमेरुर्महिमसमुद्रः ।
तदङ्गजो मोमहणः प्रसिद्धो गुरुद्विजन्मातिथिदेवभक्तः ॥
बभूव यस्यार्थिजनाः प्रशंसां कुर्वन्ति सर्वत्र बहुप्रदस्य ।
मोमहणः कुतुकादिह मोमहणविलासनामानं ।
सकलजनहृदयद्रापितं(?) चकार सद्योगसङ्गहं रम्यम् ॥

End. अब्दे नागरसयुतीन्दुरचिते १४६८ पक्षेऽसिते चैत्रके
हेरम्बस्य तिथौ विकर्त्तनसुतस्याङ्गि न्यलोक(?) वै प्रजानां परैः ।
अत्रे मोमहणो व्यधाद्भुजजनुः सद्योगचूडामणिं
ग्रन्थं सद्भिषजां मतानि च बहून्यालोक्य वैद्यागमान् ॥
कालिन्द्या रुचिरे सुदक्षिणतटे सद्रत्नविद्युद्युता
नाम्नाभूत् किल कालपोतिनगरी ख्याता धरामण्डले ।
तस्यां कालपिदेवतं निवसति प्रायः स्वयं सर्वदा
लोकानामभिलाषदं सुरजनैः संसेवितं सत्प्रभं ॥
भूपालो महमूदसाहिरभवत्योरोजापानात्मजः
सार्द्धं योद्धुमलं न हिन्दुकजनास्तेनाभवन् सङ्गरे ।
तस्योर्जत्करिवृन्दवृंहितमिहाश्वानाञ्च ह्रेषारवं
श्रुत्वा यान्त्यरयो ध्रुवं जलनिधेः पारस्य तीरे ध्रुवं ॥

Colophon. इति कालपीग्रामवस्तव्यक्षत्रियप्रयागदासात्मजमोमहणविरचिते महमूदसाहि-राज्ये मोमहणविलासनामग्रन्थः समाप्तः ।

विषयः । १ प्रथमे अधिकारे, शुक्रवृद्धिकरौषधादिकथनं । २, शुक्रस्तम्भकौषधकथनं । ३, लिङ्गवृद्धिदार्ढ्यकथनं, स्त्रीकुचनितम्बवृद्धिकथनञ्च । ४, लिङ्गस्तब्धकारकौ-षधकथनं । ५, षण्ढत्वनाशकौषधकथनं । ६, बन्ध्यात्वनाशकौषधकथनं, गर्भ-रक्षार्थं मन्त्रौषधप्रयोगः, भगसङ्कोचविधिः, स्त्रीरोगचिकित्सादि च । ७, बाल-रोगचिकित्सोपयोग्यौषधमन्त्राकिकथनं । ८, बालग्रहचिकित्साप्रकारः । ९, २०, डाकिनीचिकित्सादिप्रकारः । ११, बालग्रहादिनिवारणार्थं कतिपय-मन्त्रोक्तिः, माहेश्वरादिधूपनिर्माणविधिश्च ॥

No. 780. कात्यायनसूत्रपद्धतिः ।

Substance, country paper, 12 × 4¾ inches. Folia, 55. Lines, 14 on a page. Extent, 3000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Kátyáyana-Sútra-Paddhati. A guide to the performance of the ceremonies described in the Kalpa Sútra of Kátyáyana. By Devayájñika, son of Prajápati. The MS. is incomplete and contains only the first portion of the work. The first two folia are wanting.

Beginning. (प्रथमतः पत्रद्वयं खण्डितं) ।

End. प्रातर्होमस्तु स्वकाल एव । अत ऊर्द्ध्वं सन्ध्यातर्पणवैश्वदेवादिनित्यक्रियायामधिकारः । नातः प्राग् भवतीति शिवम् ।

Colophon. इति श्रीचिरग्निचिन्महायाज्ञिकश्रीप्रजापतिसुतश्रीदेवयाज्ञिककृतायां कात्यायनसूत्रपद्धतावग्निष्टोमः समाप्तः ।

विषयः । दीक्षितकर्त्तव्येष्टिः, अवभृथपर्यन्तदीक्षितनियमाः, महावीरसम्भरणं, प्रायणीयेष्टिः, आतिथ्येष्टिः, प्रवर्ग्यचरणं, प्रैषमन्त्रविशेषाः, अध्वर्यार्गादोहनार्थं, गमनादि, प्रवर्ग्यकरणे घर्महोमः, उपसदिष्टिः, प्रवर्ग्यशान्तिः हविर्धाननिष्पादनं, उपरवखननं, सदःकरणं, सदोमानादि, अग्निस्थाननिष्पादनं, आग्नीध्रीयादिस्थानकरणं, अग्नीषोमीयेष्टिः, अभिषवेष्टिः, प्रातःसवनं, माध्यन्दिनसवनं, तृतीयसवनं, अवभृथेष्टिः, उदयनीयेष्टिः, अनुबन्ध्येष्टिः, पयस्येष्टिः, इत्यादीनां विवरणम् ॥

No. 781. अनुमानमणिदीधितिव्याख्या, शिरोमणिमूलसहिता ।

Substance, country paper, 13 × 5¼ inches; some of the leaves are yellow. Folia, 460. Lines, 12-14 on a page. Extent, 18,130 s'lokas. Character, Nágara. Date, Sm. 1828. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Anumána-maṇi-didhiti-vyákhyá. A commentary on Raghunátha S'iromaṇi's *Anumána-maṇi-didhiti.* By Bhavánanda Síddhántavágís'a. *Vide* ante I, p. 285.

Beginning. श्रीगोविन्दपदाम्भोजनखचन्द्रमरीचयः ।
मच्चरिष्णोस्तमस्यन्ते मम सन्त्ववलम्बनम् ॥
नमस्कृत्य गुरून् सर्वान् निगूढं मणिदीधितौ ।
श्रीभवानन्दसिद्धान्तवागीशेन प्रकाशिता ॥

शिरोम॰प्रा॰ ॐ नमः सर्वभूतानि विष्टभ्यपरितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥ १ ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणां ।
दीधितिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥

मू॰प्रा॰ प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते ।

End. नीलविशिष्टे धूमेऽपि विशेष्यत्वस्योपाधेः सत्त्वेन निरुपाधित्वं साधनव्यापकत्वा-दिति विशेष्यत्वयाटस्य(?) प्रामाणिकत्वात्तदपेक्षितं भट्टाचार्यशिरोमणिभिरिति ।

Colophon. इति श्रीमद्दामहोपाध्यायसिद्धान्तवागीशभवानन्दविरचितानुमानमणिदीधिति-व्याख्या समाप्तिं पफाण ।

शि॰ म॰ तथापि जन्यत्वशरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न तत्र बकल्पभावसम्भव इत्यत्र तात्पर्यम् ।
इति श्रीमन्महामहोपाध्यायशिरोमणिकृतानुमानमणिदीधितिः सम्पूर्णा ।

मू॰ म॰ एकवृत्तित्वात् अवच्छेदेन वृत्तिरत्रापि तुल्या तत्र देशभेदेनात्र समयभेद इति ॥

विषयः । अनुमानमणिदीधितिव्याख्यानम् ।

No. 782. राक्षसकाव्यं, सटीकं ।

Substance, country paper, 9¼ × 4¼ inches. Folia, 6. Lines, 13—14 on a page. Extent, 175 s'lokas. Character, Nágara, Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Rákshasa-kávya. A poem of 20 stanzas in which a forester describes various pastoral objects for the gratification of his mistress. By Vararuchi Kavindra. The author is said to be the same person who formed one of the "nine jewels" of Vikramáditya. The MS. is in the *trivallí* form, and has a running commentary on the text.

Beginning. टीका॰ कश्चिदित्यनिर्दिष्टनामा तुरुषः इमां वक्ष्यमाणां गां वाचं वनितां बभाष उक्तवान्। किं कुर्वन् वनं काननं विचरन्। इत्यादि।

मूल॰ कश्चिदनं बहुवनं विचरन् वयस्थो वश्यां वनात्मवदानां वनितां वनार्द्धाम्। इत्यादि।

End. टीका॰। उत्तमवच उक्तं कथमपि त्वां भूयः किं कृत्वा दिनं दिवसं तया प्रियया सह रमित्वा, कथम्भूतः अभीक्ष्णः पुष्टाङ्ग इत्यर्थः। हीति पादपूरणे ॥ २० ॥

Colophon. इति श्रीवररुचिकवीन्द्रेण विरचितेन(?) राक्षसकाव्यं समाप्तं। शुभं। टीका समाप्ता।

मू॰ एतावदुत्तमवचः सुमनाः स उक्त्वा रन्त्वादिनं सह तया प्रियया ह्यभीक्ष्णम्। युक्तश्चतुर्भिरनडुद्भिरदीनवद्भिरारुह्य यानमथ सम्प्रययौ स्वगेहे ॥ २० ॥

टीका॰ इति श्रीवररुचिकवीन्द्रेण कृतं राक्षसकाव्यं समाप्तम्।

विषयः। कश्चिद्वयस्थो वनस्थः पुरुषो विचरन् वनजान् वृक्षादीन् प्रदर्शयन् तद्वर्णनं वनितां श्रावयति।

No. 783. यज्ञप्रायश्चित्तविवरणं।

Substance, country paper, 9¼ × 4 inches. Folia, 42. Lines, 13 on a page. Extent, 1250 s'lokas. Character, Nágara. Date, Sm. 1783. Place of deposit, Calcutta, Government of India. Appearance, old. Prose, Generally correct.

Yajñapráyas'chitta vivaraṇa. A treatise on expiations for flaws in the performance of the Darsa, Paurṇamása and other ceremonies. By Gopála. The MS. comprises three Prasnas, the first having 11, the 2nd 10, and the 3rd 8 chapters; but from the style of its commencement and end, it would seem that this is only a part of a larger work. Contents: I. 1, General expiations necessary where no special expiation has been ordained. 2, Expiation for not using the ordained number of pots. 3, Expiation for breakage of the wood used in producing fire by friction. 4, Expiation for defects in Agnihotras, &c. 5—6, Expiations for defilement of the wood for producing fire. 7—11, Expiations for defilement of oblatory articles; do. for suspicion of such defilement or for their use irregularly; and for their being spoiled in cooking.—II. 1, Expiation for rites performed by a consumptive person. 2, Expiation for absence from home for more than a year. 3, Expiation for defects in the Purodás'a for the Nakshatra ishṭi. 4, Expiation for

substitutes 5, Expiations for animals intended for sacrifice. 6, Expiation for Cháturmásyá vrata, or the quadrimensial fast. 7, Expiation for defects in the initiation of the Adhvaryu. 8, Expiation for accidents in cooking offerings. 9. Expiation for defects in the use of mantras. 10, Optional courses. III. 1, Expiation for accidents to the cooking pot. 2, Expiation for irregularities in the actions of the priests. 4, Expiation for accidental omission of oblations. 5, Expiation for accidental blowing out of the fire when produced by friction. 6, Expiation for use of ordinary fire in rites. 7, Expiation for omission of particular rites. 8, Duties of persons who have established the sacred fire, when they are about to start on a journey.

Beginning. अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः । उक्तानि दर्शपूर्णमासादीनि कर्माण्यनन्तरं तेषामकरणेऽन्यथाकरणे प्रायश्चित्तानि व्याख्यास्यामः ।

End. एवं हि श्रूयते, मलवद्वासमानसंवदेत न सहासीत नास्या अन्नमद्यादित्यारभ्याभ्यञ्जनप्रभृतिगृह्यकाममन्यदित्युक्तम् । अन्यत्सहासनादिति भवस्वामिना व्याख्यातम् ।

Colophon. इति श्रीगोपालकृते यज्ञप्रायश्चित्तविवरणे तृतीयप्रश्नस्याष्टमोऽध्यायः ।
त्रुटितोऽयं ग्रन्थः । खण्डः २ (आदर्शे लिखितमित्थम्)

विषयः । १ प्रश्ने ।—१ अध्याये, अनुक्तप्रायश्चित्तस्यलकर्त्तव्यसाधारणप्रायश्चित्तं । २, कपालविधिन्यूनाधिक्ये प्रायश्चित्तानि । ३. अरणिभङ्गादिप्रायश्चित्तं । ४, अग्निहोत्रादिप्रायश्चित्तं । ५. ६, अरण्यमेध्यस्पर्शप्रायश्चित्तं । ७, ८ हविषि दुष्टे प्रायश्चित्तं । ९, हविर्दोषशङ्कायां हविर्द्रव्यहोमव्यतिक्रमे च प्रायश्चित्तं । १०, सान्नाय्यप्रायश्चित्तं । ११, हविर्विकृत्यादिप्रायश्चित्तम् ।

२ प्रश्ने ।—१ अध्याये. क्षयरोगग्रस्तान्यदारासक्ताहिताग्निकर्त्तव्यप्रायश्चित्तं । २, संवत्सरातिरिक्तप्रवासे प्रायश्चित्तं । ३, पुरोडाशभेदेन कृता आयुष्मत्या नक्षत्रेष्टयः । ४, आग्रयणानुकल्पहरितयवादिद्रव्यकथनं । ५, पशुप्रायश्चित्तं । ६' चातुर्मास्यव्रतानि । ७, अध्वरदीक्षानियमभङ्गप्रायश्चित्तकथनं । ८, सर्वयज्ञानां स्कन्नभिन्नतप्तदुष्टादिगुणविशिष्टहविःप्रायश्चित्तं । ९, मन्त्रहीनादिप्रायश्चित्तं । १०, विहितकालद्रव्याद्यनुकल्पकथनं ।

३ प्रश्ने ।—१ अध्याये, हविर्धानीभग्नादिप्रायश्चित्तं । २, होतृमैत्रावरुणादीनां स्वस्वकर्त्तव्यकर्मव्यतिक्रमे प्रायश्चित्तं । ३, होमाहुतिविस्मृतिप्रायश्चित्तं । ४, हुताहुतसोमसंसर्गप्रायश्चित्तं । ५, अरणिसमारूढाग्निनाशप्रायश्चित्तं । ६, लौकिकाग्निहोत्रविधिः । ७, अग्निहोत्रकालेऽग्निहोत्रक्रियाऽकरणे प्रायश्चित्तं । ८, आहिताग्नेः प्रयाणे कर्त्तव्यम् ।

No. 784. प्रश्नवैष्णवः ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 24. Lines, 9 on a page. Extent, 480 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, nearly new. Verse, Generally correct.

Prasnavaishṇava. Astrological questions and answers founded on the Várahi Saṅhitá, the Tájika and other standard works. By Nárá-yaṇa Gosáiñ Nṛipatí. The MS. is imperfect.

Beginning. नारायणं परमपूरुषमादिदेवं ज्योतिर्मयं शुभकरञ्च चराचरेशम् ।
शान्तं प्रणम्य शिरसा द्विजपुङ्गवानां प्रश्नार्णवप्लवमहं प्रकरोमि शास्त्रम् ॥ १ ॥
श्रीब्रह्मदासनयजातनयः सुविद्वान् श्रीमान् गुसांयिन्दपतिर्यदुनाथभक्तः ।
वाराहनाजिकमुकुन्दमतं समीक्ष्य नारायणः परमशास्त्रमिदं चकार ॥ २ ॥
प्रष्टा प्रणम्य हरिमिन्द्रककुप्सुखस्थो ज्योतिर्विदं सकलशास्त्रकलाविदग्धं ।
आह्वय सद्भवि हितं फलपुष्परत्नहस्तः प्रसन्नवदनः सकृदेव पृच्छेत् ॥ ३ ॥
लग्ने चरे च हृतलाभ ऋणास्यदार्थनाशो गदक्षयगमागमबन्धमोक्षाः ।
प्रष्टुर्भवन्ति परचक्रमुपैति शीघ्रं रोगी च जीवति कलिः शमते नु भूयः ॥ ४ ॥

End. (खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति) ।

विषये। १ अध्याये, प्रश्नकालीनलग्नादिभावस्थितरव्यादिग्रहद्वारा शुभाशुभकार्यसिद्धि-कथनं । २, धनलाभ-राज्यलाभ-दृपमन्त्रिस्नेह-राज्यचलाचल-दृपदर्शनादि-प्रश्नफलकथनं । ३, ४, जयपराजयप्रश्नफलकथनं । ५, ग्रहवधादिज्ञानार्थं सङ्कटचक्रकथनं । ६, राज्यभंशकरनिमित्तकथनादि । परचक्रागमनादिप्रश्न-फलम् ।

(२४ पत्रेषु एते विषयाः सन्ति । इतः परं खण्डितत्वात् परग्रन्थविषया न प्राप्तः ।)

No. 785. भास्वती, टीकासहिता ।

Substance, country paper, $11\frac{3}{4} \times 6$ inches. Folia, 64. Lines, 11 on a page. Extent, 1920 s'lokas. Character, Nágara, badly written. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Incorrect.

Bhásvatí. A treatise on astronomy and astrology. By Satá-nanda, son of S'aṅkara by Sarasvatí. Attached to the work is a com-

mentary entitled *Bálabodhiní* by Balabhadra, son of Vasanta, and grandson of Vimalákara of the Kaus'ika gotra. The text was written in the S'aka year 1021, = A. D. 1099 and the commentary was completed on Thursday, the 2nd of the wane in the month of Chaitra, Samvat year of Víkramaditya, 1465, = A. D. 1521, in the town of Umá, in the country of Jámila, during the reign of the Sháhi dynasty.

Beginning· टीका प्रा० । आदिमध्यान्तशून्याय त्रिधाविग्रहधारिणे ।
ग्रहर्त्तादिस्वरूपाय नित्याय हरये नमः ॥ १ ॥
आसीद् द्विजन्मा विमलाकराख्यः ख्यातः सुशीलो द्विजदेवभक्तः ।
तस्यात्मजः श्रीहरिपादभक्तो नित्यं हराराधनसक्तचित्तः ॥ २ ॥
त्रिस्कन्धज्ञः श्रीमान् दैवज्ञः श्रीवसन्त इति नामा ।
शास्त्रार्थविद्गुणवान् गुरुपादार्चने सदा निरतः ॥ ३ ॥
बलभद्रस्तस्य सुता हरिगुरुचरणारविन्दकृतसेवः ।
कुरुते गुणोपयुक्तां सङ्क्षिप्तां भास्वतीं टीकां ॥ ४ ॥
इह तावद् ग्रन्थारम्भे निर्विघ्नपरिसमाप्तिमुद्दिश्य स्वेष्टदेवतानमस्कारपूर्वकं मङ्गलाचरणमात्मनामकथनमङ्कपिण्डानयनञ्च श्लोकेनैकेनाह । नत्वेति ।

मूलप्रा० नत्वा मुरारेश्चरणारविन्दं श्रीमाञ्छतानन्द इति प्रसिद्धः ।
तां भास्वतीं शिष्यहितार्थमाह शाके विहीने शशिपक्षखैकैः ॥ १ ॥

End. टीका स० । श्रीमान् शतानन्दनामा गणितसिद्धान्तवित् सरस्वतीशङ्करयोस्तनूजः ।
सरस्वती मातुर्नाम, शङ्करः पितुर्नाम, तयोस्तनूजः पुत्रः, इमां भास्वतीं कृतवान् ।
व्याख्यायां यन्मयात्युक्तं यच्च युक्तिविवर्जितं ।
भ्रान्त्या वा लिखितं यच्च तत्कार्यं क्षम्यतां बुधैः ॥

Colophon. इति बलभद्रविरचितायां प्रतिलेखाधिकारोऽष्टमः ।
रसवह्निनिधौ शाके मार्गशीर्षमासे शुक्लेऽष्टम्यां सोमवासरेण ।
लिखितं बलभद्रेण—
शररसमनुमितशाके चैत्रे शुक्लेतरद्वितीयायां ।
गुरुवासरे सम्पूर्णा कृतवान् बलभद्रकेण सा टीका ॥
स्वरशशिशक्रसमेते शाकेऽज्ञातोच्चताकुले जन्म(?) ।
वसुयुगवर्षेण मया रचिता बालावबोधिनी विमला ॥
श्रीविक्रमादित्यशाके १४६५ चैत्रमासस्य कृष्णद्वितीयायां तिथौ जीववासरे श्रीमहाराजाधिराजश्रीमानसाहिभुज्यमाने श्रीमज्जुमिलादेशे उमासञ्ज्ञकनगरे

श्रीमत्सकलविद्याविशारदकौशिकान्वयजन्मादैवज्ञसस्यात्मजो बल्लभद्रनामा ज्योतिर्वित्तेन इमां बालबोधिनीं भास्वतीटीकां कृतवान् ।

इति श्रीवसन्तात्मजबल्लभद्रदैवज्ञविरचितायां भास्वतीटीकायां परिलेखाधिकारोऽष्टमः समाप्तः ॥

मूलस० खखाश्विवेदाब्दगते युगाब्दे दिवोक्तितः श्रीपुरुषोत्तमस्य ।
श्रीमान् शतानन्द इतीदमाह सरस्वतीशङ्करयोस्सनूजः ॥ १० ॥

विषयः । १ अधिकार तिथिध्रुवानयनं । २, ग्रहध्रुवानयनं । ३, तिथिनक्षत्रानयनं । ४, ग्रहस्फुटकरणं । ५, प्रश्नफलकथनं । ६, ७, ग्रहणविवरणं । ८, स्पर्शमोक्षसमयनिर्द्धारणादि ।

No. 786. पदगाढः ।

Substance, country paper, $8\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 74. Lines, 7 on a page. Extent, 740 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, nearly new. Prose. Generally correct.

Padagádha. Vedic measures. Anonymous.

Beginning. इदानीं सर्वसामानि । अमितौजा अङ्गिरा नीवया गभीरवेपा वृहच्छ्रवा नोधादमूना नवेदा अद्वया दीर्घतमाः शृथुपाजा वृमणा वृतमाः सुमना विमनाः सुवासा गृध्रग्रा नया उषाः पन्या भोजा ऋभुक्षायन्द्रमा अप्सराः सजोषा जातवेदा इति सर्वत्र विसर्जनीयाः ।

End. राजन् राष्ट्रञ्च राश्मिश्च रायो रायरथर्यसि ॥
रराति रपसो राज्ञो रभस्वद्रस्वभस्वान् ।
रसररावाथ रराव्ण रवथेन ररपांसि च ॥ रथो सप्तविंशतिः ।

Colophon. इति पदगाढः समाप्तः ।

विषयः । सर्वसमान-सर्ववृत्तवाच्यानामृचां कथनं, द्विसङ्ख्यादिपञ्चाशत्सङ्ख्यान्तितत्तन्नामवाच्यानामृचां कथनं, पूर्वापराख्यनामवाच्यानामृचां कथनं, अखण्डितनामवाच्यानामृचां कथनं, खण्डितनामवाच्यानामृचां कथनं, द्विपदनामवाच्यानामृचां कथनं, पदच्छेदप्रकारदर्शनं, अथशब्दवतीनां सप्ताशीत्यृचां कथनञ्च ।

No. 787. दैवज्ञचिन्तामणिः ।

Substance, country paper, $7\frac{3}{4} \times 4\frac{3}{4}$ inches. Folia, 63. Lines, 11—12 on a page. Extent, 950 s'lokas. Character, Nágara. Date, SM. 1870. Place of deposit, Calcutta, Government of India. Appearance, nearly new. Verse. Generally correct.

Dairajña chintámaṇi. A treatise on judicial astrology. By Yasodhara, son of Kañsárí Mis'ra. The MS. is incomplete.

Beginning. अथान्यं सम्प्रवक्ष्यामि फलं योगसमुद्भवं ।
मासवारतिथीनाञ्च सम्यग् ज्ञानप्रकाशकं ॥ १ ॥
प्रतिपदि रविवारे चैत्रमासे यदि स्यात्
न भवति बहुवृष्टिर्दुःखिता लोकसङ्घाः ।
अमृतकिरणवारे ज्ञस्फुजिद्वाक्पतीनां
भवति न तु धरित्री शस्यतोयाभिपूर्णा ॥ २ ॥

End. यदा च जायते पक्षत्रयोदशदिनात्मकः ।
तदा लोकातिघोराः स्यान्मण्डला च × मेदिनी (?) ॥ ५८ ॥

Colophon. इति श्रीकंसारिमिश्रात्मजमिश्रयशोधरविरचिते दैवज्ञचिन्तामणौ सामान्यग्रहकथनो नाम प्रकाशश्चतुर्दशः ॥ १४ ॥

विषयः । १ प्रकाशे, वैशाखादिद्वादशमासानां तिथिविशेषेषु वारनक्षत्रादिविशेषयोगे वृष्ट्यादियोगे च वा सति दुर्भिक्ष-राजविद्रोह-प्रजासुखदुःख-मारीभय-शस्यमहर्घ्यसमहर्घ्यतादिविविधशुभाशुभफलकथनं । २, प्रभवादिषष्टिसंवत्सरशुभाशुभफलं । ३, तत्तन्नक्षत्रविशेषकथनं । ४, रव्यादिग्रहाणां स्वभावादिवर्णनं । ५, नक्षत्रादिविशेषगतस्य सूर्यस्य ताम्रहरितादिवर्णदर्शने शुभाशुभफलं । ६, नक्षत्रराशिविशेषगतस्य वैवर्ण्यादिमतश्च चन्द्रस्य शुभाशुभफलं । ७, नक्षत्रविशेषराशिविशेषगतस्य किंशुकादिवर्णान्तरं गतस्य भौमस्य शुभाशुभफलं । ८, नक्षत्रविशेषराशिविशेषगतस्य आश्विनादिमासदृष्टस्य बुधस्य शुभाशुभफलं । ९, नक्षत्रविशेषराशिविशेषगतस्य गुरोः शुभाशुभफलं । १०, नक्षत्रराशिविशेषगतस्य ग्रहविशेषादियुक्तस्य शुक्रस्य शुभाशुभफलं । ११, नक्षत्रराशिविशेषगतस्य शनैश्चरस्य शुभाशुभफलं । १२, राशिविशेषादिगतस्य राहोः शुभाशुभफलं । १३, नक्षत्रविशेषदिग्विशेषगतस्य केतोः शुभाशुभफलं । १४, सूर्यादिग्रहाणां द्विच्छायगादिजनितशुभाशुभफलकथनं ।

No. VI.

NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA,

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, and of the Royal Academy of Science, Hungary; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME II.—PART III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS.

1873.

No. 788. जानक्यानन्दबोधनं ।

Substance, country paper, 10 × 3¾ inches. Folia, 264. Lines, 7 on a page. Extent, 2544 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Jánakyánanda-bodhana. A poem in twenty cantos, in which the river Ganges appears in human form before Sitá, during her exile in the hermitage of Válmíki, and consoles her by religious advice. By S'rípatigovinda.

Beginning. (प्रथमतः ५२ पत्राणि न सन्ति ।)

End. यथाशास्त्रं मया चित्ते जानकीजगदीशितुः ।
कृतं तेन सदा रामः प्रसन्नोऽस्तु गुरुर्मम ॥ ७२ ॥
यदस्मिन् सौष्ठवं भाति तद्गुरोरेव मे न हि ।
यच्च निन्द्यं भवेदत्र तन्ममैव गुरोर्न हि ॥ ७३ ॥
इति गोविन्दसङ्गीते जानक्यानन्दबोधने ।
लयाख्यो विंशतितमस्तरङ्गो रङ्गदायकः ॥ ७४ ॥

Colophon. इति श्रीपतिगोविन्दविरचित जानक्यानन्दबोधने भागीरथीजानकीसंवादे विंशतितमस्तरङ्गः ।

विषयः । अस्मिन् ग्रन्थे वाल्मीक्याश्रमे परित्यक्तया जानक्या सह मूर्त्तिमत्या गङ्गायाः प्रबोधवाक्योक्तिः । अत्र २० तरङ्गाः सन्ति । तत्र ५२ पत्राणां खण्डितत्वात्तरङ्गत्रयस्य विषयो न प्राप्तः । ४, तरङ्गे, आत्मानात्मादिकतिपयपदार्थनिर्णयं वेदान्तमतेन नैयायिकं बोधयन् कथयति । ५, श्रुतिस्मृतिपुराणादिवाक्योपन्यासेन ज्ञानस्यैव मोक्षकारणत्वोपपादनं । ६, वेदपुराणादिवाक्यैर्नारायणस्यैव मोक्षकारणत्वोपपादनं । ७, वेदपुराणादिवाक्यैर्हरस्य हर्यभिन्नत्वस्य जगत्कारणत्वादेश्च प्रतिपादनं । ८, मनोलयप्रकारकथनं । ९, बन्धमोक्षकारणकथनादि । १०, अहन्नोत्पत्तिनिरासकवाक्योक्तिः । ११, पञ्चवटीवृत्तान्तकथनादि । १२, सीतारामयोः पूर्ववृत्तरहस्यरासलीलाकथनं १३, रामस्य सखीगणपरिवृतया सीतया जलकेलिकथनादि । १४, १५, १६. नानाविधशान्तिवाक्यैर्जानक्याः पुनः प्रबोधनादि । १७, वासनाक्षयप्रकारकथनादि । १८, सर्वत्र रामभावनाकथनादि । १९, रामस्य सर्वात्मकादिवर्णनं । २०, परमात्मभावनादिकथनञ्च ।

No. 789. काव्यकामधेनुः ।

Substance, country paper, $10\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 30. Lines, 14 on a page. Extent, 1200 s'lokas. Character, Nágara. Date, Sm. 1671. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose and verse. Generally correct.

Kávyakámadhenu. This work has already been noticed in the first volume, (No. 358,) but the MS. examined for that notice having been very defective, the initial and the final words there given, are not correct. The following supplies many details about the work and its author.

Beginning. येनाऽवियद्विकरणैराख्यातैर्द्धातुलोचितैः ।

प्रकाशैः सम्प्रकाश्यन्ते क्रियासन्नौमि गोपितम् ॥ १ ॥

कविकल्पद्रुमं धातुपाठं विरचितुं निजं ।

धातुवृत्तिः काव्यकामधेनुर्नाम विधीयते ॥ २ ॥

तत्र प्रयोगा धातूनामित्क्रमादित्फलायिताः (?) ।

शम्निपोस्त्वनितां तुल्यप्रयोगाणां सभेदकाः ॥ ३ ॥

तत्रादौ ग्रन्थकृदुचितेष्टदेवतामादित्यमुपास्ते ।———

शब्दाकरकरग्रामसमर्थमण्डलमण्डलं ।

ज्ञानात्माजमनाद्यन्तमादित्यं तमुपास्महे ॥

तमिति, तच्छब्दः प्रतिसमाधिसमयसङ्ग्रहसमर्थकत्वेनानुभूतस्य स्वरूपस्य प्रतिपादनाद्यच्छब्दं नापेक्षते । यथा, सेयं समाङ्गेषु सुधारमच्छदेत्यादौ । अथ पूर्वाचार्यान् जयवादेन धिनोति ।

इन्द्रचन्द्रः काशकृत्स्नापिशली शाकटायनः ।

पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥

अथ ग्रन्थस्वरूपं निरूपयति ।

मतानि तेषामालोच्य सर्वसाधारणः स्फुटः ।

धातुपाठस्वराद्याद्यक्रमादन्तादिमक्रमः ॥

कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यते (मया) ।

End. धूतूना (धातूना) मिह सौत्राणां द्विचत्वारिंशदीरिताः ।

धूतूनिर्द्धार्यैष्पसंचरति ।

इति स्फीतः सप्तदशशत्या षट्कोनषष्ट्या ।

धातुस्कन्धैर्बुधाः सेव्यः कविकल्पद्रुमः फलन् ॥

सप्तदशशतानां समाहारः सप्तदशशतो, षट्कोनषष्ट्याऽधिका षट्कोनषष्टा तया ।
धातव एव स्कन्धास्तैः । फलन् प्रतिस्कन्धं प्रयोगरूपाणि फलानि स(म पंयन् ॥

अथ ग्रन्थकृदात्मानं व्याख्यापयति ।——

विद्वद्वनेशशिष्येण भिषक्केशवसूनुना ।
तेने वेदपदस्थेन बोपदेवद्विजेन यः ।

यः कविकल्पद्रुमो बोपदेवद्विजेन तेने व्यस्तारि स मेव्य इति पूर्वणान्वयः ।

सम्पादयन्नोमङ्कादौ कार्त्तस्वरलसन्निधिं ।
अयध्वं विबुधाः कामकामधेनुमतन्द्रिताः ॥ १ ॥
व्युत्पादयन्तु शब्दज्ञास्तैस्तैः सूत्रैरुदाहृतीः ।
सर्वव्याकरणार्हायां नास्यां तान्यलिखं ह्यहं ॥ २ ॥
य एनामविदित्वेच्छेत्कर्त्तुं धात्वर्थनिर्णयम् ।
स वै मूढो विदां मध्ये ह्युपहासमवाप्नुयात् ॥ ३ ॥

Colophon. इति श्रीपण्डितबोपदेवविरचिता काव्यकामधेनुर्नाम धातुवृत्तिः समाप्ता ।

स्वर्गे गीर्वाणनाथः सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले शेषदेवं भुजगयुवतयो यस्य गायन्ति कीर्त्तिं ।
यस्तीर्णः शास्त्रपाथोनिधिमखिलमिमं गोष्पदं वा सुराद्रौ
शिष्योऽकार्षीद्वनेशः कविकुलतिलकः कैश्चिदिबोपदेवः ॥
गजाननं भूतगणाधिसेवितं कपित्थजम्बूफलसारभक्षितम् ॥
उमासुतं शोकविनाशकारणान्नमामि विघ्नेश्वरपादपङ्कजम् ॥

विषयः। इकारायनुबन्धद्वारा सेड्वेण्नेड्धातुनिर्देशः । अकारादिहकारपर्यन्तवर्णान्त-विन्यासक्रमण दशगणिधातूनां कथनं, सौत्रधातुकथनञ्च । (कविकल्पद्रुमनाम्नो धातुपाठग्रन्थस्य वृत्तिः काव्यकामधेनुनाम्नी । उभयोः कर्त्ता बोपदेव एव । ग्रन्थशेषे सर्वधातुपरिगणना च कृतास्ति ।)

No. 790. शार्ङ्गधरसंहिता ।

Substance, country paper, 12 × 5½ inches. Folia, 96. Lines, 13 on a page. Extent, 2470 s'lokas. Character, Nágara. Date, Sm. 1725. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

S'árṅgadhara Saṁhitá. Materia Medica and pharmacopœia in three parts. By S'árṅgadhara, son of Dámodara. Contents: Part I, Chapter 1, Weights and measures. 2, Dissertation on physicians. 3, Pulse, dreams, character of messengers who are to go for physicians; effects of particular omens when proceeding to treat a case. 4, Infusions and decoctions. 5, Nerves, arteries, veins, &c. 6, Alimentation; treatment of infants; humours of the body. 7, Nosology and enumeration of diseases. Part II. 8, Extracts, decoctions, levigates, &c. 9, Certain extracts recommended for particular diseases. 10, Churning of infusions. 11, Cooling applications. 12, Levigation. 13, Powders. 14, Pills, boluses and conserves. 15, Electuaries. 16, Pomades or medicines boiled in ghi. 17, Medicated oils. 18, Asavárishṭa medicines. 19, Preparation of oxides and metallic compounds. 20, Mercurials. Part III. 21, Uses of oils, ghi, fat and marrow. 22, Fomentations, 23, Emetics. 24, Purgation. 25, 26—27, Injections, 28, Snuffs. 29, Fumigation. 30, Gargles. 31, Plasters. 32, Bleeding, 33, Collyrium, &c.

Beginning. श्रियं मदयाङ्गवतां पुरारिर्यदङ्गतेजःप्रभरे भवानी।
विराजते निर्मलचन्द्रिकायां महौषधीव ज्वलिता हिमाद्रौ ॥ १ ॥
प्रसिद्धयोगा मुनिभिः प्रयुक्ताश्चिकित्सकैर्ये बहुशोऽनुभूताः।
विधीयते शार्ङ्गधरेण तेषां मत्सङ्ग्रहः मज्जनरञ्जनाय ॥ २ ॥
हेत्वादिरूपात्मकजातिभेदैः * * मसीक्ष्य तुरमर्वरोगान्।
चिकित्सितं कर्म न हेलणाख्यं कुर्वीत वैद्यो विधिवत् सुयोगैः ॥ ३ ॥
दिव्यौषधीनां बहवः प्रभेदा इन्दारकाणामिव विस्फुरन्ति।
ज्ञात्वेति सन्देहमपास्य धीरैः सम्भावनीया विविधप्रभावाः ॥ ४ ॥
स्वाभाविकागन्तुककायिकान्तरा रोगा भवेयुः किल कर्मदोषजाः।
तच्छेदनार्थं दुरितापहारिणः श्रेयोमयान् योगवरान् नियोजयेत् ॥ ५ ॥
प्रयोगानागमात् सिद्धान् प्रत्यक्षादनुमानतः।
सर्वलोकहितार्थाय वक्ष्याम्यनतिविस्तरात् ॥ ६ ॥

अथानुक्रमणिका।——

प्रथमं परिभाषा स्याद्भैषज्याख्यानकं तथा।
नाडीपरीक्षादिविधिस्ततो दीपनपाचनं ॥ ७ ॥
ततः कलादिकाख्यानमाहारादिगतिस्तथा।
रोगाणां गणना चैव पूर्वखण्डोऽयमीरितः ॥ ८ ॥

स्वरसः क्वाथफाण्टो च हिमः कल्कस्य चूर्णकम् ।
तथैव गुटिकालेहौ स्नेहः संयानमेव च ॥ ९ ॥
धातुसुद्धी रसाश्चैव खण्डोऽयं मध्यमः स्मृतः ।
स्नेहपानं स्वेदविधिर्वमनञ्च विरेचनं ॥ १० ॥
ततस्तु स्नेहवास्तिः स्यात् ततश्चापि निरूहनं ।
ततश्चाप्युत्तरो वास्तिस्ततो नस्यविधिर्मतः ॥ ११ ॥
धूमपानविधिश्चैव गण्डूषादिविधिस्तथा ।
* * दीनां विधिः प्रोक्तस्तथा शोणितविस्रुतिः ॥ १२ ॥
नेत्रकर्मप्रकारश्च खण्डः स्यादुत्तरत्रयम् ।
द्वाविंशत्सम्मिताध्यायैर्युक्तेयं संहिता स्मृता ॥ १३ ॥
षड्विंशतिशतान्यत्र श्लोकानां गणितानि च ॥

End. आयुर्वेदसमुद्रस्य गूढार्थपदसंशयम् ।
ज्ञातः कैश्चिद्बुधैस्तैस्तु कृता विविधसंहिताः ॥
कञ्चिदर्थं ततो नीत्वा कृतेयं संहिता मया ।
कृपाकटाक्षविक्षेपमस्यां कुर्वन्तु साधवः ॥
विविध * या * * दरिद्रनाशनं हरिरमणीव करोति योगरत्नैः ।
विलसतु शार्ङ्गधरस्य संहिता (क)विहृदयेषु सरोजनिर्मलेषु ॥

Colophon. इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने नेत्राञ्जनविधिर्नाम त्रयस्त्रिंशत्तमोऽध्यायः । समाप्तोऽयं ग्रन्थः ।

विषयः । पूर्वखण्डे ।—१ अध्याये, भाषटङ्कादिमानकथनं । २, भेषज्यकालगुणवीर्यादिकथनं । ३, नाडीपरीक्षा । स्वप्नदर्शनप्रतीकारः । वैद्याकारकदूतलक्षणादि । रोगिचिकित्सार्थं गमनकालीनशकुनस्य शुभाशुभफलम् । ४, दीपनपाचनादिगुणोक्तिः । ५, शरीरस्थस्नायुमज्जानाड्यस्थ्यादिसङ्ख्यास्वरूपादिकथनं । विश्वसृष्टिकथनम् । ६, आहारपाकप्रकारः । गर्भोत्पत्तिप्रकारः । कुमारपोषणप्रकारः । नरस्य वातपित्तादिप्रकृतिज्ञानकथनम् । ७, रोगगणना ।
२ खण्डे ।—८, स्वरसकल्कक्वाथादिरसकथनं । पुटपाकयोग्यद्रव्यविशेषकथनम् । ९, रोगविशेषे गुडूच्यादिविविधक्वाथविशेषोक्तिः । १०, फाण्टमन्थादिकथनं । ११, रोगविशेषे हिमौषधकथनं । १२, कल्कस्वरूपगुणकथनादि । १३, चूर्णौषधकथनं । १४, वटकमोदकगुटिकौषधकल्पना । १५, अवलेहौषधकथनं । १६, घृतपाचौषधकथनं । १७, नारायणतैलादिविविधतैलविशेषकथनं । १८, असवारिष्टनामकौषधकल्पना । १९, नानाविधधातुशोधनमारणकल्पना । २०, पारदादिनानारसशोधनमारणप्रकारः ।

३ खण्डे ।—२१, घृततैलवसामज्जादिचतुर्विधस्नेहपदार्थपानविधिः । २२. स्वेदविधिः । २३, वमनविधिः । २४, विरेचनविधिः । २५, वस्तिविधिः । २६, निरूहवस्तिविधिः । २७. उत्तरवस्तिविधिः । २८. नस्यविधिः । २९, धूमपानविधिः । ३०, गण्डूषविधिः । ३१, प्रलेपादिविधिः । ३२, रक्तस्रावविधिः । ३३, नेत्राञ्जनविधिः ॥

No. 791. प्रौढमनोरमा सविवरणा ।

Substance, country paper, 14½ × 5 inches. Folia, 141. Lines, 10 on a page. Extent, 6204 s'lokas. Character, Nágara. Date, Sm. 1834. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Praudhamanoramá. A commentary on the *Siddhánta Kaumudí.* By Bhaṭṭojí Dikshita, son of Lakshmídhara Súrí. Attached is a gloss on the commentary, by Harihara Dikshita, son of Víres'vara, and grandson of Bhaṭṭoji Dikshita. The name of the gloss is *Laghus'abdaratna.*

Beginning. टी० प्रा० । इत्यनुवर्त्तत इति । शबादीनां सार्वधातुकत्वाद्यर्थमिति भावः तेन न सार्वधातुकानुदात्तत्वसिद्धिरिति दिगिति ।

मू० प्रा० । धातोः । यद्यपि धातोरेकाचोहलादेरिति सूत्राद्धातोरित्यनुवर्त्तत एव तथापि आर्द्धधातुकसञ्ज्ञाया आश्रितशब्दव्यापारत्वलाभाय पुनर्धातुग्रहणम् ।

End. टी० समा० । व्यवस्थितनयेति । छन्दसि सर्वविधीनां वैकल्पिकत्वादिति भावः । विकल्पव्यवस्थयेति व्यवस्थितविकल्पनेति यावत् । इत्यष्टमोऽध्यायः समाप्तः ।

Colophon. इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितवीरेश्वरपुत्रदीक्षितहरिहरविरचिते लघुशब्दरत्ने वैदिकी समाप्ता ।

मू० स० । चकारोऽनुक्तसमुच्चयार्थ इत्याशयेनाह । चिदिति । ऋतीसाहमिति । अतिशब्दस्यान्येषामपीति दीर्घः । इत्यष्टमः ।

इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितायां प्रौढमनोरमायां वैदिकी समाप्ता ।

विषयः । सिद्धान्तकौमुद्याः छन्दस्यभागस्य व्याख्यानं । पुनस्तस्या एव स्त्रीलिङ्गावधि-स्त्रीप्रत्ययपर्यन्तस्य व्याख्यानं । पुनः स्वरवैदिकीप्रक्रियाख्यशेषभागस्य व्याख्या च । (आदौ मध्ये च खण्डितमेतत्)

No. 792. कूटमुद्गरः, सटीकः ।

Substance, country paper, 14 × 5½ inches. Folia, 5. Lines, 12 on a page. Extent, 140 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Generally correct.

Kútamudgara. Essays on Digestion and Dietetics. By Mádhava. Attached to the text is an anonymous commentary.

Beginning. टी० प्रा० । ॐ मधुराम्ललवणकटुतिक्तकषायाः षड्रसाः । तत्र त्रिभिराद्यै-र्मधुराम्ललवणैः कफवातौ यथाक्रमं वृद्धिसमौ यातः । कफो वृद्धिं याति वातः शमं यातीत्यर्थः ।

मू० प्रा० । कफवातौ वातकफौ यातः पित्तञ्च वृद्धिसमौ ।
त्रिभिराद्यैस्त्रिभिरन्त्यैस्त्रिभिराद्यपरैस्तदन्यैश्च ॥ १ ॥

End. टी०परि० । किं ज्ञानेन निन्द्यज्ञानेनेत्यर्थः । अल्पदर्शिना अल्पाध्ययनेन एतेन आत्मनः सविनयत्वमुक्तम् ॥ २० ॥

क्षीरमिव वारिविमिश्रं भव्यहेमेन(?) पीयते यद्वत् ।
हित्वा दोषमशेषं गुणमिह गुणिनो ग्रहीष्यन्ति ॥

मूलपरि० । भिषजा माधवेनेदं किं ज्ञानेनाल्पदर्शिना ।
यत्किञ्चिदुक्तमज्ञानात्तत् क्षमध्वं मनीषिणः ॥

Colophon. इति श्रीमाधवविरचितः कूटमुद्गरः समाप्तः ।

विषयः । मधुराम्लादिषड्रसगुणदोषकथनं । जीर्णाजीर्णान्नगुणदोषः । पानीयापानीयजल-निर्णयः । सन्निपातभेदादि । व्रणचिकित्साप्रकारः । पथ्यापथ्यनिर्देशश्च ।

No. 793. ज्योतिरतिरात्रं ।

Substance, country paper, 6¾ × 4 inches. Folia, 25. Lines, 7 on a page. Extent, 250 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Jyotiratirátra. Hymns and mantras for the performance of the Atirátra sacrifice.

१२ ३ १ २ ३ १ २। ३ १ २ ३ १ २ ३ १।
Beginning. अथोक्थ्या लिख्यते । पवस्व वाचो अग्निं यः साम चित्राभिरूतिभिः । अभि-
२। ३ १ २
विश्वानि काव्या ॥ १ ॥

End. ॐ वायिश्ँ हि गच्छथो युवं चित्रं ददथुर्भोजनान्नर। वोदेथाँ स्तूत-
तावते अर्वाग्रथँ समनसा नियाच्छताम्। पाथिवतँ सोरसमाः।
यां मा २३४ धा ॐ वा ६ हा उवा॥ अस्॥ आश्विनशस्त्रान्ते भक्ष्यः।

Colophon. इति ज्योतिरतिरात्रः समाप्तः॥

विषयः। १, उक्थ्यजपः। २, वहिष्पवमानं। ३, आज्यानि। ४, माध्यन्दिनपवमानं।
५, रात्रिपर्यायः। ६, सन्धिः।

No. 794. श्रीमद्भागवतस्कन्धार्थनिरूपणं, वा हरिलीलाविवरणसङ्ग्रहः सूचीसहितः।

Substance, country paper, $12\frac{3}{4} \times 5$ inches. Folia, 33. Lines, 15 on a page. Extent, 1650 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, fresh. Prose and verse. Correct.

S'rímadbhágavata-skandhártha-nirúpaṇa, alias *Harililár-ivaraṇa-saṅgraha*. An abstract of the Bhágavata Puráṇa. By Vopadeva. The MS. is incomplete and comprises abstracts of the first five books only. Vide ante, p. 47.

Beginning. श्रीमद्भागवतस्कन्धाध्यायार्थादि निरूप्यते।
विदुषा वोपदेवेन मन्त्रिहेमाद्रितुष्टये॥ १॥
तत्र भागवतार्थमाह। आनन्दस्य हरेर्लीलावक्ता भागवतागमः।
स्कन्धैर्द्वादशभिः शाखाः प्रतन्वद्द्विजसेविताः॥ २॥

End. (पञ्चमस्कन्धपर्यन्तं वर्त्तते। अतः खण्डितत्वाच्छेषवाक्यं नास्ति)।

विषयः। श्रीभागवतस्य प्रथमस्कन्धावधिपञ्चमस्कन्धपर्यन्तानां पञ्चस्कन्धानामध्यायानामर्थः सङ्क्षेपेणात्र सङ्गृहीतः।

No. 795. अनुभवसारः।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 12. Lines, 12 on a page. Extent, 350 s'lokas. Character, Nágara. Date, Sm. 1872. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Anubhavasára. The essence of the Vedánta, or a treatise on salvation, according to the Vedánta doctrine. By Sachchidánanda Yati.

Beginning. जय जय सकलनिषेधशेषा । जय जय मायादिगुणअशेषा ॥
जय जय जडचैतन्यपरेशा । श्रीसदानन्द गुरुवरा ॥ १ ॥

End. तथा अत्रि त्यास चतुरानन । त्यालागि श्रीनारायण ॥
स्वयं उपदेशि आपण । चतुः श्लोकी भागवत ॥

Colophon. इति अनुभवसारग्रन्थे सच्चिदानन्दयतिविरचिते पञ्चमप्रकरण समाप्तम ।
(अतःपरं) अर्थादर्थे यदा वृत्तिं गन्तुं चलति चान्तरे ।
निराधारा निर्विकारा या दशा सोन्मनी स्मृता ॥ (इत्यादयः)
काशी ब्रह्मेति विख्यातं तद्विवर्त्तो जगद्भ्रमः ।
अविवर्त्तं ततस्याङ्गः काशीति ब्रह्मवादिनः ॥ (इत्यन्ताः पञ्चश्लोकाः सन्ति)

विषयः । शारीरिकतत्त्व-ब्रह्मतत्त्व-जीवब्रह्मैक्यमोक्षोपायमुमुक्षुकर्त्तव्यादिकथन ।

No. 796. नैगेयानां ऋक्षुदैवतं ।

Substance, country paper, 9 × 4 inches. Folia, 17. Lines, 10 on a page. Extent, 400 s'lokas. Character, Nágara. Date, Sm. 1674. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Naigeyánám rikshu-daivatam or simply *Naigeya.* An Index to the Sáma Veda, giving "the names of the poets, and the deities for the verses composing the Árchika of the Chhandogas according to the Sákhá of the Naigeyas, a subdivision of the Kauthumas." Max Muller, Ancient Sanskrit Literature, p. 227. The work comprises two prapáṭhakas, the first giving the poets and deities of the richás, and the second the same of trichás, ardharichás, &c.

Beginning. अथार्षमार्चिकस्याग्रे त्वमग्नेऽग्निरेहि त्वामग्ने भरद्वाजो वार्हस्पत्योऽग्निर्मेधातिथिः
काण्वः प्रेष्ठमुशना काव्यस्त्वन्नः सुदीतिर्वार्हद्गिरसः सौहोत्रः पुरुमीढो वाते वत्सः
काण्वोऽग्ने सुमित्रो वाध्र्यश्वो वध्र्यश्वो वाजुरूपः ॥ १ ॥

End. आग्नुरध्याय ऐन्द्रो बृहस्पते बृहस्पतिः प्रथमेऽभिगोत्राणि बृहस्पतिः पञ्चमे
दक्षिणा षष्ठे मरुतोऽष्टमे वरुणो नवम आदित्या दशम उद्वर्पय देवा अष्टमे
मारुत्युत्तमोमोषां प्रथमाघो देवीकङ्का अष्टमे विरक्षसृतीया सङ्ग्रामाशीर्मर्माण्य-

ऋरे सङ्गामाग्निषामैन्द्री मध्यमे वर्म प्रथमे सोमो द्वितीये वरीयस्तृतीये देवा-
यतुर्थ एकादशे चाग्निः सप्तमे भद्रं वैश्वदेव्यौ ।

Colophon. इति नैगेयानामृचुद्देवतं समाप्तम् । द्वितीयः प्रपाठकः ।

विषयः । १ प्रपाठके, नैगेयानामृचामृषिदैवतनिर्णयः । २, तेषामेव ऋचार्द्धर्चपादाना-
मृचामृषिदैवतनिर्णयः ।

No. 797. त्रिस्थलीसेतुः ।

Substance, country paper, 11 × $4\frac{3}{4}$ inches. Folia, 103. Lines, 9 on a page. Extent, 2600 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, fresh. Prose and verse. Generally correct.

Tristhalísetu. A treatise on pilgrimage. By Náráyana Bhatta, son of Rámes'vara Súrí. The work is of some antiquity and great repute, having been extensively quoted by all subsequent writers on the subject. The MS. is incomplete, and breaks off at the end of the 10th chapter. Contents : 1. Propriety of pilgrimage to sacred pools or *tírthas ;* tírthas defined. 2. Secondary tírthas ; persons who should perform pilgrimage ; difference in the merit of pilgrimages according to the conveyance used, &c. 3. Comparison of the merits of pilgrimages with penances ; proper times for pilgrimages. 4. Rules for starting on pilgrimages. 5. Do. to be observed in the way ; duties on arrival at a place of pilgrimage ; fasts, and shedding of the hair of the head at tírthas. 6. Bathing at tírthas. 7. Offering of water to the manes ; s'ráddhas ; what to be offered and what forbidden at such s'ráddhas. 8. Who are fit to perform such s'ráddhas. 9. Gifts at such s'ráddhas &c. Throwing of the bones of the dead in tírthas. 10. General observations on the various topics above set forth.

Beginning. सरस्वतीं नमस्यामः प्रत्यूहव्यूहहानये ।
यदेकतानचित्तानां चित्ते संवित्तिरुत्तमा ॥
विघ्नाधिप नमस्तुभ्यं विघ्नसङ्घं विघातय ।
प्रचयं रचयात्युच्चं बुद्धिशुद्धिं विधेहि मे ॥
उन्निद्रपद्मशतपत्रसगोत्रनेत्रं सुग्रीवमित्रमतिचित्रपवित्रपात्रं ।
उन्नीलनीलमणिवर्णसवर्णगात्रं रामं भजे कुलपतिं कमलाकलत्रं ॥

विश्वामित्रकुलोदधौ विधुरिवाखण्डः कलानां निधि-
र्वाग्गुम्फे निखिलेऽपि यस्य वसुधा शिष्यप्रशिष्यैश्चिता ।
विद्या पद्मविकाशनैकतरणिः श्रीभट्टगोविन्दजः
सङ्ग्रावङ्गणनाग्रणीर्विजयते श्रीभट्टरामेश्वरः ॥
श्रिता वाराणसी तेन नगरी नगरीयसी ।
यतोऽन्यनगरीहेमनगरीतिमुपेयुषी ॥
शास्त्रेष्वधीती पितुरेव यः श्रुतीः स्मृतीः समालोच्य च देशरीतीः ।
नारायणस्तत्तनयो विमुक्ते तीर्थत्रयीमेतुममो विधत्ते ॥
यन्योऽस्मिन् गुणगणवत्त्वमुच्यते चेत् स्वं ग्रन्थं गुणगणवत्त्वमाह को न ।
तत्सन्तः शिरसि कृताञ्जलिसु याचे शोध्यं तत्सदसदिहोच्यते मया यत ॥
खलानां प्रार्थनैषेह खलताखलतासु वः ॥
भवतां भूषणेऽप्यत्र दूषणे मास्तु मानसं ॥

End. यत्र यत्र दृढा भक्तिर्यदा यस्य महात्मनः ।
तत्र तस्य महादेवः प्रसादमुपगच्छति ॥ इत्यादि बहुनालम् ।

Colophon. इति श्रीमद्विद्वन्मुकुटमाणिक्यश्रीमद्रामेश्वरसूरिसूनुनारायणभट्टविरचिते त्रिस्थलीसेतौ सामान्यप्रघट्टके प्रकीर्णकतीर्थधर्मप्रकरणं समाप्तं । समाप्तश्च प्रघट्टकः ।
इतः परं प्रयागप्रकरणं भविष्यति । (अत इदं पुस्तकमसम्पूर्णं)

विषयः । १ प्रघट्टके, तीर्थयात्राकर्त्तव्यतानिरूपणं । सामान्यतस्तीर्थप्रशंसा । तीर्थस्वरूपं । २, गोगुर्वादिगौणतीर्थं । तीर्थयात्राधिकारिणः । तीर्थफलतारतम्यं । यानविशेषेण तीर्थयात्रायां फलतारतम्यादि । ३, तीर्थस्नानफलविशेषेण सह कृच्छ्रादिप्रायश्चित्तेन तुल्यता । तीर्थयात्रायां कालः । ४, तीर्थगमनविधिः । ५, तीर्थयात्रायां नियमाः । तीर्थप्राप्तिदिनकृत्यं । तीर्थोपवासविधिविचारः । तीर्थमुण्डनविधिविचारः । ६, तीर्थस्नानविधिः । ७, तीर्थतर्पणं । तर्पणीयव्यक्तिक्रमोल्लेखः । नदीरजोदोषोद्भवमासदिननिर्देशः . तीर्थश्राद्धविधिः । तीर्थश्राद्धे निषिद्धद्रव्याणि । आमान्नहेमश्राद्धादिविचारः । तीर्थश्राद्धे एकोद्दिष्टादिश्राद्धान्तसमवाये निर्णयः । ८, तीर्थश्राद्धाधिकारिणः । ९, तीर्थश्राद्धे दानकालपार्वणश्राद्धादिनिर्णयः । तीर्थोऽस्थिनिक्षेपविधिः । १०, प्रकीर्णकतीर्थधर्मः । पुनरस्थिप्रक्षेपविधिः । प्रतिग्रहप्रतिषेधार्थं तीर्थगर्भनिर्णयादि ।
(साधारणस्तीर्थविधिः प्रथममुक्तः, प्रयागादित्रयविधिः पश्चात्, इत्यत्र सङ्ग्रहः।)

No. 798. खण्डप्रशस्तिटीका ।

Substance, country paper, 8 × 3 inches. Folia, 131. Lines, 8 on a page. Extent, 2000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Khaṇḍa-pras'asti Ṭíká. A commentary on the Khaṇḍapras'asti, of Náráyaṇa, a poem in praise of the ten incarnations of Vishnu. By Raghunátha.

Beginning. श्रीरामविघ्नेशगजाननादीन् प्रणम्य मातापितरौ पितृव्यं ।
नारायणञ्च प्रकरोति टीकां खण्डप्रशस्ते रघुनाथनामा ॥

End. प्रख्यात इति । कल्की देवः वः कल्मषान् पापान् । पापं किल्बिषकल्मषमित्यमरः । त्रायतां रक्षतां । किं विधः । पुरी मथुरा तत्प्रभवतः प्रख्यातः प्रसिद्धः । प्रावृट् पयोदः वर्षाकालमेघः तद्द्युतिः तत्कान्तिः मेघश्यामः । बालः अल्पवयाः । दैत्येश्वराणां द्विषां वैरिणां काल इव दलयिता मारयिता किलेति पुराणादौ श्रूयते ।
पाठीनः कमठः किटिर्नरहरिः खर्वाकृतिर्भार्गवो
रामः कंसनिसूदनो दशबलः कल्की च नारायणः ।
अस्माकं सविभूतयेऽस्तु भगवान् सेतुर्भवाम्भोनिधा-
वुत्ताराय युगे युगे युगपतिस्त्रैलोक्यनाथो हरिः ॥
अत्र परिसमाप्तिसूचकं शेषवाक्यं नास्ति । (९२, पत्रात्परमसंलग्नपत्राङ्कत्वात् खण्डितमित्यनुमीयते ।)

विषयः । मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-राम-कृष्ण-कल्क्याद्यवतारवर्णनं ।

No. 799. समरसारः, सटीकः ।

Substance, country paper, 13¾ × 5¼ inches. Folia, 24. Lines, 11 on a page. Extent, 816 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Generally correct.

Samarasára. An essay in verse on supernatural means for success in warfare. By Rámachandra. Attached is a commentary in prose by S'ivadása, son of S'úryadása Yati by Vis'álákshá. Contents. Calculations

to be made from the names of the belligerents as to the probability of success, onomancy. The same from those of the day of the week, the age of the moon and of the Nakshatra when war is declared. Calculation from initial letters of names. Do. from the letters, accents, &c., of do. Do. from the positions of armies on the different sides; obnoxious sides; calculations from the directions of the wind austromancy. Peculiar stellar conjunctions. Times improper for war. The snake diagram for calculating success in war. Knowledge of nakshatras from names. Calculations from the breath; considerations about the left and right sides. Connexion with women. Success of embassy by the nature of the breath. Success by putting on particular drugs. Various diagrams for assaults, blockade, &c. Reduction of forts, &c. Ornithomancy.

Beginning. मूलप्रा० । नत्वा गुरून् समालोच्य स्वरशास्त्राणि भूरिशः ।
वक्ष्ये युद्धजयोपायं धार्मिकानां महोचितम् ॥

टीकाप्रा० । अभिवन्द्य रामचन्द्रं गुरुं तदुक्तस्वरग्रन्थम् ।
विवृणोमि यथाप्रज्ञं तदभिहितार्थानुसारेण ॥
तत्र श्रीरामचन्द्रनामा ग्रन्थकृत् प्रारीप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहायोपहाय शिष्टाचारपरिपालनाय गुरुप्रणामं चिकीर्षितं प्रतिजानीते । नत्वेति भूरिस्वरशास्त्राणि रुद्रयामलादीनि । युद्धशब्द उपलक्षणार्थः । तेन वादिप्रतिवादिस्पर्धासुभटद्यूतकुन्मल्लादीनां जयपराजयोपायप्रतिपादकत्वमस्य ग्रन्थस्य । धार्मिकानामिति ग्रन्थाप्रामाण्यशङ्कानिवारणाय । यतस्तूपायप्रवृत्तोपायो न्यपतिः परिपन्थिभिः पराभूयत एव रावणदुर्योधनवत् । नानामतबहुतरस्वग्रन्थाविरोधं गुरुमतमनुसृत्य परिहरति तत्र शमेङ्गगेत्यादि ॥

End. टीकापरि० । वंशे वत्समुनीश्वरस्य शिवदामाख्यादुरुख्यातितः
सम्राडग्निचिदाप यस्य जनकः श्रीसूर्यदासोऽजनि ।
यन्मातुर्यशसा दिशो दश विशालाक्षा वलक्षा व्यधात्
स प्राच्यं स्वरशास्त्रसारविचितं रामोऽवसन्नैमिषे ॥

विषयः । युद्धादौ वादिप्रतिवादिनोर्नामलब्धाङ्कमादाय जयपराजयविचारप्रकारः । नक्षत्रतिथिवारादिद्वारा जयपराजयप्रकारः । अकारादिस्वराणां बालयुवाद्यवस्था । अकारादिस्वराणां ग्रहराशीशादिकथनं । मात्रावर्णादिस्वरसमूहकथनं । नामाक्षराङ्कन्यूनाधिकभावेन जयपराजयविचारः । भटानां पूर्वादिदिगवस्थितिद्वारा जयपराजयकथनादि । केतुहतदिग्विचारः । वायुबलज्ञानं । राज्ञयागिनीबलकथनादि । युद्धे वर्ज्यकालादि । युद्धे जयपराजय-

ज्ञानार्थं सर्पचक्रोक्तिः । दिक्शूलादि । नामाक्षरात् नक्षत्रज्ञानं । निश्वास-प्रश्वासाद्वत्तिसङ्ख्याविशेषैः पृथिव्यादिपञ्चभूतकथनं । पञ्चभूतफलं । वामदक्षिण-श्वासवहनद्वारा जयपराजयः । स्वरविशेषवहनकाले नारीसंसर्गे कृते नारी-वशीकरणं । नामास्वरवलद्वारा द्यूतजयः । ओषधिविशेषधारणेन जयपरा-जयः । स्थाय्यस्थायिनोर्जयपराजयज्ञानार्थककोटचक्रोक्तिः । दुर्गादौ ग्रह-वेधज्ञानार्थं सर्वतोभद्रचक्रं । आतुरसाध्यासाध्यज्ञानार्थं क्षणिधनिचक्रोक्तिः । शकुनोक्तिश्च ।

No. 800. गणपत्यादिपूजनपद्धतिः ।

Substance, country paper, $10\frac{3}{4} \times 4\frac{3}{4}$ inches. Folia, 20. Lines, 9 on a page. Extent, 400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Gaṇapatyádipújana-paddhati. Manual for the worship of Gaṇes'a and other deities on particular auspicious occasions. Anonymous. The MS. is defective.

Beginning. अथ श्रौतस्मार्त्तादिकर्माङ्गसाधारणगणपतिपूजनादिपद्धतिरुच्यते । महत्कर्मसु पूर्वेद्युरल्पेषु तु तस्मिन्नहनि पूर्वाह्णे निर्णेजनान्तपञ्चमहायज्ञान्तकृतनित्यक्रिय-यजमानः सपत्नीकः स्वासने प्राङ्मुख उदङ्मुखो वोपविश्य द्विराचम्य प्राणाना-यम्य देशकालौ सङ्कीर्त्य करिष्यमाणामुककर्माङ्गतया स्नानं करिष्ये ।

End. खण्डितत्वाच्छेषवाक्यादिकं नास्ति ।

विषयः । शुभकर्मारम्भे कर्त्तव्यगणपतिपूजनवसोर्धारानान्दीमुखश्राद्धप्रयोगकथनं ।
(खण्डितत्वादित उत्तराः पुण्याहवाचनादिविषया न प्राप्ताः ।)

No. 801. अश्वमेधः, वा, अश्वमेधप्रयोगः ।

Substance, country paper, 11 × 5 inches. Folia, 38. Lines, 10 on a page. Extent, 1300 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

As'vamedha Prayoga. A manual for the performance of the horse sacrifice. Anonymous. The MS. is defective.

Beginning. ब्रह्मौदनं पचति । रेत एव तद्धत्ते । यदाज्यम् * * ते तेन रशनामुभाभ्यामादत्ते । तेजो वा आज्यं, प्राजापत्योऽश्वः, प्रजापतिमेव तेजसा समर्द्धयत्यपनेता वा एषो मेध्यो यदश्वः ॥

End. खण्डितत्वाच्छेषवाक्यादिकं नास्ति ।

विषयः । अश्वमेधयज्ञकर्त्तव्यानुष्ठानकथनं, इष्टकाचयनारम्भपर्यन्तं ।

No. 802. चातुर्मास्यप्रयोगः ।

Substance, country paper, $9\frac{3}{4} \times 4$ inches. Folia, 50. Lines, 9 on a page. Extent, 800 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Cháturmásya Prayoga. A manual for the performance of the Cháturmásya or the quadrimensial fast. By Tryambaka. The MS. is incomplete.

Beginning. नत्वा गणेशपादाब्जं गुरूनपि महीयशान् ।
कुर्वे त्र्यम्बकनामाहं चातुर्मास्याख्यमादितः ।
प्रयोगं सर्वथा ग्रन्थाननुसृत्यैव सिद्धये ॥
अक्षय्यꣳ ह वै चातुर्मास्ययाजिनः सुकृतं भवति ।

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति ।)

विषयः । चातुर्मास्येष्टिकर्त्तव्यानुष्ठानकथनं । चातुर्मास्येष्ट्यारम्भकर्त्तव्यविभ्रष्टेष्टिकथनं । आपस्तम्बीयाग्निहोत्रकथनं । आश्वलायनीयवरुणप्रघासेष्ट्यादि । (खण्डितत्वाद्विषयान्तराप्राप्तिः)

No. 803. रुद्रानुष्ठानपद्धतिः वा, रुद्रानुष्ठानदीपिका ।

Substance, country paper, 11×5 inches. Folia, 91. Lines, 10 on a page. Extent, 1850 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Rudránushṭhána Paddhati. Directions for performing the *Mahárudránushṭhána* ceremony. By Meṅgnátha. This is different from No. 187, ante I, p. 100.

Beginning. अथ महारुद्रानुष्ठानक्रमो लिख्यते । मन्त्रादिरहितं पूर्वं केवलः क्रम ईरितः ।
अधुना मेतिकर्त्तव्यः सर्वच्छन्दोधिदैवताः ॥
समन्त्रविनियोगश्च जपहोमादिकर्मसु ।
निरूप्यते क्रमस्तस्मान्न शङ्क्या पुनरुक्तिता ॥
अवमेव(?) वक्तव्यं मन्त्राणामृषिदैवतं ।
ऋष्यादिना विना मन्त्रः प्रयुक्तो निष्फलो भवेत् ॥
यतः । तदुक्तं व्यासेन । ऋषिच्छन्दोऽधिदैवञ्च विनियोगादिकञ्च यत ।
अज्ञात्वा यदि कुर्वीत तत्सर्वं निष्फलं भवेत् ॥
निरूपितमिदं विशेषतः परिभाषायां । एवमत्र महारुद्रानुष्ठानक्रमः ।

End. अनेन विधिना यस्तु रुद्रानुष्ठानमाचरेत् ।
सर्वान् कामानवाप्नोति मुच्यते सर्वपातकैः ॥
नानेन सदृशं किञ्चित् त्रिषु लोकेषु विद्यते ।
ऐहिकामुष्मिकार्थानां प्रायसः साधनं परं ॥
महार्णवमुखान् ग्रन्थानवलोक्य विनिर्मिता ।
सर्वज्ञमेङ्गनाथेन (?) रुद्रानुष्ठानदीपिका ॥
कृता विश्वोपकाराय रुद्रानुष्ठानपद्धतिः ।
अनया प्रीयतां देवः परमात्मा सदाशिवः ॥

Colophon. इति सर्वज्ञान्वयसम्भूतमेङ्गनाथविरचिता रुद्रानुष्ठानपद्धतिः ।

विषयः । ऐहिकामुष्मिककामनासिद्ध्यर्थं रुद्रपूजनरुद्रमन्त्रजपहोमाद्यनुष्ठानप्रयोगकथन ।

No. 804. सप्तसोमसंस्थापद्धतिः ।

Substance, country paper, 10 × 4½ inches. Folia, 38. Lines, 9 on a page. Extent, 760 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Saptasoma-sañsthá Paddhati. Rules for the performance of the Agnishṭoma rite. By Govardhana Tripáthi.

Beginning. अथाग्निष्टोमादिसप्तसंस्था लिख्यते । अथ विध्यं व्यपदेशे सर्वक्रत्वधिकारः ।
तत्रादौ मातृपूजा वृद्धिश्राद्धं । एकश्रुतिविधानान्मन्त्रान् कर्माणि चोद्गातैव
कुर्यादनादेशे । सर्वेषां यज्ञोपवीतोदकाचमने नित्ये कर्मोपयतां । अन्यवाये
व्यावृत्तिश्च यज्ञाङ्गैः । प्राङ्मुखकरणञ्चानादेशे । तत्र प्राङ्मुखोपविष्टा ऋत्विजः ।
उदङ्मुखो यजमानः स्वस्त्यादिमाङ्गल्यं कृत्वा देवर्त्विग्वरणं ।

End. सप्तदश आर्भव एकविंशोऽग्निष्टोमः । द्वादशशतं दक्षिणा । प्रथमायां पूर्वपक्षस्य दीक्षितैकाहेभ्यः । दृष्ट्वा वा नक्षत्रयोगमिति दीक्षाकालः ।

Colophon. इति श्रीदीक्षितत्रिपाठिगोवर्द्धनेन विरचितायां सप्तसोमसंस्थापद्धतौ प्रथमोऽग्निष्टोमः समाप्तः ।

विषयः । अग्निष्टोमयागानुष्ठानविधिः ।

No. 805. दर्शपूर्णमासयोराध्वर्यवप्रयोगः ।

Substance, country paper, 10¼ × 4 inches. Folia, 27. Lines, 9 on a page. Extent, 462 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Dars'a-púrṇa-másayorádhvarya Prayoga. The duties of the Adhvaryus in the Dars'a and Púrṇamása rites. Anonymous. The MS. is incomplete.

Beginning. अथ दर्शपूर्णमासयोराध्वर्यवप्रयोगः । प्रातरग्निहोत्रानन्तरमध्वर्युः कृतसन्ध्योपास्त्याचमनो यजमानेन इतोऽस्मि करिष्यामीति वदति ।

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति)

विषयः । दर्शपूर्णमासयोः कर्त्तव्यानुष्ठानप्रयोगविधिः ।

No. 806. छन्दोगापरसूत्रं ।

Substance, country paper, 9½ × 4 inches. Folia, 9. Lines, 9 on a page. Extent, 225 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Chhandogápara-sútra. A treatise on the funeral rites according to the Chhandogas. Anonymous.

Beginning. प्रयाणकाले प्राक्स्मृतिवियोगात्पितरं मातरं भ्रातरं गुरुमन्यं सहृदय ब्राह्मणं तत्स्वर्गार्थेन निमित्तेनेमानि छन्दांसि संस्कर्त्ता श्रावयेत् ।

End. तस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः ।
अमौ स्वर्गाय लोकाय स्वधा नम इति शान्तिर्वै वामदेव्ये शान्तिर्वै वामदेव्ये ।

Colophon. इति छन्दोगापरसूत्रं समाप्तम् ।

विषयः । अन्त्येष्टिक्रियाप्रयोगः ।

No. 807. सत्यनाथाभ्युदयः, सटीकः ।

Substance, country paper, $11\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia, 164. Lines 9 on a page. Extent, 5000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Satyanáthábhyudaya. A poem, in eleven cantos, in praise of *Satyanátha.* By S'esháchárya. Attached is a commentary in prose by a disciple of the author, named Sankarshana.

Beginning. टीका०प्रा० । श्रीरामचन्द्रं गुरुं पूर्णबोधं श्रीसत्यनाथेन्द्रमपि प्रणम्य ।
श्रीशप्रसन्न्यै विवृणोमि सम्यक् श्रीसत्यनाथाभ्युदयाख्यकाव्यं ॥
अथ कविः स्वचिकीर्षितकाव्यस्य निरन्तरताय समाप्त्यार्थं स्वेष्टदेवताननितलक्षणमङ्गलमनुष्ठाय ग्रन्थादौ निबध्नाति श्रीरामेति ।

मूल०प्रा० श्रीरामचन्द्रं शुभवक्त्रचन्द्रं गुणौघसान्द्रं जनकात्मजेन्द्रं ।
निरस्ततन्द्रं प्रणमामि वीन्द्रं धनुर्द्धरेन्द्रं त्रिजगन्नरेन्द्रं ॥

End. इदानीं स्वकृतकाव्यं काव्यनायकगुर्वन्तर्यामिश्रीरामचन्द्राय समर्पयेत् तत्प्रशमनरूपं मङ्गलमन्ते करोति मयार्पितामिति । श्रीसत्यनाथेन्द्रहृदब्जवासो रामं आदरतः भक्तितो मयार्पितां अभिनवां नवीनां प्रमिद्धसुवर्णमालापेक्षया विलक्षणत्वेनाभिनवां सुवर्णमालां शोभनाः वर्णा येषु काव्यगतपद्येषु तानि सुवर्णानि तेषां माला काव्यरूपेत्यर्थः । तां कनकमालामिति ध्वनिः । स्वे हृदि मनसि वक्षसीति ध्वनिः । हृदब्ज्यमि च मानस इति सज्जनः । स्वीकृत्य प्रसन्नो भवतु । इत्यशेषमतिमङ्गलं । श्रीसत्याभिनवीनेति ॥ ६१ ॥

Colophon. इति श्रीसत्यनाथाभ्युदयटीकायामेकादशः सर्गः । श्रीसत्यनाथाभ्युदयकाव्यस्य टीकया कृतया प्रियतां रामः सत्यनाथेन्द्रहृद्गतः ।
सत्याभिनवतीर्थार्थं पितरं मातरं गुरुं ।
सुहृदं सद्गुणाम्भोधिं भूयो भू० ॥

मूल० शेष० । श्रीसत्याभिनवीनतीर्थयतिराट् शिष्येण तत्प्रीतये
शेषाचार्यतनूद्भवेन रचिते सङ्कर्षणेनादरात् ।
काव्ये आव्यपदे महागुणनिधे श्रीसत्यनाथोदये
स्लाघ्यःभूद्गुणसागरे सुकविभिः सर्गोऽयमेकादशः ॥
इति श्रीसत्यनाथाभ्युदये एकादशः सर्गः ।

विषयः । श्रीसत्यनाथयतेः कृष्णाचार्यादारभ्य वंशानुकीर्त्तनं तत्तद्गुणादिवर्णनञ्च ।

No. 808. वाजपेयपद्धतिः ।

Substance, country paper, $9\frac{3}{4} \times 4$ inches. Folia, 17. Lines, 11 on a page. Extent, 450 s'lokas. Character, Nágara. Date, Sm. 1655. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Vájapeya-paddhati. Directions for the performance of the Vájapeya rite. By Yajñika Deva.

Beginning. अथ वाजपेयप्रयोगः । ब्राह्मणक्षत्रिययोरेव शरदि वाजपेयो भवति न वैश्यस्य । तत्र वाजपेयस्य पुरस्तादनन्तरं शुक्लपक्षे बृहस्पतिसवो भवति ॥

End. सापि विस्तारेण द्वादशाहे उक्ता । तदन्ते यूपवेष्टनान्यध्वर्यवे दानं । हिरण्यमालाश्च या यावेन बद्धा सा तस्मै देया । ? पञ्चमी कण्डिका । इति वाजपेयः ।

Colophon. इति याज्ञिकदेवकृता वाजपेयपद्धतिः समाप्ता ।

विषयः । वाजपेययज्ञानुष्ठानपद्धतिः ।

No. 809. पञ्चपादिकाविवरणं ।

Substance, country paper, $10 \times 4\frac{3}{4}$ inches. Folia, 220. Lines, 11 on a page. Extent, 5500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Panchapádiká-vivaraṇa. The *Panchapádiká* is a gloss on the whole of the first, and a fourth of the second, chapter of the commentary of S'aṅkara on the Vedánta aphorisms. By Pádapadma Áchárya, a desciple of S'aṅkara. The *Vivaraṇa* is a commentary on this gloss. The object of the author is to prove the identity of the supreme and the human souls, or the superiority of the nondual theory. By Prakás'átmá Yati. Hall's Contributions, p. 88.

Beginning. पालने विमलसत्त्ववृत्तये जन्मकर्मणि रजोजुषे लये ।
तामसाय जगतः प्रकाशकृद् द्वैतजालवपुषे नमः सते ॥
यस्याः प्रसादमवलम्ब्य जगद्गुरूणामप्यस्खलद्वृजुगुणाः प्रसरन्ति वाचः ।
सा वेदशास्त्रपरिनिर्मितवन्ध्यदेहा भूयात्समग्रवरदैव सरस्वती नः ॥
विघ्नाभितापमपहृत्य मदीयकृत्यबीजं प्रवृद्धमदनुग्रहवर्षपातैः ।
सम्प्रार्थितः सिततरोऽपि गणेशमेघः सिञ्चन्नभीष्टफलमङ्कुरयत्वमोघं ॥

शमोऽपि श्रुतिकमलावबोधरागः * * सन्नयति तमोविनाशमन्तः ।
नीरूपं प्रथयति योऽपि गोसहस्रैस्तं व्यासं नमत जगत्यपूर्वभानुम् ॥
उद्धृत्य वेदपयसः कमलामिवाब्धेरालिङ्गिताखिलजगत्प्रभवैकमूर्त्तिम् ।
विद्यामशेषजगतां सुखदामदाद्यस्तं शङ्करं विमलभाष्यकृतं नमामि ॥
वन्दे तमात्मसम्बुद्धस्फुरद्ब्रह्मावबोधतः ।
अर्थतोऽपि न नाम्नैव योऽनन्यानुभवो गुरुः ।
प्रकाशात्मा यतिः सम्यक् प्राप्तविद्या शुशुनसया (?) ॥
यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकां ॥

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति) ।

विषयः । मोक्षोपयोगिब्रह्मज्ञानसाधनोपयोगिवेदान्तवाक्यविचारगर्भितबादरायणसूत्र-भाष्यस्य विवरणं ।

No. 810. अजामिलोपाख्यानं, रत्नमालादिस्तोत्रद्वयसहितं ।

Substance, country paper, $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 6. Lines 17 on a page. Extent, 180 s'lokas. Character, Nágara, Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Ajámilopákhyána. Life of Ajámila, a Bráhman who obtained salvation by unconsciously repeating the word Náráyaṇa when calling his son at his death bed. By Jayakṛishṇa. Attached to the work are two short hymns in praise of Náráyaṇa by an unknown author.

Beginning. अवशेऽप्यघवान् * * यस्य नाम सुमङ्गलं ।
मुक्तिं प्रयाति तं वन्दे * श्रीनारायणं प्रभुं ॥ १ ॥
मलिनोऽप्यजामिलोऽन्ते पुत्रस्नेहाकुलीस्वान्तः ।
यन्नामग्रहन्मुक्तः सोऽयं नारायणो वसत्वन्तः ॥ २ ॥
कान्यकुब्जभुवि कश्चिद्पूर्वः शीलवृत्तगुणवानतिमान्यः ।
देवतातिथिपरः पितृसेवी भूसुरोऽभवदजामिलसञ्ज्ञः ॥ ३ ॥ इत्यादि ।

End. सम्प्रेष्य पार्षदवरान् सदयेन येन
नारायणेति सुतनाम गृणन् किलान्तः ।
दासीपतिः पतित इत्यमजामिलोऽपि
सम्मोचिता निजधिया सजयत्यनन्तः ॥ ६२ ॥
श्रीकृष्णपादाब्जधिया कृतं यत् बालेन बाल्याज्जयकृष्णनाम्ना ।
नाम्नो महिम्ना विलसन्मुरारेरजामिलाख्यानमिदं मुदेस्तु ॥ ६३ ॥

Colophon. श्रीमत्परिचारकसत्कुलप्रसूतजयकृष्णकृतमजामिलोपाख्यानं सतां मुदे भूयात्।

विषयः। अजामिलनाम्नो विप्रस्य जन्मावधामरणान्तविवरणं।

No. 811. वामनचित्रचरित्रं, विष्णुस्तवद्वयसहितं।

Substance, country paper, 10 × $4\frac{3}{4}$ inches. Folia, 5. Lines 16 on a page. Extent, 200 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Vámanachitracharitra. A poetical description of the dwarf incarnation of Vishṇu. By Jayakṛishṇa. Attached to the work are two short hymns in praise of Vishṇu.

Beginning. मन्मुमतोऽप्यतनोत्तां स्वजनस्योत्तुङ्गतामतन्द्रोयः (?)।

तं वन्दे श्रीकान्तं लीलावामनमवामनं विभवैः ॥ १ ॥

विधिमुखैरमरैर्विमतार्दितैः (?) सविनयं नयशालिभिरर्थितः।

सकरुणः शरणागतशर्मदः स हरिराविरभूत् किल कश्यपात् ॥

End. परिचारकवंशजन्मना जयकृष्णेन कृता स्ववाग्मिका।

वटुवेशपटार्हरेर्मुदे रचना सोक्रियतां महात्मभिः ॥ ५६ ॥

Colophon. श्रीमत्परिचारकसत्कुलप्रसूतजयकृष्णरचिता श्रीमद्भगवद्वामनचित्रचरित्ररचना सतां मुदे भूयात्।

विषयः। वामनावतारलीलावर्णनं।

No. 812. गोवर्द्धनधृतकृष्णचरित्रं।

Substance, country paper, $9\frac{3}{4}$ × $4\frac{1}{2}$ inches. Folia, 3. Lines 16 on a page. Extent, 100 s'lokas. Character, Nágara. Date ? Place of deposit. Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Govardhanadhrita Krishṇa Charitra. A poetical description of a miracle performed by Kṛishṇa by holding up the mount Govardhana near Vrindávana like an umbrella over the cowherds and their flock of that place to protect them from a monstrous shower of rain with which Indra wished to destroy them. A legend occurs in the Trittiriya Áraṇyaka in which Vishṇu is said to have performed a similar feat. By Jayakṛishṇa.

Beginning. स श्रीकृष्णः पायाद्भुवि यः स्रीयमानवन्मदापायात्।
पूजां नन्दारब्धां जग्राह पुरा बलारिणा लब्धाम् ॥ १ ॥
एकदा सकलगोकुलगोपैरर्थितो व्रजपतिः किल नन्दः।
गोकुलस्य कुशलार्थमुपेतं गोपतेरुचिरमर्हणमैच्छत् ॥ २ ॥

End. या भगवत्परिचारकजयकृष्णेन रचिता हरेस्तुष्ट्यै।
सा गिरिधरहरिलीलावर्णनरचना प्रमोदयत्वनघान् ॥ ५२ ॥

Colophon. श्रीभगवत्परिचारकजयकृष्णकृतं गोवर्द्धनधृतकृष्णचरित्रं सदा सतां मुदे भूयात् ॥

विषयः। श्रीकृष्णस्य गिरिवरोद्धरणलीलावर्णनं।

No. 813. लघुजातकमूलसहिता शिष्यहिताभिधा, लघुजातकटीका।

Substance, country paper, 10½ × 3 inches. Folia, 74. Lines 6 on a page. Extent, 1000 s'lokas. Character, Nágara. Date ? Place of deposit. Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Laghujátaka. An astrological treatise on the influence of astral conjunctions on the life of man, and on calculating nativities, being an abridgement of a work on the subject called *Játaka*, or, to distinguish it from the work now under notice, Vṛihajjátaka. By Bhaṭṭotpala. There is a commentary by this author on the larger work. The text of the Laghujátaka in the codex before me has a commentary entitled *S'ishyahitábhidhá Ṭíká*, by an unknown author. The MS. is incomplete.

Beginning. टी०प्रा०। प्रणिपत्य महादेवं भुवनगुरुञ्च दिनकरञ्च लोकेशं।
भट्टोत्पलेन लघुतरजातकटीकां * * रोमि हितां ॥ १ ॥
सतामयमाचारो यच्छास्त्रप्रारम्भेष्वभिमतदेवतानमस्कारं कुर्वन्ति, तदयमवन्तिकाचार्यवराहमिहिराज्ञस्य (?) वरप्रसादः ज्योतिःशास्त्रमङ्गुहं कृत्वा तदेव पठनभीरुजनकृते मङ्क्षिप्तं गणितसङ्गुहं कृत्वा होराशास्त्रमूर्त्तिं प्रवक्तुकामोऽशेषविघ्नोपशान्तये। भगवन्तं सूर्यमादावेव प्रणमति।

मूल०प्रा०। यस्योदयास्तसमये सुर(मु)कुटनिघृष्टचरणकमलोऽपि।
कुरुतेऽञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः ॥

End. (खण्डितत्वाच्छेषवाक्यादिकं नास्ति।)

विषयः। १ अध्याये, राशिप्रभेदकथनादि। २, ग्रहयोनिभेदकथनादि। ३, गर्भाधान-मुहूर्त्तादिकथनं। ४, सूतिकाद्यन्तकथनं। ५, शिशुसूतिकयोररिष्टयोग-कथनं। ६, शिशोरायुर्दायकथनं। ७, ग्रहदशान्तर्दशादिविभागकथनं। ८. राश्यष्टवर्गशुभाशुभफलं। ९, ग्रहयोगफलकथनादि। १०, राजयोगादि-कथनं। ११, स्त्रीजातककथनं। १२, मरणज्ञानकथनादि। (इतः परं खण्डितं)

No. 814. काशिकावृत्तिः।—५, ६, ७, ८ अध्यायस्य च।

Substance, country paper. The Fifth Chapter 9 × 3½ inches. Folia, 49. Lines 15 on a page. The sixth Chapters 11¾ × 3¾ inches. Folia, 175. Lines, 8 on a page. The seventh and eight Chapters 11¾ × 3¾ inches. Folia, 180. Line 9 on a page. Extent of the 4 chapters 12000 s'lokas. Character Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance. Fifth Chapter old and smudgy, the remainder, old but not smudgy. Prose. Generally correct.

Kás'iká-vṛitti. A commentary on the grammatical aphorisms of Páṇini. By Vámana. The MS. is incomplete containing the last four chapters only; but it is old and correct. There is a good MS. of this work in the library of the Asiatic Society, and codices are available in the Libraries of the Sanskrit Colleges of Calcutta and Benares. Next to the Mahábháshya of Patañjali, this work enjoys the highest repute.

Beginning. ५ अध्यायारम्भः। प्राक् क्रीताच्छः। तेन क्रीतमिति वक्ष्यति।

६ अध्यायप्रा०। एकाचो द्वे प्रथमस्य। अधिकारोऽयम्। एकाच इति च द्वे इति च प्रथमस्येति च त्रितयमेतदधिकृतं वेदितव्यं।

७ अध्यायप्रा०। युवोरनाकौ। अङ्गस्येत्येव। युव इत्येतयोरुन्मृष्टविशेषणयो-रनुनासिकयणोप्रत्यययोर्ग्रहणम् (?)। तयोः स्थाने अन् अक् इत्येतावादेशौ भवतः।

८ अध्यायप्रा०। सर्वस्य द्वे। सर्वस्येति च द्वे इति च एतदधिकृतं वेदितव्यं।

End. ५ अध्यायसमा०। निर्गता प्रवाणी अस्मिन्निष्प्रवाणिः। सूर्यादिभ्यो चिरा-दपहृत इत्यर्थः।

Colophon. इति काशिकायां वृत्तौ पञ्चमाध्यायस्य चतुर्थः पादः।

६ अध्यायसमा० । हिरण्यशब्दाद्धितस्य मयटो मशब्दलोपो निपात्यते हिरण्ययः ।

इति काशिकायां वृत्तौ षष्ठाध्यायस्य तुरीयश्चरणः समाप्तः ।

७ अध्यायसमा० । ई च गणः । गणेरभ्यासस्य ईकारादेशो भवति चङ्परे णौ परतः । चकारादच । अजीगणत् अजगणत् ९७ ।

इति वामनकाशिकायां वृत्तौ सप्तमाध्यायस्य चतुर्थः पादः । समाप्तः सप्तमोऽध्यायः ।

८ अध्यायसमा० । उदात्त उदयो यस्य स उदात्तोदयः उदात्तपर इत्यर्थः । एवं प्रत्यापद्यते ।

इति वामनकाशिकायां वृत्तौ अष्टमाध्यायस्य चतुर्थः पादः समाप्तः ।

विषयः । पाणिनिकृताया अष्टाध्याय्याः पञ्चमाध्यायगतानां 'प्राक्क्रीताच्छः' इत्यादिसूत्राणां व्याख्या ।

तस्या एवाष्टाध्याय्याः षष्ठाध्यायगतानां "एकाचो द्वे प्रथमस्य" इत्यादिसूत्राणां व्याख्या ।

तस्या एवाष्टाध्याय्याः सप्तमाध्यायगतानां "युवोरनाकौ" इत्यादिसूत्राणां व्याख्यानं ।

तस्या एवाष्टाध्याय्या अष्टमाध्यायगतानां 'सर्वस्य द्वे' इत्यादिसूत्राणां व्याख्यानं ।

No. 815. कवीन्द्रचन्द्रोदयः ।

Substance, country paper, $11\frac{1}{2} \times 4$ inches. Folia 31. Lines 10 on a page. Extent, 900 s'lokas. Character, Nágara. Date S. 1734. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and Verse. Incorrect.

Kavíndra-chandrodaya. A miscellany in prose and verse, containing notices of nearly a hundred different poets of the middle ages. By Vidyánidhi Kavíndra.

Beginning. पुण्डरीकाक्षचण्डांशुचण्डीं चण्डीश्वरं तथा ।
वेतण्डतुण्डमानम्य निबन्धोऽयं निबध्यते ॥ १ ॥
तमस्तमःसङ्घविघातकारी समस्तविद्वत्परितापहारी ।
कवीन्द्रचन्द्रोदयनामधारी प्रबन्ध एषोऽस्तु जगत्प्रचारी ॥ २ ॥
विद्यानुकृतफणीन्द्रो विजितमतीन्द्रो यतीन्द्रो यः ।
स्वयशोकृतपृथिवीन्द्रो जयति कवीन्द्रो यतिर्जगति ॥ ३ ॥

गोदातीरनिवासी पद्याद्येनाश्रिता काशी ।
ऋगवेदीयाभ्यस्ता साङ्गा शाखाश्वलायनी शस्ता ॥ ४ ॥
निःस्पृहता विषयेभ्यः परनिजजनताभिमानेभ्यः ।
प्राप्ता शैशवसमये विश्वेशानुग्रह दृढ्ये ॥ ५ ॥
लघुवयसा गततमसा * * लाधिक्याद्भिद्रवद्रजसा ।
यन च विद्या तरसा तपसा सर्वा वशीकृतैव रसा ॥ ६ ॥
बुद्धा विबुधाधिकृतां दत्ता यस्मै कवीन्द्रसत्पदवी ।
यवनकरग्रहणाश्चौ मग्ना येनोद्धृता पृथिवी ॥ ७ ॥
विजितमहीतल तस्मै (?) दत्तं विद्यानिधानपदमस्मै ।
आचार्याक्षयमहितं यतिबुधवृन्दैर्महीतले महितं ॥ ८ ॥ इति कवीचन्द्रवर्णनं ।
श्रीमत्काशिविकाशिभिः सुकविभिस्सद्वत्प्रयागासिभिः(?)
नानादेशनिवासिभिश्च रचिता विद्यागणोल्लासिभिः ।
श्रीकृष्णेन सरस्वतीपदयुताचार्योपनामश्रित-
श्रीविद्यानिधिसत्कवीन्द्रविषया पद्यावली लिख्यते ॥ १ ॥ तत्रादौ कवीन्द्राष्टकं ।

End. प्रयागतः स्नानपुण्याम्बुपूरैः समुत्थाय सत्कीर्त्तिवल्लीमतल्लीः ।
पवित्रोरुगोत्रा सुरत्राणकारी सहाकीन्द्रसंसत्कविन्द्रो(?) विभाति ॥
* * सद्रसालङ्कृतिरुद्रल्लसन्ती वसत्प्रमदारलीलयैव (?) वाणी ।
कवीन्द्रस्य मुनेः कवीन्द्रशिरोमणेरेति शिरोमणित्वं ॥ ९ ॥
दैत्या * वोपचितोचितश्रीसुखाय यो दक्षिणसन्मुखस्थः ।
दनांनिके(?)प्युत्कटकायकान्तिर्जीव्यात्कवीन्द्रः कविरद्भुतोऽयम् ॥१०॥
एते रघुनाथभट्टगुर्जरस्य ।

Colophon. श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीकवीन्द्रचन्द्रोदयपुस्तकं ।

विषयः । हेमराजमिश्र—माधवभट्ट—खड्गमिश्र—रघुनाथदीक्षित—क्षमानन्दवाजपेयि—भय्याभट्ट—केशवमिश्र—मीमांसकसिद्धेश्वरभट्ट—चक्रपाणिपण्डित—गणेशभट्टधर्माधिकारि—परमेश्वराचार्य—रामकृष्णनागर—मैथिलोपाध्यायविश्वम्भर—जगदीशजानि—श्रीरामेश्वरपञ्चाननभट्टाचार्य—जयकृष्णोपाध्याय—गौरीपतिमिश्र—दामोदरभट्टकालोपनामका—ऽग्निहोत्रिधर्मेश्वर—व्रजभूषणकवि—कृष्णचन्द्रभट्टा—ऽनिरुद्धमिश्र—बालकृष्णज्योतिर्वित्—पूर्णानन्दब्रह्मचारि—कालिदासमिश्रपौत्र-मुरलीधर—कृष्णाचार्य—पट्टवर्द्धनमहादेवभट्ट-दाक्षिणात्यलीलाधरभट्ट—मैथिलवदरीनाथोपाध्याय—होरारामकवि—गणेशभट्ट—मौनिविश्वेश्वरभट्ट—श्रीमहीपत्युपाध्याय—शिवदत्तमिश्र—कविशेखर—रघुनाथोपाध्याय—तिलभाण्डेश्वर—ब्र-

ब्रह्मेन्द्रसरस्वती—ब्रह्मेन्द्रस्वामि—नारायणचतुर्वेदि—गङ्गारामभिश्र—जगन्नाथपञ्चाननाचार्य—मैथिलकायस्थ—दयालभिश्र—वीरेश्वरभट्ट—कमलनयनदीक्षित—परमेश्वराचार्य—त्वरितगतिकवि—रामभद्रवाजपेयि—दिवाकरभट्ट—रघुनाथभट्ट-गुर्जरप्रभृतिभिः कृतानां श्रीसर्वविद्यानिधानकवीन्द्राचार्यप्रशंसापराणां गद्यपद्यानां सङ्ग्रहः ।

No. 816. सङ्क्षिप्तप्रयोगः ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 78. Lines 9 on a page. Extent, 1200 s'lokas. Character, Nágara. Date, Sk. 1871. Place of deposit. Calcutta, Government of India. Appearance, soiled and old. Prose. Generally correct.

Sañkshipta Prayoga. A manual of sacramentary rites from conception to marriage, founded on the rules of A's'valáyana. Anonymous.

Beginning. श्रीरामं सपरीवारं गणेशं च सरस्वतीम् ।
आश्वलायन-तच्छिष्यान् प्रणम्य पितरं गुरुम् ॥
अथ किञ्चित् सङ्क्षेपेण प्रयोगमात्रमुच्यते ।

End. ततो गृहप्रवेशनीयहोमः कार्यः । ततः शुभदिने स्वस्त्यादि वाचयित्वा स्वलङ्कृतः स्वलङ्कृतां राजावुपगच्छेत् ।

Colophon. इति वधूसहितस्य गृहप्रवेशविधिः ।

विषयः । दुष्टप्रथमरजोदर्शनशान्तिविधिः । गर्भाधानविधिः । पुंसवन-सीमन्तोन्नयन-विधिः । जातकर्मनामकरणादिविधिः । चूडाकर्मोपनयनविवाहवधूप्रवेशादि-कर्मविधिश्च ।

No. 817. ऋषितर्पणं ।

Substance, country paper, 9×4 inches. Folia, 27. Lines 9 on a page. Extent, 500 s'lokas. Character, Nágara. Date Sm. 1802. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Ṛishitarpaṇa. Directions for offering water to the first seven saintly progenitors of the human race, now identified with the stars

of Ursa Major. The names of the sages are Maríchi, Atri, Aṅgiras, Pulastya, Pulaha, Kratu, and Vasishṭha.—Anonymous.

Beginning. अथ ऋषीणामावाहनप्रतिष्ठाषोडशोपचारैः पञ्चामृतेन पूजातर्पणं । आच॰ प्रा॰ अचाद्य॰ सप्तर्षीणां प्रीत्यर्थं छन्दसां सामसञ्ज्ञिकानां यातयामत्वनिवृत्त्यर्थं वेदस्याध्यापननिमित्तमुपाकर्मोत्सर्गकर्माहं करिष्ये इत्यादि ।

End. अद्य पूर्वा॰ वेदस्याध्यापननिमित्तमृषीणां पूजनतर्पणकर्मणो यन्न्यूनातिरिक्तं तत्सर्वं भवतां ब्राह्मणानां वचनात् तीर्थविष्णोः प्रसादात् सर्वं परिपूर्णमस्तु उत्तरे कर्मणि निर्विघ्नमस्तु इष्टपुत्र॰ वाञ्छितार्थफलप्राप्तिरस्तु ।

विषयः । सप्तर्षीणां पूजनतर्पणादिकथनं ।

No. 818. बालतन्त्रं ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 43. Lines 10 on a page. Extent, 900. s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, soiled and old. Verse. Generally correct.

Bála Tántra. A treatise on the diseases of women and children, founded on the *Prayogas'ara*, and other Tantras. By Kalyána, son of Mahidhara, and grandson of Rámadása. The author was born in Ahichhatrá, but the work was completed at Benares on Sunday the full moon of Srávana in the S'aka year 644.=A. D. 720. Contents I—III. Treatment of barrenness. IV. Treatment of females during pregnancy. V. Prevention of miscarriage and abortion. VI. Means for promoting easy delivery. VII—XI. Directions for rearing children. XII. Infantile fevers. XIII. Infantile piles, cough, convulsions and boils. Treatment of diseases in the eyes, nostrils, head and other organs of children.

Beginning. विघ्नव्रततिविध्वंसकारिणं विघ्नहारिणं ।
कल्याणोऽहं नमस्कुर्वे विघ्नेशं ग्रन्थसिद्धये ॥ १ ॥
प्रयोगसारप्रमुखागमेषु प्रोक्तेषु शास्त्रेषु च सुश्रुताद्यैः ।
यदुक्तमेकत्र निबध्यतेऽस्मिन् ग्रन्थे मया तत् खलु बालतन्त्रे ॥ २ ॥

End. पद्यान् विलोक्य प्रचुरप्रयोगान् पद्यैः स्वकीयैः कतिचित् प्रदानैः ।
प्रोक्ता चिकित्सा रुचिरा शिशूनां सदेशकालादिसमीक्ष्य कुर्यात् ॥ २७ ॥

अहिच्छत्राच्च यो जातः पण्डितैकशिरोमणिः ।
रामचन्द्रार्चनरतो रामदासः सतां प्रियः ॥ २८ ॥
विद्वज्जनाह्लादकरोऽतिमानी महीधरः सर्वजनाभिवन्द्यः ।
लक्ष्मीनृसिंहाङ्घ्रिसरोजभृङ्गस्तदात्मजोऽभूद्दिदिनागमार्थः ॥ २९ ॥
कल्याण इत्युक्तत्वात् (?) नामधेयस्तदात्मजा ग्रन्थवरान् विलोक्य ।
परोपकाराय प्रबन्धतन्त्रं सतां समालोकनयोग्यमेतत् ॥ ३० ॥
युगवेदरसाकाशमिते वर्षे नभे रवौ ।
पौर्णिमायां चकारेदं लिलेख च शिवालये ॥ ३१ ॥
स्वभावात् कृशकायो यः स्वभावाल्पपावकः ।
स्वभावाद्बलो यश्च तस्य नास्ति चिकित्सितम् ॥ ३२ ॥

Colophon. इति श्रीकल्याणेन कृते बालतन्त्रे नानाप्रयोगकथनं नाम चतुर्दशः पटलः ।

विषयः । १ पटले. बन्ध्यात्वप्रतीकारः । २, साधारणासाधारणबन्ध्यात्वनिवारकौषधकथनं । ३, पुरुषवीर्यनिरोधनं । ४, गर्भाधानदिवसीयस्त्रीकर्त्तव्यस्नानविधिः । ५, गर्भरक्षाप्रकारः । ६, सुखप्रसवोपायः । ७, ८, ९, १०, ११, नानाविधबाल-ग्रहनिवारणादिप्रकारः । १२, बालकज्वरचिकित्सा । १३, अर्शकाशमूर्च्छा विस्फोटकादिबालरोगचिकित्सा । १४, बालकनेत्रनासिकाशिरःप्रभृतिषु जात-रोगचिकित्सा ।

No. 819. जैमिनिसंहिता, मध्यमखण्डात्मिका ।

Substance, country paper, 11 × 6 inches. Folia, 234. Lines 11 on a page. Extent, 5000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Incorrect.

Jaimini Sañhitá. The name of this MS. is doubtful. At the ends of the 2nd and the 3rd chapters, it is called Brahmáṇḍa Puráṇa, and the colophon at the end of the work likewise has the same name, but it is in a different handwriting from that of the body of the text. The epigraph of the first chapter calls the chapter "the first of the middle part *(madhya bhága)* of the Jaimini Sañhita, a Mahá Puraṇa of 50,000 s'lokas." *Ityádi mahápuráṇe pañchás'ití sáhasrikáyám jaimini-sañhitáyám madhyabhágé prathamodhyáyah.* The epigraphs of the other chapters have only *iti s'rí* and the numbers of the chapters. According

to the Nárada Puráṇa, the Brahmáṇḍa P. contains only 12,000 verses, whereas the MS. under notice in its entirety should embrace 50,000 verses. The Brahmaṇḍa P. is divided into three parts; but the contents of its 2nd part, as given in the Nárada P. appears to be different from those of the MS. I am disposed therefore to take it as a part of the Jaimini Saṅhitá, and not that of the Brahmáṇḍa P. It should be added, however, that the middle part of the latter has no where yet been found, and according to Wilson (*Vishṇu Puráṇa*, p. liv) the entire work " is considered to be in much the same predicament as the Skánda, no longer procurable in a collective body, but represented by a variety of Khaṇḍas and Máhátmyas, professing to be derived from it," and this may be one of them.

Contents, I. Description of Ayodhyá and the genealogy of the Ikshváku race. II. Account of Nahusa, Yajáti &c., III. Story of Bhadras'reṇya and Urvasí. IV to XIV wanting in the MS. XV. Story of Kás'írája. XVI to XVIII. Do of Tálajaṅgha. XIX. Do of Garuḍa. XX—XXI. Sagara's establishment of a kingdom in Ayodhyá. XXII. Nárada's visit to Náráyaṇa sleeping on the primeval waters. XXIII. Conversation of Nárada and Náráyaṇa. XXIV—XXV. Story of King Bali. XXVI. Prahláda's advice to Bali. XXVII—XXVIII. Story of Kártavírya. XXIX to XXXIII. Do of Ila Rája. XXXIV to XXXVII. Merit of dedicating lamps to the glory of various gods. XXXVIII—XIL. Do. of a saint in the court of Kártavírya. XL to XLIII. Do of Sílavatí, a chaste lady. XLIV. Birth of the sage Durbásas. XLV—XLVI. Destruction, by Rávana, of a sacrifice celebrated by Marutta, and its consequences. XLVII. Dislike of worldly pleasures by Kártavírya. XLVIII. Origin of the human frame, XIL—LII. Asita's advice to Kártavírya. LIII—LIV. Description of the court of Kártavírya. LV. Kusámba's obtaining a son by penance. LVI. Birth of Vis'vámitra. LVII—LXXXIV. Life of Paras'uráma. LXXXV—XCII. Story of Sagara. XCIII. Description of Bháratavarsha. XLIV. Parasuráma visited by certain sages.

Beginning. विश्वोत्पत्त्यादिषु गुणतया यत्कलां शम्भु मूर्त्ते-
रन्तर्व्यामोहयति सततं शक्तिलेशो यदीयः ।
शश्वच्छान्तं सकलभुवनव्यापि नारायणाख्यं
प्रत्यग्ज्योतिः स्फुरतु हृदये सच्चिदानन्दरूपम् ॥

हमाम्भोरुहकेसरारुणरुचामालोलदुर्वादल-
श्यामानावकरोतु (?) यास्य गतयो श्रेयांसि गात्रे त्विषाम ।
श्रीभूम्योरितरेतरव्यतिकरव्यक्तं वपुर्वो निशं
तत्पीनस्तनचूचुकाम्बुदर * ल्लामक्तहस्त हरेः (?) ॥
ऋषय ऊचुः । विचित्रार्थकथोपेता ब्रह्माण्डीया सुविस्तरा ।
पुराणसंहिता सूत त्वया सम्यगिहोच्यते ॥
भूयोऽप्याचक्ष्व नः सम्यग् विस्तरेण महामते ।
हिरण्यनाभः किं भूयो जैमिनिं पर्यपृच्छत ॥
सूत उवाच । श्रुत्वा बहुविधा रम्याः कथा मुनिमुखोद्गताः ।
हिरण्यनाभो विप्रेन्द्रो जैमिनिं पुनरब्रवीत् ॥
भगवन् यन्मया पृष्टं त्वया तत्सम्यगीरितं ।
महदादि हि जगतो नवधा सृष्टिलक्षणं ॥
नक्षत्राणां ग्रहाणाञ्च ज्योतिषां मरुतां तथा ।
स्थितिश्चारक्रमश्चैव लोकानाञ्च महामरैः ॥
संस्थानं द्वीपवर्षाणां पर्वतानाञ्च भूतले ॥
नदीनदसमुद्राणां नामानि च यथाक्रमम् ।
कथितानि त्वया सम्यग् ब्रह्मर्षे पृच्छतो मम ॥
नानाकथामृतमिदं भवद्वक्त्रेन्दुमण्डलात् ।
श्रूयमाणं श्रुतिपुटैर्न तृप्यामि पिबन्नपि ॥
सोऽहमिच्छामि भगवन् खण्डोऽयं नवमः कथम् ।
चतुःशतं योजनानां सहस्रत्वमुपागतः ।
खण्डानामुत्तमो ह्येष कर्मभूमिश्च कर्मिणाम् ॥
अत्रैव पुरुषार्थाश्च साध्यन्ते ल * मानवैः ।
* यं सगरपुत्रैः स (?) योजनानां चतुःशतं ॥
समुद्रो योजितः कस्मात् पश्चिमे ब्रूहि मेऽखिलं ।
सगरः स महीपालः कस्य वंशसमुद्भवः ॥
तस्य पुत्रैरयं द्वीपः सङ्खिन्नः पयसां निधेः ।
खण्डोऽयं कतिसङ्ख्यानि योजनानि विलोपितः ॥
रामेणाभूत् पुनः सृष्टं कियदब्धेर्महामुने ।
रामनामा च को यस्य समुद्रो मोरणं मतः (?) ॥
प्रभावोऽद्यापि लोकेषु कीर्त्यते तच्च मे मुदा ।

सगरस्य च मे शंस जन्म कर्म च विस्तरात् ।
यन्नाम्नाद्यापि लोकेषु प्रख्यातोऽभूद्पान्निधिः ॥
जैमिनिरुवाच । शृणुष्व मत्तः सकलं यत्पृष्टोऽहमिह त्वया ।
भारतं खण्डमुद्दिश्य सगरश्च महीपतिं ॥ इत्यादि ।

End. ततः सरभसं रामस्यापे कालानलोपमे ।
सुवर्णपुङ्खनिशितं सन्दधे शरमुत्तमम् ॥
तस्मिन्नस्त्रं महाघोरं भार्गवं वह्निदैवतं ।
युयुजे भृगुशार्दूलः समन्त्राभ्यामतत्परः ।
ततश्चाल वसुधा सशैलवनकानना ॥

Colophon. इति ब्रह्माण्डपुराणं सम्पूर्णम् ॥

विषयः । १ अध्याये, अयोध्यावर्णनं, इक्ष्वाकुवंशवर्णनारम्भश्च । २, नहुषययात्यादिराजवृत्तान्तकथनं । ३, भद्रश्रेण्योर्वंश्यादेश्च वृत्तान्तकथनं । (४ अध्यायावधि १४ अध्यायपर्यन्तपाठो नास्तीत्यनुभीयते ।) १५, काशिराजादिवृत्तान्तः । १६, शङ्कुतालजङ्घादिराजवृत्तान्तकथनादि । १७, १८, तालजङ्घपराजितस्य सुबाहुराजस्य सभार्यस्य और्वमुनेराश्रमवासादेर्वैनतेयस्य और्वाश्रमागमनवृत्तान्तस्य च कथनं । (अत्र सप्तदशाध्यायसमाप्तिर्नदृश्यते । एकदैवाष्टादशाध्यायसमाप्तिः ।) १९, गरुडस्य पुनरौर्वमहर्षिनिकटे गमनादि । २०, सगरस्य अयोध्यापुरीगमनादिकथनं । २१, सगरकर्तृकराज्यशासनादि । २२. नारदस्य क्षीरसमुद्रशायिनो भगवतो निकटे गमनादि । २३, नारदभगवत्कथोपकथनादि । २४, २५. बलिप्रह्लादवृत्तान्तकथनादि । २६, २७. २८, बलिं प्रति हरिसमाराधनविषये प्रह्लादकर्तृकं व्रतानुष्ठानोपायकथनं । कार्त्तवीर्यतपःकरणं, नारदकार्त्तवीर्यसंवादादिकथनञ्च । (२६ शेषभागः २७ अध्यायश्च न दृश्यते) । २९, ३०. ३१, पुत्रकामनार्थमिलराजकृतपितृयज्ञकथनं । इलस्य राज्ञः स्त्रीभावप्राप्त्यादि च । ३२, शिवप्रसादात्तस्य स्त्रीत्वमोक्षादि । ३३, गोकर्णतीर्थे इलस्य गमनकथनादि । ३४, ३५. ३६, केशवाराधनाङ्गीभूतदीपप्रतिष्ठाप्रकारः । ३७, भद्रदीपप्रतिष्ठाख्यव्रतविधिकथनादि । ३८, कार्त्तवीर्यदृष्टापूर्वमुनिरूपवर्णनादि । ३९, मुनिदर्शनतः कार्त्तवीर्यविस्मयभवनादिकथनं । ४०, ४१, ४२, ४३, पतिव्रतायाः शीलवत्या उपाख्यानं । ४४, रुद्रक्रोधाद्दुर्वाससो मुनेरुत्पत्तिकथनादि । ४५. रावणकृतमरुत्तराजयज्ञभङ्गो रावणमरुत्तयुद्धादि च । ४६, रावणकार्त्तवीर्ययोर्युद्धवर्णनादि । ४७, कार्त्तवीर्यस्य वैराग्योदयादिकथनं । ४८, शरीरोत्पत्तिवर्णनादि । ४९, ५०, ५१,

५२, अमितमुनिः कार्त्तवीर्याय तत्त्वज्ञानमुपदिशति। ५३. विविधजनैरुपास्यमानस्य कार्त्तवीर्यस्य राज्ञः सभावर्णनादि। ५४, सभायामागतस्य कस्यचिद् द्विजवरस्य पूजनं परस्परकुशलप्रश्नादि च। ५५, कुशाम्बराजस्य तपस्यादिना पुत्रोत्पत्तेर्वृत्तान्तादि। ५६, विश्वामित्रोत्पत्तिवर्णनादि। ५७, अवधि ८४, पर्यन्तं परशुरामजन्मकर्मकथनादि। ८५, अवधि ९२, पर्यन्तं सगरजन्मकर्मादिकथनं। ९३, भारतवर्षवर्णनादि। ९४, महेन्द्राचलवासिपरशुरामदर्शनार्थं मुनीनां गमनादिवृत्तान्तवर्णनं। (असंलग्नासमाप्तवृत्तान्तत्वात् खण्डितमिदमिति भाति। अत्र प्रायोऽसंलग्ना अध्यायाङ्काः।)

No. 820. मध्यमनोरमा, आरम्भावधिलकारार्थप्रक्रियापर्यन्ता।

Substance, country paper, first Chapter $9\frac{3}{4} \times 5\frac{1}{4}$ inches. Folia, 37. Lines 13 on a page. Second Chapter, $12\frac{1}{2} \times 5\frac{1}{4}$ inches. Folia, 85. Lines 12 on a page. Extent, 5400 s'lokas. Character, Nágara. Date Sm. 1850. Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Generally correct.

Madhyamanoramá. A commentary on the *Madhya-siddhánta-kaumudí*, an abridgment of the Sanskrit Grammar of Páṇini. By Ráma S'armá. There are three abridgments of Páṇini; the most elementary is called *Laghukaumudí*, the next *Madhya-kaumudí* alias *Madhya-siddhánta-Kaumudí* and the most elaborate, *Síddhánta-Kaumudí*, which embraces the whole of the aphorisms of Paṇini arranged in a convenient form. The first two are by Varadárája, a disciple of Bhaṭṭoji Dikshita, who compiled the last. Each of these abridgments has a host of commentators. I have heard of a fourth abridgment under the name of *Sárakaumudí*, but I have not yet seen it. Aufrecht's Bodleyan Catalogue, p. 165.

Beginning. महेश्वरं नमस्कृत्य पाणिन्यादीन् गुरूनपि।
करोमि मध्यकौमुद्या व्याख्यां मध्यमनोरमां॥
ग्रन्थारम्भे विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति, नत्वेति। वरदराजनामा ग्रन्थकारकः पाणिनीयानां मध्यसिद्धान्तकौमुदीं करोति।

End. इत्थं शब्दन बुध्यते अत एवाह। अवस्कन्दनलवनरूपेति द्विवापत्तेरेति। क्रियासमभिव्याहारे द्वे वाच्ये इत्यनेनेत्यर्थः।

Colophon. इति लकारार्थप्रक्रिया । श्रीशिवानन्दभट्टानामाज्ञया रामशर्मणा व्याख्यातं मध्यसिद्धान्तकौमुद्याष्टीकाया मध्यमनारमायाः सुप्तिङन्तं समाप्तम् ॥

विषयः । मध्यसिद्धान्तकौमुद्या प्रथमत आरभ्य लकारार्थप्रक्रियापर्यन्तानां प्रकरणानां व्याख्यानम् ।

No. 821. शिवपूजापद्धतिः ।

Substance, country paper, $10\frac{1}{2} \times 4$ inches. Folia, 20. Lines 10 on a page. Extent, 500 s'lokas. Character, Nágara. Date Sm. 1843. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'ivapújá-paddhati. Directions for worshipping S'iva. Anonymous.

Beginning. अथ शिव(पूजा)पद्धतिर्लिख्यते । ब्राह्मे मुहूर्त्ते चोत्थाय यामिनीचैलमुत्सृजेत् । सहस्रदलकमलमध्यस्थस्य(?) मूर्द्ध्नि ध्यायेद् गुरुं समं ॥ तता ध्यानं ।

End. निर्माल्यं मस्तके धारयेत् । मूलं । पादोदकं पिबेत् । नैवेद्यं तद्भक्ताय विभजेत् । स्वयं भुक्त्वा तन्मयो विहरेत् ।

Colophon. इति शिवपूजापद्धतिः समाप्ता ।

विषयः । शिवमूर्त्तिपूजनविधिः ।

No. 822. पराशरोपपुराणं ।

Substance, country paper, $11 \times 4\frac{3}{4}$ inches. Folia, 57. Lines 8 on a page. Extent, 1000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Parásara Upapuráṇa. An Upa or minor Puráṇa. Contents, 1. Descriptions of Upapuráṇas, 2. Origin of the universe. 3. Relative importance of the various objects of creation. 4. Sectarial marks. 5—6. Meaning of S'rutis. 7. Praise of Bráhmaṇs, 8. Knowledge of the Divinity. 9. Daily religious duties. 10. Occasional religious ceremonies. 11. Conduct of the sinful. 12. Forbidden food. 13 to 15. Expiations for various offences. The MS. is probably incomplete.

Beginning. सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥ १ ॥

मरुपृष्ठे समासीनं संसारोदधितारकं ।
शुकं प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ॥ २ ॥
पप्रच्छ परमं गुह्यं भक्त्या परमया मुदा ।
भवपाशेन बद्धानां भवपाशविमोचनं ॥ ३ ॥
पराशरोऽपि भगवान् भवानीपतिवल्लभः ।
प्राह कारुणिकः श्रीमान् ध्यात्वा साम्बं त्रिलोचनम् ॥ ४ ॥

End. अवश्यमनुभोक्तव्यं पापानां फलमास्तिक ।
प्रायश्चित्तविहीनेन प्रायश्चित्तमथाचरेत् ॥ १०१ ॥
सर्वमुक्तं समासेन प्रायश्चित्तं शुकानघ ।
श्रद्दधानस्य दातव्यं न देयं यस्य कस्यचित् ॥ १०२ ॥

Colophon. इत्युग्रपुराणे पाराशरे पञ्चदशोऽध्यायः ।

विषयः । १ अध्याये, मुनिकृतशिवस्तुतिः । मुनिकृतसनत्कुमार-नारसिंहाद्युपपुराणादि-रचनादि । २, सृष्टिक्रमकथनं । ३, अपेक्षाकृतपदार्थाधिक्यवर्णनं । ४, उपासनानुसारेण त्रिपुण्ड्रोर्द्ध्वपुण्ड्रादिचिह्नधारणवर्णनं । ५, ६, मृत्यर्थमङ्गुलकथनादि । ७, ब्राह्मणवैभवकथनं । ८, ज्ञानतत्त्वकथनं । ९, प्रातःकृत्याद्याह्निककृत्यकथनं । १०, श्रुतिस्मृत्युक्तधर्मानुष्ठानकथनं । ११, पापिचरितादिकथनं । १२, अभक्ष्यान्नकथनं । १३, १४, १५, प्रायश्चित्तादिकथनं ।

No. 823. निघण्टुः ।

Substance, country paper, $7\frac{3}{4} \times 5$ inches. Folia, 78. Lines 23 on a page. Extent, 1350 s'lokas. Charaeter, Nágara. Date ? place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Incorrect.

Nighaṇṭu. A list of synonyms of medicinal drugs. Anonymous.

Beginning. नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मं ।
लोके जरारुग्भयमृत्युनाशं धातारमीशं विविधौषधीनाम् ॥ १ ॥
अनेकदेशान्तरभाषितेषु सर्वेष्वथ प्राकृतसंस्कृतेषु ।
गूढेष्वगूढेषु च नास्ति सङ्ख्या द्रव्याभिधानेषु तथौषधीनां ॥ २ ॥
प्रयोजनं यस्य तु यावता स्यात् तावत्सगृह्णाति यथाम्बु कूपात् ।
तस्मान्निघण्टुर्मुनिभिरनन्ताद् गृह्णाम्यहं किञ्चिदिहैकदेशं ॥

End. (खण्डितत्वात्समाप्तिवाक्यादिकं नास्ति ।)

विषयः । गुडूच्यादिनानौषधीनां नामानि गुणाश्चोक्ताः ।

No. 824. आह्निकप्रकाशः, वीरमित्रोदयीयः ।

Substance, country paper, $14\frac{3}{4} \times 6$ inches. Folia, 174. Lines 11 on a page. Extent, 6000 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Correct.

Áhnikaprakás'a. The proper daily duties of Bráhmaṇs from sunrise to the time of retiring for rest at night. By Mitra Mis'ra, son of Paras'uráma Mis'ra, and grandson of Haṅsa Paṇḍita. This is a part of the well known Smṛiti compilation called *Viramitrodaya*, which was compiled under the auspices of Vira Siñha a king of Kás'í, who belonged to the Bundelá clan. He was the son of Madhukara Sháh and grandson of Pratáparudra. The part of the work which treats of inheritance is a leading authority on the subject in the North Western provinces.

Beginning. सिन्दूरारुणगण्डमण्डलगलद्दानाम्भसां धारया
सिञ्चन् पद्मसक्तभक्तजनताविघ्नौघधूलीरिव ।
धम्मिल्लालिमिवालिवृन्दमनिशं मूर्द्ध्ना दधानं हर-
प्रेयांसं गिरिजाङ्गजं गजमुखं वन्देऽरविन्देक्षणम् ॥ १ ॥ इत्यादि ।

End. प्रत्याशं परिवर्द्धितेऽर्थिजनता देन्याम्बुवारापहे
श्रीमद्वीरमृगेन्द्रदानजलधिर्यद्वक्त्रचन्द्रोदये ।
राज्ञादेशितमित्रमिश्रविदुषस्तस्योक्तिभिर्निर्मिते
ग्रन्थेऽस्मिन् परमाह्निकोक्तिभणितः पूर्त्तिं प्रकाशोऽगमत् ॥

Colophon. इति श्रीमत्कलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजप्रतापरुद्रतनूजश्रीमन्महाराजमधुकरमाहसूनुश्रीमहाराजाधिराजचतुरुदधिबलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीवीरमिंहदेवोत्थितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनुसकलविद्यापारावारीणजगद्वाग्द्विरमहागजपारीन्द्रविद्वज्जनजीवातुश्रीमन्मित्रमिश्रकृते श्रीवीरमित्रोदयाभिधनिबन्धे आह्निकप्रकाशः पूर्त्तिमगात् ।

विषयः । ग्रन्थकारवंशकथनं । ब्रह्ममुहूर्त्तादिकृत्यं । स्वधर्मचिन्तनादि । गोत्रोच्चियादिमाङ्गल्यदर्शनं । विष्णूत्थानविधिः । मृत्तिकादिशौचक्रिया । आचमनद्विराचमनादिकथनं । दन्तधावनस्य स्नानस्य च विधिः । एतद्दहःप्रथमभागीयकृत्यं । ततो विद्याभ्यासस्याङ्गो द्वितीयभागे कर्त्तव्यतोक्तिः । ततोऽभागे अर्थोपार्जनार्थमुपसर्पणं । चतुर्थभागे कात्यायनगोभिलादिमतानुयायिपृथक्पृथक्स्नानविधेः कथनं ।

स्नाननिमित्तकथनं । तिलकविधिः । सन्ध्यातदुपासनतद्देशनिरूपणादि । मार्जनप्राणायामाघमर्षणप्रकारकथनं । नृसिंहपुराणोक्तसन्ध्याकल्पकथनं । शौनकोक्तसन्ध्यावन्दनविधिः । जपविधिः । कातीयबह्वृचादित्रह्मयज्ञस्वरूपस्वशाखोक्तवेदमन्त्रपाठविधिः । कातीयादिप्रयोगानुसारितर्पणविधिः । तर्पणान्तरकृत्यकथनञ्च । पञ्चमभागे सोम-वनस्पत्यग्नीषोमेन्द्राग्नियावापृथिवीधन्वन्तरीन्द्रविश्वेदेवोद्देश्येन प्रस्तुतान्नस्याग्नौ होमात्मकस्य आश्वलायनादिशाखीयवैश्वदेवकर्मणः कथनं । नित्यश्राद्धातिथ्यभोजनविधिः । भोज्याभोज्यान्नादिनिर्णयः । अभक्ष्यमांसकथनं । पशुहिंसाविधिः । अभक्ष्यपशुकथनं, अपेयमद्यकथनं, पुराणश्रवणादिभोजनोत्तरकर्त्तव्यकर्मकथनं, सायंसन्ध्याशयनविधिकथनञ्च ।

No. 825. आधानविधिप्रयोगः ।

Substance, country paper, 10 × 4 inches. Folia, 53. Lines 7—8 on a page. Extent, 1000 slokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Ádhánabidhi-prayoga. Directions for collecting and preserving the sacred household fire, or the rite of Agnyádhána, according to the rules of Ápastamba. By Tryambaka Bhaṭṭa, son of Krishṇa Bhaṭṭa. The work was composed at Benares.

Beginning. यदीक्षणादिदं विश्वं भवत्यूर्ध्वात्यपैति च ।
तमक्षयमहं वन्दे वन्दे दाक्षायणीधवं ॥ १ ॥
यत्कृपालेशतोऽपि स्यान्मूको वाचस्पतिः स्वयं
तं गुरुं नौमि सर्वज्ञमाडवाशुक्लदीक्षितं ॥ २
नत्वा गणेशं प्रत्यूहमोहध्वान्तदिवाकरम् ।
समस्तवेदतत्त्वज्ञमापस्तम्बं महामुनिम् ॥ ३ ॥
मोल्हाख्यवंशास्तवारिधीन्दुश्रीकृष्णभट्टप्रवरात्मजोऽहं ।
सूत्रार्थवित् त्र्यम्बकभट्टनामा तन्वेऽमुमाधानविधिप्रयोगम् ॥ ४ ॥
अनेकग्रन्थसम्पाद्भोरुभिः सूरिभिस्त्वयम् ।
निर्मत्सरैर्दयोन्निद्रैराद्रीयेतेष्टमेव मे ॥ ५ ॥

End. अथारणीलक्षणं । चतुरङ्गुलोच्छ्रायः । विस्तारः षडङ्गुलः । अरत्निमात्रं दैर्घ्यं । इत्येके शाखिनः । चतुरङ्गुलोच्छ्रायः । उभयोररणोरेकवृक्षादाहरणं । अन्यतराणि वृक्षान्तरादाहरणेनाग्न्युत्पत्तिः । इत्याधानं समाप्तं ।

इति श्रीमाञ्जोपनाम्नः कृष्णभट्टस्य सूनुना त्र्यम्बकेन काश्यां कृतः प्रयोगः समाप्तः । (इतः परं सार्द्धपत्रद्वयात्मकः पाठोऽस्ति) । तदारम्भवाक्यं यथा, गङ्गाभट्टकृताधानपद्धतौ सर्वाधानसाधकं—इत्यादि । (परिसमाप्तिर्न दृश्यते)

विषयः । अग्न्याधानेऽधिकारी । अग्न्याधानकालः । आधानकर्त्तुरनाहिताग्नितापप्रयुक्तदोषपरिहाराय देहशुद्ध्यर्थञ्च प्रायश्चित्तकथनं । भस्ममृत्तिकापञ्चगव्यादिस्नानमन्त्राः । तर्पणधेनुदानादिकथनं । प्रायश्चित्ताङ्गीभूतकुष्माण्डहोमः । गार्हपत्याग्निस्थाननिर्माणविधिः । प्रकृताग्न्याधानप्रयोगकथनं । अन्वारम्भणीयेष्टिः । पृथिवीयुरुद्रदृहस्यत्यादिचतुर्हौत्रहोमः । वपनप्रकारः । सम्भारसङ्ग्रहादिकथनं । (अत्राधानस्य कर्त्तव्यताकर्त्तव्यतादिविचारः ।)

No. 826. गूढार्थादर्शः ।

Substance, country paper, $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 55. Lines 15—16 on a page. Extent, 2500 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Goverment of India. Appearance. New. Prose and verse. Correct.

Gúḍhárthádars'a. A commentary on the Jñánárṇava Tantra. By Kás'ínátha alias Sivánandanátha, son of Jayaráma Bhaṭṭa.

Beginning. अनन्ताख्यं गुरुं नौमि कवित्वप्रतिभाकरम् ।
शास्त्रवल्लीजलधरं स्फुरत्कीर्त्तिकरं परं ॥ १ ॥
नमामि कामेश्वरपादपङ्कजं करोमि कामेश्वरपूजनं सदा ।
वदामि कामेश्वरनाम निर्मलं स्मरामि कामेश्वरतत्त्वमव्ययं ॥
या विद्येत्यभिधीयते श्रुतिपथे शक्तिः सदाद्या परा
सर्वज्ञा भवबन्धभित्तिनिपुणा सर्वाशये संस्थिता ।
दुर्ज्ञेया सुदुरात्मभिश्च मुनिभिर्ध्यानास्पदं प्रापिता
प्रत्यक्षा भवतीह सा भगवती बुद्धिप्रदा मेऽस्तु वै ॥
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सरूपाय दक्षिणामूर्त्तये नमः ॥
वाराणसीमहं वन्दे सच्चिदानन्दरूपिणीं ।
मातृरूपेण सततं सहसारेऽखिलेष्टदां ॥
ज्ञानार्णवे महातन्त्रे गुरूणामुपदेशतः ।
गूढार्थादर्शटीकेयं काशीनाथेन तन्यते ॥

End. राजराजेश्वरो गङ्गा माधवो मणिकर्णिका ।
अन्नपूर्णा च विश्वेशो ददतां मेनिशं शिवं ॥
श्रीमत्त्रिपुरसुन्दर्य्याः प्रीत्यर्थं लिखिता मया ।
प्रभवाब्दे लिपेः शुक्लपञ्चम्यां ललिताप्तये ॥
श्रीशिवानन्दनाथेन काशीनाथाख्यशर्मणा ।
कृता टीका गुरुप्रीत्यै भवन्तु सदुपासकाः ॥

Colophon. इति श्रीमच्छ्रुतिस्मृतिमतप्रमाणपारावारीणसर्वतन्त्रदक्षिणारतन्त्रधुरीणभडोपाख्यजयरामभट्टात्मजवाराणसीगर्भसम्भवकाशीनाथाख्यशिवानन्दनाथविरचितायां ज्ञानार्णवटीकायां त्रयोविंशतिः पटलः समाप्तः ।

विषयः । १ पटले, हे ईश किं त्वया जप्यते इत्यादि पार्वतीवाक्यस्य महादेवकर्तृकमुत्तरदानं । २, त्रिपुरामन्त्रोपासनाप्रकारादिकथनं । ३, अन्तर्यागप्रकारकथनं । ४, मन्त्रपूजाप्रकारः । ५, बलिदानप्रकारः । ६, ७, पञ्चसिंहासनस्थितत्रिपुराया विवरणं । ८, त्रिपुरभैरवीबीजादिकथनं । ९, महाविद्याया बीजादिकथनं । १०, त्रिपुरात्रिविधभेदतन्मन्त्रादिकथनं, श्रीविद्याया दशभेदकथनादि च । १६, चतुर्विधषोडशीकथनं । १२, आसनशुद्ध्यर्घस्थापनं, देवताभेदेन मन्त्रन्यासादिप्रकारभेदश्च । १३, नित्यपूजाप्रकारः, गुरुपूजनप्रकारः, कामेश्वर्य्यादिपूजनादि च । १४, श्रीचक्रपूजावशीकरणादिकथनं । १५, स्वर्णपुष्पकृतपूजाफलकथनादि । १६, देवतासाधनप्रकारविशेषकथनं । १७, जप-होम-नानाविधकुण्डनिर्माणादीनां विधिः । १८, होमानन्तरं कर्त्तव्यकुमारीपूजनोक्तिः । १९, २०, दूतीपूजनविधिः । २१, मन्त्रदीक्षाविधिः । २२, सुवर्णरौप्यताम्रस्रुवादिनिर्मितपवित्रपूजनविधिः । २३, दमनाख्यलतापूजनप्रकारादि ।

No. 827. होत्रप्रयोगवृत्तिः, वा आश्वलायनसूत्रप्रयोगवृत्तिः ।

Substance, country paper, $9\frac{3}{4} \times 4$ inches. Folia, 198. Lines 10 on a page. Extent, 3800 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Hotraprayoga-vṛitti. Directions for performing the rites mentioned in the Kalpa Sútra of *As'valáyana* according to the commentary of Deva Svámí. By Tálavrintanivás'í. The MS. is incomplete, and extends only to *Paundarík'aík'ádas'a* rite.

Beginning. समस्तप्राणिजातस्य हृत्पद्मनिलये स्थितः ।
वेदार्थविदुषा ज्ञेयं यज्ञात्मानं नमाम्यहम् ॥
आश्वलायनसूत्रस्य देवस्वाम्यादिव्याख्यानानुसारेण प्रयोगवृत्तिः क्रियते ।

End. (यतः खण्डितं तच्छेषः) । आ नो मित्रा वरुणेति स्रोत्रियानुरूपौ, ऋजुनीति न इत्यारम्भणीया । मित्रं वयमित्यादि विश्वजिच्छस्त्रशेषः । ब्राह्मणाच्छंसिनः । सुरूपकल्पमूत ———

विषयः । दर्शपूर्णमासप्रयोगः । अग्निहोत्रहोमः । आहिताग्नेः प्रवासकालीनाग्न्युपस्थानम् । पिण्डपितृयज्ञः । अन्वारम्भणीयेष्टिः । पुनराधेयेष्टिप्रयोगादि । आग्रयणेष्ट्यादि । पुत्रादिकाम्येष्ट्यादि । चातुर्मास्येष्टिप्रयोगः । पशुबन्धप्रयोगः । एकादशिनां पशुगणानां देवतानां क्रमः । तत्तद्गदेवतादिसौत्रामणीकर्म । हविर्यज्ञप्रायश्चित्तोक्तिः । सोमप्रयोगः । यज्ञशेषकृत्यं । अत्यग्निष्टोमप्रयोगः । षोडशिकर्म । विहृतषोडशी । वाजपेयप्रयोगः । अतिरात्रप्रयोगः । अग्नेयीमस्य स्तुतिः । शस्त्रस्य प्रतिगरः । अतिरात्रपर्यायः । पौण्डरीकस्यैकादशप्रयोगः । (खण्डितत्वादितः परविषयो न प्राप्तः) ।

No. 828. पुरुषोत्तममाहात्म्यं ।

Substance, country paper, 10 × 4¼ inches. Folia, 59. Lines 8 on a page. Extent, 1100 s'lokas. Character, Nágara. Date, Sm. 1889. Place of deposit, Calcutta, Asiatic Society. Appearance, fresh. Verse. Generally correct.

Purushottama-máhátmya. Description of the sacred places in Purusottama or Puri. It professes to be a part of the *Khetrakáṇḍa* of the *Vishṇu rahasya* section of a work named *Mahápurushavidyá*, probably a Tantra. Though its subject is the same as that of the well known *Purushottama Máhátmya* of the Skanda Puráṇa, the treatment thereof is entirely different. The MS. is incomplete, and comprises only nine chapters as follows: I. Incarnations of Vishṇu. II. Origin of Nílá-chala, and the reasons why Vishṇu assumed the form of a wooden divinity. III—IV. Creation of the different regions of the universe and the guardians of Puri, (different forms of Mahádeva). V. The temples of Jagannátha, VI. The shape of Jagannátha. VII. Vyása's visit to Purí and praise of the locality. VIII. Merit of visiting Jagannátha at Puri. IX. The mantra of Jagannátha and the merit of tasting food offered to him.

Beginning. वन्देऽहं परमात्मानं नीलाचलपतिं प्रभुं ।
संसाराम्भोधिमग्नानामुद्धारणपरायणम् ॥
श्रीशौनक उवाच । सूत सूत महाभाग वेदतत्त्वार्थकोविद ।
व्यासशिष्य महाबुद्धे यत्पृच्छामि तदुच्यतां ॥
कस्माज्जातमिदं विश्वं कस्मिंश्च लयमेष्यति ।
कुत्र तिष्ठति कः कर्त्ता विश्वस्यास्य वदस्व मां ॥
संसाराम्भोधिमग्नानां कोऽर्त्ता स्मृतिमात्रतः ।
ब्रह्मादीनां परेशानां कः प्रभुस्तं वदस्व माम् ॥
सूत उवाच । आदिमध्यान्तरहितः सच्चिदानन्दरूपवान् ।
सर्ववेदान्तसारार्थो हरिरित्यभिधीयते ॥

End. सूत उवाच । इत्युक्त्वा भगवांस्तस्मै स्वप्रसादं सुदुर्लभं ।
ददौ विनयनम्राय कृपया परया मुने ॥
लब्ध्वा प्रसादं स मुनिर्जीवन्मुक्तो बभूव ह ।
उवास सुचिरं कालं गायंस्तस्य यशोऽमलं ॥
एवं सर्वं मयाख्यातं तुभ्यं शुश्रूषवे मुदा ।
मयापि नारदादेव विशालायां श्रुतं मुने ॥

Colophon. इति श्रीमहापुरुषविद्यायां विष्णुरहस्ये क्षेत्रकाण्डे श्रीपुरुषोत्तममाहात्म्ये प्रसाद-वैभवं नाम नवमोऽध्यायः ।

विषयः । १ अध्याये, रामकृष्णाद्यवतारकथनं । २, नीलाचलोत्पत्तिर्विष्णोर्दारुमयविग्रह-धारणप्रयोजनकथनं स्वरूपव्याख्यानञ्च । ३, ४, श्रीजगन्नाथाज्ञप्तमायास्रष्ट-ब्रह्माण्डभूलोकादिवर्णनम्, पुरुषोत्तमक्षेत्रस्य तत्तत्स्थाने क्षेत्रपालकमहादेव-देव्यास्थितिवर्णनादि च । ५, जगन्नाथस्य प्रासादस्थितिस्थलस्य तत्पार्षदादीनां च वर्णनं । ६, जगन्नाथमूर्त्तिवर्णनादि । ७, व्यासस्य श्रीक्षेत्रस्थदेवतादर्शनार्थं गमनं । व्यासकृतजगन्नाथस्तुतिवर्णनादि । ८, जगन्नाथदर्शनाराधनमाहात्म्य-कथनादि । ९, जगन्नाथमन्त्रजपफलं प्रसादमाहात्म्यवर्णनादि च ।

No. 829. साङ्गृहण्येष्टिः ।

Substance, country paper, $8\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 23. Lines 9 on a page. Extent, 400 s/lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Sáṅgrahaṇyeshṭi. A collection of the mantras required in the performance of the rite of that name. Anonymous.

Beginning. साङ्ग्रहणेष्ट्या यजते । इमा जनताᳬ मङ्गलानीति । द्वादशरात्रिरशना भवति । द्वादश मासाः संवत्सरः । संवत्सरमेवावरुन्धे ।

End. साङ्ग्रहणा, तस्माद्अश्वमेधयाजो यत्परिमिता यज्ञमुखे यज्ञं मुखे या दीक्षां देवानेव तैस्त्रय इमे लोकाः । शितायै प्राणापानावेवास्मिन्तस्माद्राजन्य एकनवतिः ॥ ९१ ॥

विषयः । अश्वमेधयागविधिः ।

No. 830. अन्त्येष्टिपद्धतिः ।

Substance, country paper, 10 × 3¾ inches. Folia, 21. Lines 8 on a page. Extent, 400 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, soiled, but not old. Prose. Generally correct.

यावत् सहतारनं आवर्त्तकं मल्लाभल्लावन्मासान् (?) सुभिक्षकृत् ।
सन्ध्याकाले पश्चिमायां शूलाकारो+सप्रभः ॥ ४२ ॥

End. (खण्डितत्वात् समाप्तिवाक्यादिकं नास्ति ।)

विषयः । उदितधूमकेतोः स्वरूपलक्षणाद्यनुसारेण शुभाशुभफलकथन ।

No. 859. सारसङ्ग्रहः ।

Substance, country paper, $10\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 96. Lines, 7 on a page. Extent, 1200 s'lokas. Character, Nágara. Date, Sm. 1865. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Sárasaṅgraha. A manual for Vaishṇavas, comprising quotations from various Puráṇas, Smritis, &c., on the importance of putting on sectarial marks, of worshipping Vishṇu, of tasting water with which the feet of Vishṇu's image have been washed, or of food offered to him, of putting on beads made of tulasí wood, &c. About the end of the work there is a short note on the life of Rámá-nuja, according to which he was the son of Kes'ava Tripáṭhí and born after a Yajña performed by his father in which a child was prayed. He is said to have had in him a portion of the essence of Vishṇu, which became incarnate for the salvation of man in this sinful iron age.

Beginning. शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परं शतं ।

विघ्नं निघ्नन्ति सततं विश्वक्सेनं तमाश्रये ॥ २ ॥
वकुलाभरणं वन्दे जगदाभरणं मुनिं ।
यः श्रुतेरुत्तरं भागं चक्रे द्राविडभाषया ॥ ३ ॥
श्रीरङ्गमङ्गलमहोत्सववर्द्धनाय वेदान्तपाथपरमार्थसमर्थनाय ।
कैङ्कर्यलक्षणविलक्षणमोक्षभाजो रामानुजो विजयते यतिराजराजः ॥ ४ ॥
वेदे रामायणे चव भारते भरतर्षभ ।
आदौ मध्ये तथा चान्ते हरिः सर्वत्र गीयते ॥ ५ ॥
श्रुतिस्मृतीतिहासाश्च पुराणं धर्मसंहिता ।
सर्वतः सारमादाय षट्पदः कुसुमाद् यथा ॥ ६ ॥
वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शनम् ॥ ७ ॥
ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्म्यं राजसानि निबोध मे ॥ ८ ॥
मात्स्यं कौर्म्यन्तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयञ्च षडेतानि तामसानि निबोध मे ॥ ९ ॥
तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः ।
सात्त्विका राजसा चैव तामसाः शुभदर्शने ॥ १० ॥
वाशिष्ठञ्चैव हारीतं व्यासं पाराशरं तथा ।
भारद्वाजं काश्यपञ्च सात्त्विका मोक्षदाः शुभाः ॥ ११ ॥
वामनं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदाः शुभाः ॥ १२ ॥
गौतमं वार्हस्पत्यञ्च सांवर्तञ्च यमस्मृतं ।
शाङ्खं चौशनसं देवि तामसा निरयप्रदाः ॥ १३ ॥
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः ।
तथैव तामसा देवि निरयप्राप्तिहेतवः ॥ १४ ॥
सात्त्विकानि पुराणानि तथैव स्मृतिरेव च ।
वैष्णवानां मुदे शाय क्रियते सारसङ्ग्रहः ॥ १५ ॥
वैष्णवो नाम, तदुक्तं पाद्मे ।
ये कण्ठलग्नतुलसीनलिनाक्षमाला ये बाहुमूलपरिचिह्नितशङ्खचक्राः ।
ये वा ललाटपटले लसदूर्द्ध्वपुण्ड्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥ १६ ॥
End. ये जनास्तान् प्रियान् विष्णोः पूजयन्ति स्मरन्त्यपि ।

तत्प्रसादादघं तेषां सर्वं नष्टमभूद्भटाः ॥ ३१ ॥
यः पठेच्छृणयाद्भक्त्या सन्दर्भमिदमुत्तमम् ।
सर्वार्थसिद्धिं सम्प्राप्य लभेदन्ते हरेः पदं ॥ ३२ ॥

Colophon. इति श्रीसारसङ्ग्रहः समाप्तः ॥

विषय । १ संस्कारे, वैष्णवलक्षणकथनप्रसङ्गेन शङ्खचक्रादिधारणपरश्रुतिस्मृतिपुराणादिवचनप्रमाणकथनं, शङ्खचक्राद्यनङ्कितस्य निन्दाकथनं । २, ऊर्द्ध्वपुण्ड्रधारणे श्रुतिस्मृत्यादिवचनप्रमाणतल्लक्षणतद्द्रव्यादिकथनं । ३, वैष्णवानां नामधेयस्थापनप्रकारः । ४, वैष्णवमन्त्रोपदेशप्रकारः । ५, वैष्णवाचरणशिक्षादिकथनं । ६, भगवदाराधनप्रकारतद्द्रव्यादिकथनं । भगवत्पादोदकमाहात्म्य । भगवत्प्रसादमाहात्म्यादिकथनं । पूजाकाले तुलसीमालाधारणावश्यकतादिकथनं । आचमनविधिः । आश्रमधर्मादिकथनं । रामानुजोत्पत्तिकथनादि । प्रपन्नभक्तलक्षणं । भगवदाराधनमाहात्म्यकथनादि च ।

No. 860. मदनविनोदनिघण्टुः ।

Substance, country paper, 10 × 5¼ inches. Folia, 54. Lines, 13 on a page. Extent, 1620 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old, and smudgy. Verses Generally incorrect.

Madanavinoda-nighanṭu. Indian materia medica, comprising descriptions of various articles of food, drink, and medicines, and their effect on the human system. The work is of considerable repute, and includes the names of almost all medicinal substances, vegetable, animal, and mineral, that are in common use. Among articles of diet, the flesh of horses, elephants, donkeys, sparrows, parrots, &c. are mentioned, and their qualities described. The effect of air on health is also noticed at some length. By Madana Pála, a King of Kanouj.

Beginning. बीजं श्रुतीनां सुखदं मुनीनां जीवं जडानां महदादिकानां ।
आग्नेयमस्त्रं भयपातकानां किञ्चिन्महः श्यामलमाश्रयामि ॥ १ ॥
लब्ध्वा कपोलमधुवारि मधुव्रतालिः कुम्भस्थलीमधुविभूषणलोहिताङ्गी ।
माणिक्यमौलिरिव राजति यस्य मौलौ विघ्नं स धूनयतु विघ्नपतिः सदा नः ॥ २ ॥

योध्वान्तत+ + + विशालपयोधिमध्यान्निःकासयत्यशरणं भुवनं निमज्जत् ।
दत्त्वा जगत्त्रयहितः स्वकरावलम्बं वाञ्छां स नो दिनकरः सफलीकरोतु ॥ २ ॥
मिथ्याशनादिकृतदोषत्रयप्रकोपनयम्बुवर्द्धित उपद्रवनक्रमीने ॥
रोगाम्बुधौ भवजनस्य निमज्जतो यः पीतः प्रयच्छतु शुभानि च काशिराजः ॥४॥
केचित् सन्ति निघण्टवोऽतिलघवः केचिन्महान्तः परे
केचिद् दुर्गमनामकाः कतिपये भावस्वभावाहिताः ।
तस्मान्नातिलघुर्न चातिविपुलः ख्यातादिनामा सतां
प्रीत्यै द्रव्यगुणान्वितोऽयमधुना ग्रन्थो मया लिख्यते ॥ ५ ॥
सर्वकायन (?) संसाध्यं तस्यायुःस्थितिकारणं ।
आयुर्वेदोपदेशेन कस्य न स्यात्सुखावहः ॥ ६ ॥
तत्रापि पूर्वं ज्ञातव्या द्रव्यनामगुणागुणाः ।
अतस्त एव वक्ष्यन्ते योग्यैर्न हि क्रियाक्रमाः ॥ ७ ॥
शिवा हरीतकी पथ्या चेतकी विजया जया ।
प्रमथ्या प्रमथामोघा कायस्था प्राणदान्हता ॥ ८ ॥ (इत्यादि)

End. जयति मदनपालः सर्वविद्याविशालः कृतसरसिजमित्रः कर्मधर्मैः पवित्रः ।
सुजनपिकरसालस्तुष्टगोपालबालो रुचिरतरचरित्रश्चारुचातुर्यचित्रः ॥
तेन श्रीमदनेन्द्रेण निघण्टुरयमद्भुतः ।
कृतः सुकृतिना लोकहिताय महितात्मना ॥
अनवद्यानि पद्यानि दश द्वादश वा मया ।
परेषामपि केषाञ्चिल्लिखितानीह कौतुकात् ॥

Colophon. इति श्रीमदनपालविरचिते मदनविनोदनिघण्टौ प्रशस्तिवर्गश्चतुर्दशः ॥

विषयः। १ वर्गे, हरीतक्यादिनामानि तद्गुणाश्च । २, शुण्ठ्यादिनामानि तद्गुणाश्च । ३, कर्पूरादिनामानि तद्गुणाश्च । ४, हेमादिधातूनां नामानि गुणाश्च । ५, वटवृक्षादिनामानि तद्गुणाश्च । ६, द्राक्षादिनामानि तद्गुणाश्च । ७, शाकनामानि तद्गुणाश्च । ८, पानीयनामानि तद्गुणाश्च । ९, दुग्धनामानि तद्गुणाश्च । १०, दधिनामानि तद्गुणाश्च । ११, घृतनामानि तद्गुणाश्च । विविधतैलगुणाः । नानाप्रकारमद्यगुणाः । गोमहिषमनुष्यादिमूत्रगुणाः । इक्षुगुणाः । शर्कराषण्डकादिनामानि तद्गुणाश्च । शालिनामानि तद्गुणाश्च । गोधूमयवचणकमाषमसूरतिलसर्षपादिनामानि तद्गुणाश्च । पायसशिखरिण्यादिनामानि तद्गुणाश्च । मण्डकौदनादिनामानि तद्गुणाश्च । घृतपक्वविविधभक्ष्यनामानि तद्गुणाश्च । अष्टद्रव्यगुणाः । १२, हस्तिघोटकादिपशूनां चटककपोतादिपक्षिणाश्च नामानि

तन्मांसगुणाश्च । मत्स्यसर्पादिनामानि तन्मांसगुणाश्च । १२, पथ्यापथ्यविचारः । १४, वायुगुणादिकथनञ्च ।

No. 861. अमरकोषटीका, प्रथमकाण्डीया, द्वितीयकाण्डीया खण्डिता ।

Substance, country paper, 10 × 4 inches. Folia, 131. Lines, 9—11 on a page. Extent, 3300 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old, decayed, and in some places obliterated. Prose. Incorrect.

Amarakosha Ṭíká. A commentary on the Amarakosha, by Ráyamukuṭa. The MS. is incomplete, and breaks off at the middle of the second book. The following is Professor Wilson's opinion of this work. "The next in the order of antiquity is the work of *Mukuṭa* or *Ráya Mukuṭa Maṇi*, compiled, according to the author's own account, from sixteen older commentaries to which he frequently refers : they seem, however, to be in many cases original compositions, and not merely glosses on the text of Amara. The list includes the work of *Kshíra Svámí*, *Subhúti*, *Haḍḍa Chandra*, *Kaliñga*, *Konkaṭa*, *Sarvadhara*, *Rájadeva*, *Govardhana*, *Drávida* and *Bhoja Rája*, and the *Vyákhyámṛita*, *Ṭíkásarvasva*, *Mádhaví*, *Madhu Mádhaví*, *Sarvánanda*, and *Abhinanda*. Mukuṭa also cites the names of the principal grammatical writers, and quotes many Koshas of which the titles are of frequent and familiar occurrence, amongst which some, as the Vis'va and Mediní, are still in existence. The commentary of Ráya Mukuṭa is full and satisfactory—it is erroneous sometimes in the etymological analysis of grammatical derivatives, but it is in general accurate, and in most of the schools is of high authority. The date of the composition is inferred from dates mentioned by the author, 1352 S'áka or A. D. 1430." Essays II, 203.

Beginning. दिश्याच्छिवं हि शिवयोस्सिलकायमानं गोरोचनारुचिललाटविलोचनं नः ।
अन्योन्यगाढपरिरम्भनिपीडनेन पिण्डीभवद्दहिरिव स्फुरितोऽनुरागः ॥ १ ॥
अद्याप्यपीतमुद्रो योर्थार्थिभिरमरकोष एष बुधाः ।
उद्घाट्यते यथेच्छं गृह्णीध्वं नामरत्नानि ॥ २ ॥
प्रकृतिप्रत्ययवाक्यैर्व्यस्तसमस्तैर्निरुक्तनिगदाभ्यां ।
इति सप्ताष्टपथिभिर्नाम्नां पारायणं कुर्मः ॥ ३ ॥

(द्वितीका॰प्रा॰) अथ द्वितीयकाण्डे वर्गान् सङ्गृह्णीते। महान्तः, अङ्गैर्महगादिभिः, उपाङ्गैरखिलादिभिः, सह वर्त्तमानैः पृथिव्यादिभिः, सम्यादितवर्गा इह वक्ष्यमाणाः काण्डे वदितुमारब्धा उदिताः।

End. अत्रानुक्तमपि प्रसक्तानुप्रसक्ततया स्व++++रिति आदिशब्देन पातालस्य ग्रहणं। पातालं स्यात् स्वर्गे तु स्वर्गतुल्यत्वात्। अत एव++रकथनं।

Clophon. इति काण्डप्रस्तावः। इति महन्तापीयकविचक्रवर्त्तिराजपण्डितश्रीरायमुकुटकृतायां टीकायां प्रथमकाण्डविवरणं समाप्तम्।

(द्वितीयकाण्डटीकायाः खण्डितत्वाच्छेषवाक्यादिकं नास्ति।)

विषयः। अमरसिंहकृतामरकोषप्रथमकाण्डव्याख्यानं। द्वितीयकाण्डव्याख्या त्वसम्पूर्णा।

No. 862. दत्तगीता।

Substance, country paper, $9\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia, 27. Lines, 89 on a page. Extent, 350 s'lokas. Character, Nágara. Date, Sm. 1857. Place of deposit, Calcutta, Government of India. Appearance, old, some leaves are destroyed by worms. Verse and Prose. Incorrect.

Datta-gitá. An imitation of the Bhagavadgítá, treating of the Vedánta doctrine. By Dattátreya. The work is similar in character to the Avadhúta-gítá noticed under No. 669.

Beginning. ॐ अस्य श्रीअवधूतगीतामालामन्त्रस्य योगीश्वरो ऋषिः श्रीदत्तात्रेयपरमपुरुषो देवता येनेदं पूरितं सर्वमात्मनैवात्मनोति बीजं ज्ञानामृतं समरसं गगनोपमोहमिति शक्तिर्गायत्र्यादीनि छन्दांसि किमरोदसि (?) मानसमर्वसममिति कीलकं स्वरूपनिर्वाणमनामयोऽहं विधकं (?) योगमोक्षयोः स्वनिष्ठायाः परिपाकमित्यर्थं जपे विनियोगः।

End. विन्दति विन्दति नहि नहि मन्त्रो नहि नहि तन्त्रं लक्षणच्छन्दः।
समरसमग्नो भावितपूतः प्रलपति चैतत्परमवधूतः॥ ३०॥

Colophon. इति श्रीदत्तात्रेयविरचिता दत्तगीता समाप्ता। प्रकरणमष्टमम्।

विषयः। १, २ प्रकरणे, आत्मज्ञानोपदेशः। ३, एतत्प्रकरणोक्तपद्यैर्ज्ञानस्यामृतत्वप्रतिपादनं। ४, ५, आत्मनो निर्वाणवत्वादिभावप्रतिपादनं। ६, सङ्क्षेपेण वैदान्तिकसारवाक्यकथनं। ७, नित्यानित्यकतिपयपदार्थालोचकवाक्यविन्दूपदेशः। ८, देहादिमायिकपदार्थेषु हेयत्वासारत्वज्ञानकथनादि।

No. 863. शाकलसंहिता, प्रत्यध्यायानुक्रमणिकासहिता ।

Substance, country paper, $8\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia, 54. Lines, 7 on a page. Extent, 800 s'lokas. Character, Nágara. Date, Sm. 1856. Place of deposit, Calcutta, Government of India. Appearance, modern. Prose. Generally correct.

S'ákala Sañhitá. The hymns of the Rig Veda according to the S'ákala school. The MS. is imperfect and contains only the last five chapters of the seventh book of the work. Every chapter has its Anukramaṇi attached to it.

Beginning. अमर्जि कश्यपः परिस्रुवानः साकमुक्षः पञ्च नोधा अधि यत् कण्वः कनिक्रन्ति प्रस्कण्वः प्रमेनानीश्चतुर्विंशतिर्द्वैवादासिः प्रतर्द्दनोखप्रेषाष्टा पञ्चाशदाद्यं ऋचं वशिष्ठोऽपश्यदुत्तरान्ततव शृण्वशिष्ठा इन्द्रप्रमतिर्ऋषगणो मन्युरुपमन्युर्व्याघ्रच्छक्तिः कर्णश्रुन्मृडीको वसुक्र इति चतुर्द्दशपराशरोऽन्त्याः कुत्सोभिनो द्वादशांवरीषऋचा चानुष्टुभं ऋहत्युपान्त्या हर्यतायाष्टौ रेभसूनुकाश्यपौ ऋहत्याभोनवं ते नव ॥ ५१ ॥ हरिः ओम् ॥

End. अमर्जि वक्वा रथ्ये यथा जोधिया मनोता प्रथमो मनीषी । अद्वेषे द्यावापृथिवी ऊवेम देवा धत्त रयिमस्मेसु वीरं ॥ २९ ॥

Colophon. इति शाकलसंहितायां सप्तमाष्टके अष्टमोऽध्यायः ॥ इति सप्तमाष्टकः समाप्तः ।

विषयः । शाकलसंहितायाः सप्तमाष्टके अष्टावध्यायाः सन्ति, तत्रात्र पुस्तके (प्रथमतोऽध्यायत्रयं नास्ति । चतुर्थाध्यायावधिकोऽष्टमाध्यायसमाप्तिपर्यन्तः पाठोऽस्ति । तत्र) ४ अध्याये २८ दशतयः । ५ ।—२३ दशतयः । ६ ।—२८ दशतयः । ७ ।—३० दशतयः । ८ ।—२९ दशतयः सन्ति ।

No. 864. सारसमुच्चयः ।

Substance, country paper, $9\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 67. Lines, 8—9 on a page. Extent, 1000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Sára-samuchchaya alias *Yogasára Sañgraha.* A compendium of the Yoga system with details for performing various kinds of Yoga meditation. By Harisevaka Mis'ra. The work was compiled under the

patronage of Hridayaráma Deva, in the (Samvat ?) year 1770. This is different from the *Yoga-sára-sañgraha* of Vijñána Bhikshu noticed by Dr. Hall. Contributions, p. 12.

Beginning. सम्यगाराध्यतामीशं पञ्चविंशतिमप्रदम् (?) ।

गुणातीतं विभुं वन्दे चतुर्विंशतितः परम् ॥ १ ॥

श्रीयुक्तभवदेवाख्ये ग्रन्थे यो योगसङ्ग्रहः ।

तस्य सारं समुद्धृत्य कुर्वे सारसमुच्चयं ॥ २ ॥

श्रीसत्र (तत्र) को नाम योगः किं फलं चास्येत्यत आह ।

प्रज्ञासत्यवतीनाम्नि ग्रन्थे या ब्रह्मभावना ।

प्रोक्ता सा योगसाध्येति योगोऽत्र परिकीर्त्यते ॥

प्राधान्येन योगो नामान्तःकरणवृत्तिनिरोध एव । तदुक्तं पातञ्जले योगश्चित्त-वृत्तिनिरोधः । तदा द्रष्टुः स्वरूपेणावस्थानमिति अयं भ वः

End. गगनमुनिचिरायुश्चन्द्रयुक्ते शुभेऽब्दे प्रवरसहसि मासे कृष्णपक्षे चतुर्थ्यां ।

विबुधहृदयरामैर्दीक्षितैर्वीक्ष्य सारं रचितमखिलमेतद्योगशास्त्रे निबन्धम् ॥ १ ॥

निखिलगुणनिधानो ब्रह्मविद्वाग्भिरीड्यो गुरुरखिलबुधानां लोकविख्यातकीर्त्तिः।

सततनिगममर्माचारसंलग्नबुद्धिर्विबुधहृदयरामो देवपूज्योऽथ वा किम् ॥ २ ॥

तस्याज्ञया श्रीहरिसेवकेन मिश्रेण योगस्य समीक्ष्य सारं ।

एकीकृतं तत्प्रविचार्य बुद्ध्या योगोक्तिविज्ञाः प्रतिशोधयन्तु ॥ ३ ॥

Colophon. इति योगसारसङ्ग्रहे समाध्युपदेशो नाम समाप्तः ।

विषयः । नानाप्रमाणद्वारा योगाशब्दार्थप्रतिपादनं । योगिलक्षणतत्प्रसंशादि । ज्ञान-भूमिकासप्तककथनादि । अज्ञानभूमिकासप्तककथनं । चिरञ्जीवित्वसाधकोपा-योक्तिः । योगोपयोगिशरीररचादिकथनं । जरायुशरीरोत्पत्तिक्रमः । शरी-रस्थचक्रकथनं । इडापिङ्गलादिनाडीकथनं । मूर्द्धहृदयादौ अयोध्यामथुरादि-सप्तपुरीणां भावना । नासाग्रे प्रयागस्य, सुषुम्णायां सरस्वत्याः, अन्यनाडीषु नर्मदानदनदीनाञ्च भावना । मनोबुद्धिचित्तादौ चन्द्रचतुर्मुखवासुदेवादिदे-वताविशेषभावनादि । लिङ्गमूलस्थस्वाधिष्ठाननाम्नो नाभिस्थपूरकनाम्नो हृद-यस्थानाहतनाम्नः कण्ठस्थविशुद्धनाम्नो भ्रूमध्यस्थाज्ञानाम्नश्चक्रस्य मूर्द्धस्थसहस्र-दलचक्रस्य च स्वरूपादिवर्णनं । त्रिंशदादिश्वासावृत्तिविशेषक्रमेण आकाशा-दितत्त्वाश्रयपूर्वकजीवभ्रमणोक्तिः । अहोरात्रश्वासमङ्ख्या । षड्भिः श्वासैरेकः पलः षष्ट्यधिकशतत्रयश्वासैरेका घटिका, एवं श्वासावृत्तिविशेषैरहोरात्रादि-मानकथनं । अष्टप्रकारमनोवृत्तिकथनादि । आकाशादितत्त्वाश्रितजीवावस्था-

विशेषकथनं । निर्विकल्पकसमाधिस्वरूपयोगराजाष्टाङ्गकथनं । शौचसन्तोषादियोगिनियमकथनं । स्वस्तिकगोमुखपद्मवीरादिपञ्चदशासनकथनं । प्राणायामप्रकारः । प्राणायामाकृष्टवायुधारणक्रमः । सूर्यभेदनाद्यष्टविधप्राणायामकथनं । योगस्थावस्थाचतुष्टयलक्षणानि । देहशुद्ध्यर्थं धौतीवस्तिप्रभृतिषट्कर्मकथनं । महामुद्रादिदशमुद्राकथनं । इन्द्रियवृत्तिनिरोधरूपप्रत्याहारकथनादि । ध्यानलक्षणादि । पञ्चप्रकारधारणालक्षणादि । समाधिप्रकारादिकथनञ्च ।

No. 865. बौधायनचातुर्मास्यसूत्रं ।

Substance, country paper, $9\frac{3}{4} \times 4$ inches. Folia, 15. Lines, 11—12 on a page. Extent, 375 s'lokas. Character, Nágara, Date, ? Place of deposit, Calcutta, Government of India. Appearance, slightly soiled. Prose. Generally correct.

Baudháyana-Cháturmásya-sútra. A portion of the Kalpa Sútra of Baudháyana, treating of the quadrimensal fast, beginning from the full-moon of Phálguna, or Chaitra. This fast became the *Wasso* of the Buddhists, and was observed during the four months of the rainy season, beginning with the full-moon in Ásháḍha. In modern Hinduism, a similar fast is enjoined which commences on the eleventh of the waxing moon in Ásáḍha, and terminates on the eleventh of the waxing moon in Kártika, the period being sacred to Vishṇu, who is then supposed to be asleep on a fig leaf floating on the great ocean. It is known by the Vedic name of Cháturmásya.

Beginning. वैश्वदेवहविर्भिर्यज्यमाणे भवति फाल्गुन्यां वा चैत्र्यां पौर्णमास्यां नक्षत्रयोग इत्येक आङ्गरदगयने आपूर्यमाणपक्षस्य पुण्याहे प्रयुञ्जीतेति ।

End. तेन शकेयं तेन राध्यामिति पुरस्तादेवाग्नेय्य दक्षिणतोऽस्य पश्चाद्योत्तरतोऽस्योपरिष्टात् सन्तिष्ठते सुनासीरीया हवीꣳष्यनुवत्सरीणाꣳ स्वस्तिमाशास्य इत्याशास्ते ।

Colophon. इति बौधायनचातुर्मास्यसूत्रं ।

विषयः । फाल्गुनस्य चैत्रस्य वा पौर्णमासीमारभ्य चतुर्षु मासेषु कर्त्तव्यकतिपयविधेरनुक्रमेणोल्लेखः ।

No. 866. भावविशोधिनी, कातीयश्रौतसूत्रतृतीयाध्यायस्य कर्कभाष्यटीका ।

Substance, country paper, $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 42. Lines, 10—11 on a page. Extent, 1050 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Prose. Incorrect.

Bháva-vis'odhiní. A gloss on the commentary of Karka Upádhyáya, on the Kalpa Sútra of Kátyáyana. By Átmáráma Bhaṭṭa, son of Jayakṛishṇa Bhaṭṭa. The MS. is incomplete and comprises only the third chapter.

Beginning. होचासंमिश्रं कर्म द्वितीयेऽनुविधायेदानीं तत्संमिश्रमनुविधातुं तृतीयमारभते सूत्रकारः । होः० इ० । ननु होतृपदनशब्दो न गवादिवत् क्वचिद्रूढ इत्यत आह । होतेति ।

End. श्रीमदाचार्यवर्गाणां वरेण्येन विनिर्मितं ।
सूत्रे कर्कण यद्भाष्यमभाणि न्यायसंयुतम् ॥ १ ॥
तत्रात्मारामसङ्कृष्टा टीका भावविशोधिनी ।
तृतीये विदुषा मृष्टा सन्त्यक्ता पक्षपातताम् ॥ २ ॥
पुनर्दूष्यायवा भूष्या यथेच्छं न्यायवर्त्मनि ।
गच्छतो न्यायमार्गेण खलनं नैव दोषदं ॥ ३ ॥
दोष उद्भाव्यतां वाच दोषो मे नास्ति तत्र तु ।
क्व वा नोद्भाव्यते दोषो रागद्वेषविशारदैः ॥ ४ ॥

Colophon. इति श्रीभट्टजयकृष्णात्मजभट्टात्मारामविरचितायां श्रौतकातीयसूत्रकर्कभाष्यटीकायां भावविशोधिन्यां तृतीयोऽध्यायः ।

विषयः । कातीयश्रौतसूत्रतृतीयाध्यायकर्कभाष्यार्थविवरणम् ।

No. 867. द्वैतनिर्णयसिद्धान्तसङ्ग्रहः, विधानमालासहितः ।

Substance, country paper, $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 123. Lines, 8 on a page. Extent, 2000 s'lokas. Character, Nágara. Date, Sm. 1867. Place of deposit, Calcutta, Government of India. Appearance, soiled. Prose and verse. Generally correct.

Dvaitanirṇaya-siddhánta-saṅgraha. An epitome founded on the Dvaitanirṇaya, a treatise on various feasts and fasts, by the author's grand-

father. By Bhánu Bhaṭṭa, son of Nílakaṇṭha Bhaṭṭa. The feasts and fasts noticed are: Navarátra, or nine nights' fast; Chaturthí, fourth of the wane; Panchamí, 5th of the waxing moon; Janmáshṭamí, birthday of Kṛishṇa; Ekádas'í, fast on the eleventh of the moon; S'rávaṇa-s'ukla-chaturdas'í, tying of a thread on the arm on the 14th of the waxing moon in S'rávaṇa; Nrisiṅha-chaturdasí, a fast in honor of the man-lion incarnation; Siva-rátri, fast of S'iva; S'rávaṇa-s'ukla-púrṇimá; Holi; Sávitri-vrata, a fast in celebration of the constancy of a celebrated female; Saṅkránti, or conjunctions of months; duties during eclipses; mourning; impurity to relations caused by birth; S'ráddhas; Sapindikaraṇa; sacred fires at s'ráddhas; duty on the death of both parents on the same day; concremation; Agnyádhána; Nityahoma; adoption; pilgrimage; persons bound to offer the funeral cake; flesh meat for Brahmaṇs; gifts; expiations; various kinds of weights and measures, &c. Annexed to the work is a short abstract entitled Vidhánamálá, &c.

Beginning. लक्ष्मीनारायणं नत्वा सीतया सहितं रघुं ।
गङ्गायुतं नीलकण्ठं गुरोः पादाम्बुजं तथा ॥ १ ॥
पितामहकृतद्वैतनिर्णयार्थस्य सङ्ग्रहः ।
नीलकण्ठात्मजेनेह क्रियते भानुनाधुना ॥ २ ॥
तत्रादौ नवरात्रसिद्धान्तः ।

विधान०प्रा०। अथ द्वादशाब्दानवलोकनविधिर्वक्ष्यते ।
दम्पती पितृपुत्रौ च स्वसारौ भ्रातरौ तथा ।
पितृव्यमातुलादौ च दौहित्रो भागिनेयकः ॥
पुत्रिका पितरौ चैव भगिनी भ्रातरौ तथा ।
द्वादशाब्दे व्यतीते तु दूरदेशं गते यदि ।
एतेषामेकमेकोपि नान्योन्यमवलोकयेत् ॥

End. अपरे तु अग्निस्थापनानन्तरमेवाचार्यकुण्डादन्यकुण्डेषु अग्निप्रणयनं कार्यं ततश्च प्रतिकुण्डं पूर्वोत्तराङ्गाणां भेदेनानुष्ठानमित्याहुः। अत्र मध्यकुण्डात् प्रणयनं कार्यमिति केचित्। अन्ये तु नैर्ऋतकुण्डादित्याहुः।

Colophon. इति श्रीमन्मीमांसकभट्टनीलकण्ठात्मजभट्टभानुकृते द्वैतनिर्णयसिद्धान्तसङ्ग्रहे कोटिलक्षायुतहोमनिर्णयः समाप्तः ।

विधान०स०। पूर्वावलोकितानान्तु विधिरेष उदाहृतः ।
न चैवापूर्वदृष्टानामिति प्राहुर्मनीषिणः ॥
इति विधानमालायां स्वबन्धुजनानां द्वादशान्तरितावलोकनविधिः समाप्तः ।

विषयः। १ प्रकरणे, नवरात्रनिर्णयः। २. नवरात्रपारणाप्रकारः। ३, चतुर्थीपञ्चमीव्रतकथनादि। ४, जन्माष्टमीनिर्णयः। ५, जन्माष्टमीपारणानिर्णयः। ६, एकादशीवेधनिर्णयः। ७, श्रावणशुक्लचतुर्दशीनिर्णयः। ८, वैशाखशुक्लपक्षीयनृसिंहचतुर्दशीनिर्णयः। ९, शिवरात्रिनिर्णयः। १०, सावित्रीव्रतनिर्णयः। ११, श्रावणशुक्लपौर्णमासीकर्त्तव्योपाकर्मसिद्धान्तकथनं। १२, फाल्गुनशुक्लपौर्णमासीकर्त्तव्यहोलिकोत्सवनिर्णयः। १३, सङ्क्रान्तिनिर्णयः। १४. ग्रहणोपवासनिर्णयः। १५, १६, १७, मृताशौचविशेषनिर्णयः। १८, दत्तकपुत्रमरणाशौचनिर्णयः। १९. देशान्तरमृताशौचनिर्णयः। २०, अशौचसङ्करनिर्णयः। २१, जननाशौचनिर्णयः। २२, संसर्गाशौचनिर्णयः। २३, श्राद्धाधिकारिणः। २४, मासिकादिश्राद्धनिर्णयः। २५. सपिण्डीकरणकालः। २६, सपिण्डीकरणकर्त्तृनिर्णयः। २७, सपिण्डाशौचनिर्णयादि। २८, पितामहपिण्डाशननिर्णयः। २९, अग्नौकरणेऽग्निनिर्णयः। ३०, मातापित्रोः क्षयाहसन्निपाते निर्णयः। ३१, सहमृताश्राद्धनिर्णयः। ३२, मातामहश्राद्धं भाद्रशुक्लपौर्णमास्यां कार्यं न वेत्यस्य निर्णयः। ३३, नान्दीश्राद्धनिर्णयः। ३४, अग्न्याधाननिर्णयादि। ३५, आधानेऽधिकारिनिर्णयः। ३६, नित्यहोमविध्यादि। ३७, दत्तकपुत्रग्रहणविधिः। ३८, तीर्थयात्रानिर्णयः। ३९, सापिण्ड्यनिर्णयादि। ४०, ब्राह्मणस्य मांसभक्षण विचारः। ४१, दत्ताप्रदाननिर्णयादि। ४२, कर्तुः पत्न्यां रजस्वलायां क्षयाहश्राद्धनिर्णयः। ४३, स्तेयान्यमहापातके प्रायश्चित्तं। ४४, यवपलमाषादिमानद्रव्यनिर्णयः। ४५, कोटिहोमादिनिर्णयश्च।

No. 868. मुक्तावलीप्रकाशः।

Substance, country paper, $10\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 197. Lines, 11 on a page. Extent, 5900 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Muktávalí-prakás'a, otherwise called *Siddhánta-muktávalí-prakás'a*, *Nyáyamuktávalí-prakás'a*, *Muktávalí-dípiká*, *Muktávalí-kiraṇa*, or *Dinakarí*. An exegesis on the Muktávalí, an elementary treatise on the Nyáya. By Bálakṛishṇa and his son Mahádeva Dinakara. Hall's Contributions, p. 74.

Beginning. लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवास्याम्बुजात्।

शास्त्राशेषमतं मितेन वचसा सिद्धान्तमुक्तावली-
गूढार्थांस्तनुते यथामति महादेवः परेषां कृते ॥
भाषापरिच्छेदव्याख्यानं चिकीर्षुः श्रीविश्वनाथपञ्चाननो निर्विघ्नपरिसिद्धये कृतस्येश्वरनिर्देशरूपमङ्गलस्य शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै निबन्धं कुर्वन्नीश्वरं प्रार्थयते । चूडामणीकृतेति ।

End. भानुं प्रणम्य परिभाव्य च शास्त्रशारं मुक्तावलीकिरण एष पिहप्रदिष्टः ।
सद्युक्तिभिर्दिनकरेण करेण सोऽयं नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु ॥ १ ॥
मुक्तावलीप्रकाशो यः स्वाज्ञानतिमिरापहः ।
तेन सन्तोषमायातु नीलकण्ठः सतां प्रियः ॥

Colophon. इति श्रीमद्दिनकरभट्टविरचिता न्यायसिद्धान्तमुक्तावलीदीपिका समाप्ता ॥

विषयः । द्रव्यगुणादिसप्तपदार्थप्रतिपादकस्य भाषापरिच्छेदनाम्नो न्यायग्रन्थस्य विश्वनाथपञ्चाननकृतायाष्टीकाया मुक्तावलीनाम्न्या गूढार्थानां विवरणम् ।

No. 869. ध्रुवचरितं ।

Substance, country paper, $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 5. Lines, 17 on a page. Extent, 180 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Dhruvacharita. A poetical life of Dhruva, son of king Uttánapáda, who was deprived of his inheritance by a step-mother. By Jayakṛishṇa.

Beginning. भर्त्रे श्रियः प्रवरपद्मभुवोऽपि पित्रे तस्मै नमो भगवते भवभीतिहन्त्रे ।
येनामरेन्द्रपदतोऽपि पदेतिरम्ये सुस्थापितः स्वपदपद्मरतिर्ध्रुवोऽसौ ॥ १ ॥
स्वायम्भुवाभिधमनोस्तनयः किलासीदुत्तानपाद इति तस्य सुतः सुनीत्यां ।
राजा यदासनगतः सुतमुत्तमन्तमङ्के निधाय मुदमाप तदान्तिकस्थं ।
बालं ध्रुवं शिशुतयासनमारुरुक्षुं नादातुमैच्छदवशः क्षणमीक्षितुं वा ॥ ३ ॥
अथान्तरे सुरुचिराह सुतं सपत्न्या रे मूढधिष्ण्यमिदमुत्तममुत्तमस्य ।
तद्गच्छ साधु तपसा तमनाथबन्धुमाराधयाशु हि समोदरमिष्टसिद्ध्यै ॥ ४ ॥

End. श्रीकृष्णपादपरिचारकबालकृष्णबालेन या विरचिता जयकृष्णनाम्ना ।
सेयं ध्रुवानुचरितेन विचित्रपद्या भूयान्मुदे विरचना सुधियामजस्रं ॥ ९१ ॥

Colophon. श्रीमद्भगवत्परिचारकसत्कुलप्रसूतजयकृष्णविरचिता श्रीमद्भगवत्प्रसादसमासादितध्रुवपदध्रुवचरितरचना सदा सतां मुदे भूयात् ।

विषयः । उत्तानपादाभिधस्य राज्ञः पुत्रस्य ध्रुवस्य तपश्चर्यादिचरित्रवर्णनं ।

No. 870. प्रह्लादचरित्रामृतप्रकरणं, श्रीकृष्णस्तोत्रसहितं ।

Substance, country paper, $10\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 5. Lines, 16 on a page. Extent, 180 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, old. Verse. Generally correct.

Prahládacharita. A poetical life of Prahláda, son of Hiraṇyakas'ipu, who, in early youth, devoted himself to the adoration of Vishṇu against the wishes of his father, on account of which he was subjected to very rigorous treatment, and several times exposed to death; but through the grace of Vishṇu, he always escaped unhurt. By Jayakṛishṇa. At the end of the work there is a short hymn to Kṛishṇa.

Beginning. आविर्बभूव यः स्तम्भादाविष्कर्तुं स्ववैभवं ।
स जयत्यजितोऽजस्रं प्रह्लादवरदो हरिः ॥ १ ॥
लक्ष्मीनृसिंहपादाब्जमवमत्य सुखप्रदम् ।
चेतोमिलिन्दमन्दत्वं किं रे भ्रमसि मन्दिरे ॥ २ ॥
इन्द्रादिकान् किल पुराखिललोकपाला-
न्निर्जित्य यः खलु चकार गताधिकारान् ।
दैत्याधिपोऽतिबलवान् भुवनत्रयेऽपि
नाम्ना हिरण्यकशिपुः स बभूव भूपः ॥ ३ ॥
तस्यात्मजोऽजपदसक्तधियां समाजे
प्रह्लाद इत्यभिधया प्रथितोऽभवच्च ।
बालोऽप्यबालमतिरादरतः सदा यः
श्रीशस्मृतेरितरविस्मृतिशील आसीत् ॥ ४ ॥

(श्रीकृ॰प्रा॰) नमस्तुभ्यं रमाकान्त प्रपन्नार्त्तिहर प्रभो ।
कृपालो पाहि बालं मामपराधकुलाकुलं ॥ १ ॥

End. श्रीमद्रमेशपरिचारकबालकृष्णबालेन यद्विरचितं जयकृष्णनाम्ना ।
तच्छ्रीनृसिंहपदवैभवचारुचित्रं प्रह्लादसच्चरितमात्मवतां मुदेऽस्तु ॥ ६७ ॥

श्रीमत्परिचारकसत्कुलप्रसूतजयकृष्णरचितं श्रीमन्नृसिंहप्रसादसम्पन्नं ।
श्रीमत्प्रह्लादसच्चरितं श्रीमद्भगवत्परायणानां सतां सदा मुदेऽस्तु ॥ ६८ ॥

Colophon. इति श्रीमत्प्रह्लादचरित्रामृतप्रकरणं सम्पूर्णम् ।

(श्रीकृ॰परि॰) परिचारकवंशजन्मना जयकृष्णेन कृतो हरिस्तवः ।
हरिपादविहारिचेतसां सुजनानां भवतु प्रमोदकृत् ॥ १३ ॥
इति श्रीजयकृष्णेन विरचितं श्रीकृष्णस्तोत्रं सम्पूर्णम् ।

विषयः । हिरण्यकशिपुदैत्यपुत्रस्य प्रह्लादनाम्नश्चरित्रवर्णनं ।

No. 871. योगशताभिधानं, वा धन्वन्तरिगुणागुणयोगशतं ।

Substance, country paper, $11\frac{1}{4} \times 7$ inches. Folia, 12. Lines, 7-15 on a page. Extent, 600 s'lokas. Character, Nágara. Date, Sm. 1897. Place of deposit, Calcutta, Asiatic Society. Appearance, slightly soiled. Verse. Incorrect.

Yoga-s'atábhidhána alias *Dhanvantari-gunáguna-yogas'ata.* A work on the practice of medicine, treating of various kinds of fevers, dysentery, derangements of wind and blood, worms in the intestines, gonorrhœa, diseases of women, pregnancy, diseases of the mammæ, diarrhœa, asthma, itch, diseases of the eyes and the ears, boils, diseases of children, &c.—Anonymous.

Beginning. प्रणम्य धन्वन्तरिमादिदेवं वरं मुनीनामपि शालिहोत्रम् ।
परोपकाराय सतां हितार्थं करिष्यते योगशताभिधानम् ॥ १ ॥
कृत्स्नस्य तन्त्रस्य गृहीतधाम्ना चिकित्सता विप्रसृतस्य दूरं ।
विदग्धवैद्यप्रतिपूजितस्य करिष्यते योगशताभिधानं ॥ २ ॥
परीक्ष्य हेत्वामयलक्षणानि चिकित्सितज्ञेन चिकित्सितेन ।
निरामदेहस्य हि भेषजानि भवन्ति युक्तान्यमृतोपमानि ॥ ३ ॥
शरीरनेत्रव्रणरोपणानि विषाणभूतानि च बालतन्त्रं ।
रसायनं पञ्चविधञ्च कर्म चाष्टाङ्गमायुः कथयन्ति वैद्याः ॥ ४ ॥

End. रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ।
समरुग्यामलामूत्रा(?) सहृत्खेदादयोऽपि च ॥

Colophon. इति धन्वन्तरिगुणागुणयोगशतं समाप्तम् ॥

विषयः। वातपैत्तिककफज्वरादीनां लक्षणं चिकित्सा च। अतीसारादिचिकित्सा। वातरक्तकृमिप्रमेहादिलक्षणचिकित्साकथनं। स्त्रीरोगनिदानचिकित्सादिकथनं। पूर्णगर्भिणीलक्षणानि। स्तनरोगवातव्याधिचिकित्साकथनं। उदरामयश्वासकासादिचिकित्सा। कण्डूतिनेत्रमुखकर्णरोगादिचिकित्सा। व्रणचिकित्सा, बालकचिकित्सा च।

No. 872. मुकुन्दविजयः।

Substance, country paper, $14\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 53. Lines, 9—10 on a page. Extent, 1150 s'lokas. Character, Nágara. Date, Sm. 1909. Sk. 1774. Place of deposit, Calcutta, Government of India. Appearance, soiled. Verse. Incorrect.

Mukunda-vijaya. An astrological treatise, containing rules for divining success in warfare, for calculating auspicious and inauspicious days for war; starting for employing charms for destroying enemies, &c.—By S'rí Parama, son of Yadumani, and grandson of Prayága. The work was compiled in the Samvat year 1591, for Rájá Mukunda Sena, son of Rudra Sena, grandson of Chandra Sena, and great-grandson of Rúpanárayaṇa.—The name of the Rájá's country is not given.

Beginning. अविद्यातिमिरच्छेदी विद्याकरसहस्रकं।
जगदानन्दकन्दं वै मुकुन्दमिहिरन्नुमः॥ १॥
कमलकुमुदबन्धू लोचने वारवल्ग्वा हसितजलधिपेः प्रोल्लिङ्गिताङ्गः मलज्जम(?)।
हृतवसनसुपीतोत्तुङ्गवक्षोजमीक्ष्य क्षुधित इव दिशत्वानन्दवृन्दं मुकुन्दः॥ २॥
विध्वस्तारिकुलान्धकारनिचयः श्रीरूपनारायणो
दोर्दण्डप्रथितप्रतापविभवो भूमण्डलाखण्डलः।
शौर्यौदार्यगभीरतागुणगणः श्रीखाम्बुराजाम्बुधे-
श्चन्द्रादप्यधिकः कलानिधितया श्रीचन्द्रसेनोऽभवत्॥ ३॥
अर्थिभ्यः प्रतिवासरं वितरणादम्भोनिधेर्यद् यश-
श्चन्द्रव्याहतभास्कराखिलकरात् पूर्णोदयः सर्वदा।
दुर्गाधीशविमर्दनादिव महाराजाधिराजो गिरेः
क्रुद्धो रुद्रपराक्रमो रणभुवि श्रीरुद्रसेनस्ततः॥ ४॥

तदीयतनयो नयैः पृथुरिवाभवत् पार्थिवः
प्रशास्त्युदयपर्वतावधि धरान्तथा भूधरान् ।
सुरद्रुसनिरुद्यमं दृष्ट + + + + + + शेषक्ष-
न्मनोरथफलप्रभूर्ष्टमुकुन्दसेनोऽभवत् (?) ॥ ५ ॥
साक्षान्मुकुन्दो धरणीमवाप्य लोकानशेषान्मुदितान् करोति ।
वाग्देवतायाः कमलालयायाः सीमान् विवादाय वपुर्यदीयम् ॥
इति वंशवर्णनम् ।
तस्याज्ञयाशेषविशेषबोधः कृतश्चतुर्धादितमङ्गरस्य ।
सतामुदे श्रीपरमेण सम्यग् विनिश्चयार्थं क्रियतेऽत्र यत्नः ॥
ब्रह्मविष्णुशिवयामलागमानाकलय्य गिरिजानुशासनं ।
रच्यते स्वरविदां सुखावहः श्रीमुकुन्दविजयो जयोदयः ॥

End. चातुरङ्गकतरोऽसु घातकं मूलकं स्वरविधिसु पत्रकम् ।
+ + + गमनमुक्तभूमयः सत्फलानि जगदुः पुरातनाः (?) ॥ १८ ॥
श्रीमन्मुकुन्दविजये विजयैकधाम्नि सङ्ग्रामसीधि नृपतेः परमोदितेऽस्मिन् ।
घातोपघातरचनाश्चितमन्त्रयन्त्राध्यायः समाप्तिमगमत् किल सप्तमाख्यः ॥ १ ॥
धार्या गले वक्षसि चावधार्या स्वरोक्तिमुक्तामणिचक्रमाला ।
आचार्यसञ्चारकभट्टविचारसभाचमत्कारकरी प्रकाश्या ॥ २ ॥
आसीत् प्रयाग इव पुण्यतनुः प्रयागः सङ्गश्रुतेर्विदित एष स पारदश्वा ।
विश्वोपकारकरुणानिलयोपयोगः साक्षाद्धोक्षज इव प्रथितः पृथिव्याम् ॥ ३ ॥
तस्यात्मजो यदुमणिर्धुमणिस्तपोभिः ख्यातो यशोभिरधिको विबुधाग्रणी सः ।
कातन्त्रकाव्यगणितागमसंहितानां व्याख्याकृदेक इह तर्कविशुद्धबुद्धिः ॥ ४ ॥
तत्पुत्रः परमः पवित्रहृदयः पात्रे धरित्रीतले
काव्यालङ्कृतिकोषभूषणमणिस्तर्केष्वनल्पश्रमः ।
ज्योतिःशास्त्रचिकित्सितार्जितयशोरापुराणाश्चितिनो प्रोल्लस-(?)
यज्ञागारविभूषिते सुनिवसन् विद्वद्विनोदोदये ॥
अब्दे चन्द्रनवाशुगेन्दुगणिते १५९९ श्रीवक्रमे भूभृतां
भूत्यै श्रीपरमो मुकुन्दविजयं मान्यो न्यबध्नादमुम् ॥ ५ ॥

Colophon. इति श्रीशाकद्वीपिकुलावतंसपरमप्रियसेन मुकुन्दविजयः कृतः ।

विषयः । अस्मिन् ग्रन्थे नृपतेर्जयपराजयोपायः कथितः । तत्र १ अध्याये, अ इ उ ए ओ इति पञ्चस्वरादिचक्रद्वारा शुभाशुभफलकथनं । २, सर्वतोभद्रचक्रादि-शुभाशुभफलकथनं । ३, युद्धयात्राशुभाशुभविचारार्थं राहुकालानलादि-

चक्रकथनं। ४, चतुरङ्गसैन्यचक्रादिशुभाशुभनिरूपणं। ५, हस्त्यश्वपत्त्यादि-बलाबलविचारकथनादि। ६, मन्त्रयन्त्रद्वारा वैरिमारणप्रकारकथनादि।

No. 873. सर्वानुक्रमणी व्याख्या।

Substance, country paper, 12 × 4¼ inches. Folia, 2. Lines, 17 on a page. Extent, 64 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Generally correct.

Sarvánukramaṇí-vyákhyá. A brief abstract of Kátyáyana's Sarvánukramaṇi, or General Index to the Vedas. Anonymous.

Beginning. सर्वानुक्रमणी सैषा कात्यायनमुनेः कृतिः।
व्यक्तं व्याख्यायते भक्त्या जन्मसाफल्यहेतवे ॥ १ ॥
अथ ऋग्वेद इत्यादि तृतीयादिचिषुब्लकं।
इदं शास्त्रमधीयानः प्रणवार्थात्मनामियात् ॥ २ ॥
एकपञ्चाशदृग्वेदे गायत्र्यः शाकलेयके।
सहस्रद्वितयं चैव चत्वार्येकशतानि तु ॥ ३ ॥

End. रात्री। रात्रिः। कुशिकसौभरः ॥ २६ ॥ सूर्या च सावित्री। सत्येन सप्तचत्वारिंशत्सावित्री सूर्यात्मदैवतं ॥ २७ ॥ इति ब्रह्मवादिन्यः ॥

Colophon. इति कात्यायनकृते सर्वानुक्रमणी समाप्ता। अग्निमीळे वात आवातु षड्वर्गाग्निं नरोऽग्ने दृहत्पञ्चवर्गाः प्रकृतान्ययंसयस्याद्यन्तं द्वे विरूपे निहोताद्यन्तं पशुरिति भुक्त्वा पठेत्। इत्याश्वलायनस्यानुवाकः। प्राग्भोजनं समाप्तम्। ऋचस्तु पञ्चलक्षाः स्युः सैकोनशतपञ्चकं। ५००५९९। आद्यन्ते पादार्द्धदृतमित्यार्षभगसङ्ख्या ॥

विषयः। ऋग्वेदीयानामृचां गायत्र्यादिछन्दसाञ्चानुक्रमणिका।

No. 874. आरण्यपञ्चकं।

Substance, country paper, 10½ × 4¾ inches. Folia, 50. Lines, 9—10 on a page. Extent, 1000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Áranya-pañchaka, alias *Aitareya Áranyaka*. The Áranyaka of the Rig Veda. This includes the Mahánámni which is generally reckoned as a part of the Áranyaka Saṅhitá, a section of the Sama Veda. As its name implies, it comprises five Áranyakas or parts, each of which is divided into two or more chapters.

Beginning of the 1st Áranyaka. भूमिमुपस्पृशेदग्रऽ इड़ा नमऽ इड़ा नमऽ इत्यादिकः, शान्तिः सुशान्तिर्भवेत्यन्तः सप्तदशपङ्क्त्यात्मकः शान्तिपाठः। ततः प्रथमारण्यकारम्भः। ओ३म्। अथ महाव्रतमिन्द्रो वै वृत्रं हत्वा महानभवद्यन्महाव्रतमभवत्तन्महाव्रतस्य महाव्रतत्वं—

End of the 1st Áranyaka. समानोदर्कं समानोदर्कं वाऽ एतद्रेतस्याक्षो रूपमक्षो रूपम्॥ २॥ २२॥ इति पञ्चमोऽध्यायः। ओ३म्। इति प्रथमारण्यकं समाप्तम्॥ It contains 5 chapters.

Beginning of the 2nd ditto. ओ३म्। एष पन्थाऽ एतत्कर्मैतद् ब्रह्मैतत्सत्यं——

End of ditto. स्वर्गं लोकं सर्वान् कामानाप्नोत्यमृतः समभवत् समभवत्॥ २५॥ ओ३म्॥ इत्येकादशोऽध्यायः॥

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि। वेदस्य म आणीस्थः। श्रुतं मे मा प्रहासीरनेनाधीतेन। अहोरात्रान्त्सन्दधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम्॥ २६॥ ओम्। इति द्वादशोऽध्यायः। इति द्वितीयारण्यकं (समाप्तम्)। It contains 7 chapters.

Beginning of the 3rd ditto. ओ३म्। अथातः संहिता वा उपनिषत्पृथिवी पूर्वरूपं द्यौरुत्तररूपं——

End of ditto. स एवाप्यस्या एताः संहिता नानन्तेवासिने प्रब्रूयान्नासंवत्सरवासिने नाप्रक्ष इत्याचार्याऽ आचार्याः॥ ६॥ १२॥ इति चतुर्दशोऽध्यायः। ओ३म्॥ इति तृतीयारण्यकं समाप्तम्॥ It contains 2 chapters.

Beginning of the 4th ditto. ओ३म्। विदा मघवन्विदा गातुमनु शंसिषो दिशः। शिक्षा शचीनां पते——

End of ditto. एवा हि शक्रो वशी हि शक्रो वशाँऽ अनु। आयोमन्याय मन्यवऽ उपो मन्याय मन्यवे। उप हि विश्वधा। विदा मघवन्विदो३म्॥ १॥ इति पञ्चदशोऽध्यायः। ओ३म्। इति चतुर्थारण्यकं समाप्तम्। It contains 6 chapters.

Beginning of the 5th ditto. ओम्। महाव्रतस्य पञ्चविंशतिसामिधेन्यऽ एकविंशतौ प्रागुपोत्तमायाः——

End of ditto. नास्मिन् कथां वदेत। नास्य रात्रौ च न च कीर्त्तयिषेत्तदिति वा एतस्य महतो भूतस्य नाम भवति। योऽस्यैतदेव नाम वेद ब्रह्म भवति ब्रह्म भवति ॥ २ ॥ १४ ॥ It is divided into 3 chapters.

Colophon. ॐ। इत्यष्टादशोऽध्यायः। इति पञ्चमारण्यकं समाप्तम् ॥

विषयः। १ आरण्यके ५ अध्यायाः। २। ६,—१२, (७) अध्यायाः। ३। १३,—१४ अध्यायौ। ४। १५,—(१) अध्यायः। ५। १६,—१८,(३) अध्यायाः। सर्वे एते अध्याया मिलित्वा अष्टादश भवन्ति। अत्र खाडमेदेऽप्यध्यायमङ्गैक्यमस्ति।

No. 875. सप्तपदार्थी।

Substance, country paper, $9\frac{1}{4} \times 3\frac{3}{4}$ inches. Folia, 10. Lines, 10 on a page. Extent, 180 s'lokas. Character, Nágara. Date, Sm. 1485. Place of deposit, Calcutta, Asiatic Society. Appearance, old and decayed. Prose. Generally correct.

Saptapadárthi. A brief summary of the seven categories of the Vais'eshika philosophy. The categories are matter, quality, motion, generality, specialty, aggregation, and negation. By S'iváditya. There are two commentaries extant on this work, one entitled Mitabhashiní by Mádhava Sarasvati, and the other, Saptapadártha Vyákhyá, by Hari. The MS. is 446 years old. Hall's Contributions, p. 74.

Beginning. प्रारभ्यते शास्त्रमनुत्तमञ्च सर्व्वार्थसम्पत्तिनिदानयुक्तं।
महेशपादाम्बुजरेणुजुष्टप्रसादपुष्टेन शिवांशुमालिना।
हेतवे जगतामेव संसारार्णवसेतवे।
प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः ॥
प्रमितिविषयाः पदार्थाः। ते च द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावाख्याः सप्तैव।

End. सप्तद्वीपा धरा यावद्यावत् सप्तधरा धरा।
तावत् सप्तपदार्थीयमस्तु वस्तुप्रकाशिनी ॥

Colophon. इति शिवादित्यविरचिता सप्तपदार्थी लिखि + +

विषयः। द्रव्यगुणकर्मसमवायाभावादिसप्तपदार्थनिरूपणं।

No. 876. पवमानहोमविधिः ।

Substance, country paper, 12 × 4¼ inches. Folia, 7. Lines, 9—10 on a page. Extent, 105 s'lokas. Character, Nágara. Date, S'K. 1713. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Pavamána-homa-vidhi. Directions for performing the Pavamána-homa for the expiation of sins. Anonymous.

Beginning. अथ पवमानहोमविधिः । बृहद्विधानभाष्ये । पवमानमन्त्राणां जपादिना सर्वतपोभ्यः श्रेष्ठं श्रूयते ।

End. एवमशीत्यधिकद्विशतोत्तर एकोनविंशत्सहस्राण्याहुतयः सम्पद्यन्ते ।

Colophon. इति पवमानहोमविधिः ।

विषयः । महापातकोपपातकादिनिरासार्थं कृतस्य पवमानमन्त्रजपस्याङ्गीभूतहोमविधिकथनं ।

No. 877. छन्दोमञ्जरी ।

Substance, country paper, 12 × 4¼ inches. Folium, 1. Lines, 34. Extent, 50 s'lokas. Character, Nágara. Date ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Chhandomanjarí. A treatise on Vedic metres. This is entirely different from the elementary treatise on versification of this name by Gangádása, son of the physician Gopáladása, which has been repeatedly printed in Calcutta.

Beginning. अथ छन्दोमञ्जरीप्रारम्भः । अथ अतिजगत्यादिसप्तवर्गे पादविशेषा अनुक्रमण्यन्तरोक्ता उच्यन्ते ।

End. यवमध्या ८ । ८ । १२ । ८ । ८ स यथियस्य चर्छतिः ॥ २ ॥

Colophon. इति छन्दोमञ्जरी समाप्ता ।

विषयः । गायत्र्यादिवैदिकच्छन्दसामुदाहरणीभूतानां ऋचां प्रतीककथनं, तेषां नामोल्लेखपूर्वकपादाक्षरव्यवस्थाकथनञ्च ।

No. 878. योगेशीसहस्रनामस्तोत्रं ।

Substance, country paper, 12 × 4¼ inches. Folia, 6. Lines, 12 on a page. Extent, 200 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse. Generally correct.

Yoges'i-sahasranáma-stotra. A metrical list of the thousand names of Yoges'í, a form of Durgá. This is a fragment of the Rudra-yámala Tantra.

Beginning. या तुरीया परा देवी दोषत्रयविवर्जिता ।
सदानन्दतनुः शान्ता सेवाहमहमेव सा ॥ १ ॥
यस्याः संस्मरणादेव क्षीयन्ते भवभीतयः ।
तां नमामि जगद्धात्रीं योगिनीं परयोगिनीम् ॥ २ ॥

End. सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
नानया सदृशी विद्या न देवी योगिनीपरा ॥ ७३ ॥

Colophon. इति श्रीरुद्रयामलतन्त्रे विष्णुहरसंवादे योगेशीसहस्रनामस्तोत्रं सम्पूर्णम् ॥
देवीं भक्तजनप्रियां सुवदनां खड्गञ्च पात्रं तथा
स्वर्णालङ्कृतलाङ्गलं सुमुशलं हलैर्दधानां श्रियं ।
विद्युत्कोटिरवीन्दुकान्तिममलां दन्तासुरोन्मूलिनीं
ब्रह्मेन्द्राद्यभिवन्दिताञ्च वरदां योगेश्वरीं तां भज ॥

विषयः । योगेशीदेवीसहस्रनामकथनं, तत्पाठफलकीर्त्तनञ्च ।

No. 879. शौनकोक्तवास्तुशान्तिप्रयोगः ।

Substance, country paper, 12 × 4¼ inches. Folia, 3. Lines, 12 on a page. Extent, 125 s'lokas. Character, Nágara. Date, S'K. 1718. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

S'aunakokta-vástus'ánti-prayoga. Directions for performing certain rites and ceremonies for the pacification of the nine planets, on the occasion of taking possession of a new dwelling. The directions follow the rules of S'aunaka. Anonymous.

Beginning. अथ शौनकोक्तवास्तुशान्तिप्रयोगो लिख्यते। उक्तक्रमेण गृहं निर्माय ज्योतिः-शास्त्रोक्ते शुभे मुहूर्ते प्रवेशसमयात् प्राक् भपत्नीका यजमानः कृतनित्यक्रिय इत्यादि।

End. ब्राह्मणैः सह पुण्याहं वाचयित्वा ज्योतिषिकं सन्तोष्य।

Colophon. इति शौनकोक्तवास्तुशान्तिः समाप्ता। (असमापिकाक्रियाप्रयोगात् अस्य समाप्तौ सन्देहः)

विषयः। गृहशान्तिप्रयोगकथनं।

No. 880. यज्ञोपवीतनाशप्रायश्चित्तप्रयोगः।

Substance, country paper, 12 × 4¾ inches. Folia, 2. Lines, 15 on a page. Extent, 50 s'lokas. Character, Nágara. Date, S'K. 1747. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Yajñopavita-nás'a-práyas'chitta-prayoga. Rites to be performed for the expiation of the evil resulting from the accidental destruction, breaking, or soiling by contact with impurities, of the Brahmanical thread. Anonymous.

Beginning. अथ यज्ञोपवीतनाशप्रायश्चित्तं। रत्नमालायां। यज्ञोपवीते त्रुटिते दग्धे नष्टे कटेरधस्ताद्गते। अभ्यङ्गोद्धिस्नानपिण्डमाढत्तयाहान विना त्राणनार्थमपि कण्ठादुत्तरिते मूत्रपुरीषोत्सर्गकाले कर्णे यज्ञोपवीताधारणे रक्तश्लेष्मसुरामांस-विण्मूत्रादिभिरुपहते तस्य त्यागं कृत्वा प्रायश्चित्तमकृत्वा नूतनयज्ञोपवीतं धारयेत्।

End. स्विष्टकृदादिहोमशेषं समाप्य यज्ञोपवीतं समन्त्रकं धारयेत्।

Colophon. इति यज्ञोपवीतनाशप्रायश्चित्तप्रयोगः॥

उपवीतं यज्ञनष्टं गायत्र्याष्टशतं जपेत्।

प्राजापत्यं चरेद् यद्वा यद्वा गोदानमिष्यते॥ इत्येकप्रकारः।

विषयः। यज्ञोपवीते नष्टे त्रुटिते अमेध्योपहते तत्र प्रायश्चित्तविधानं।

No. 881. गायत्रीहृदयं ।

Substance, country paper, 12 × 4¼ inches. Folia, 2. Lines, 17 on a page. Extent, 200 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Gáyatrí-hridaya. Origin, derivation, and meaning of the Gáyatrí, related by Brahmá in reply to a query of Yájñavalkya. This is a Puráṇic account, different from No. 442.

Beginning. अथ गायत्रीहृदयं । नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयम्भुवं परिपृच्छति । त्वन्नो ब्रूहि भगवन् गायत्र्युत्पत्तिं तुरीयं श्रोतुमिच्छामि ब्रह्मज्ञानोत्पत्तिं प्रकृतिं परिपृच्छामि ।

End. (खण्डितत्वाच्छेषवाक्यादिकं न प्राप्तं) ।

विषयः । गायत्र्युत्पत्ति—गायत्र्यर्थादिकथनं ।

No. 882. गायत्र्यष्टोत्तरशतदिव्यनामामृतस्तोत्रं ।

Substance, country paper, 12 × 4½ inches. Folium, 1. Lines 19. Extent, 42 s'lokas. Character, Nágara. Date, S'K. 1747. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and Verse. Generally correct.

Gáyatrya-ashṭottara-s'ata-divya-námámrita-stotra. A hymn in praise of the 108 names of the Gáyatrí. This is apparently an extract from a Tantra, and, according to it, Vis'vámitra recites the hymn for the edification of Ráma.

Beginning. अस्य श्रीगायत्र्यष्टोत्तरशतदिव्यनामामृतमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय ऋग्यजुःसामाथर्वाणि च्छन्दांसि गायत्रीसावित्रीसरस्वत्यादयो देवता हलो बीजानि स्वराः शक्तयः, अव्यक्तयः कीलकं मम गायत्रीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End. रोगिणां रोगशमनं सर्वैश्वर्यप्रवर्द्धनं ।
किमत्र बहुनोक्तेन स्तोत्रं सर्वस्य दर्शनं ॥ २३ ॥

Colophon. इति श्रीविश्वामित्रराघवसंवादे गायत्र्यष्टोत्तरशतदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

विषयः । गायत्र्या अष्टोत्तरशतनामकथनं ।

No. 883. अस्थिशुद्धिप्रयोगः ।

Substance, country paper, 12 × 4¼ inches. Folium, 1. Lines, 18. Extent, 22 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose. Generally correct.

Asthis'uddhi-prayoga. Directions for performing a rite for the purification of the bones of a deceased parent, in order that thereby the spirit of the parent may be translated to a higher and happier region. Anonymous.

Beginning. अथास्थिशुद्धिः । पुण्यतिथौ मम पितुर्मातुश्च मोक्षपदस्वर्गवाससमनुभूय विष्णोः पदसायुज्यपदवीप्राप्त्यर्थमस्थिशुद्धिविधानं करिष्ये ।

End. उदीरतेति मन्त्रेण तिलाज्येनाष्टशतं होमं कुर्यात् । ततो स्नानं कृत्वा दक्षिणां दद्यात् ।

Colophon. इत्यस्थिशुद्धिप्रयोगः ।

विषयः । मातुः पितुश्चास्थि आदाय पवित्रस्थाने तन्निक्षेपस्य प्रयोगः ।

No. 884. गायत्रीपञ्जरं, गायत्रीवर्णजस्तोत्रसहितं ।

Substance, country paper, 12 × 4¼ inches. Folia, 6. Lines, 13 on a page. Extent, 220 s'lokas. Character, Nágara. Date, S'K. 1746. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Prose and verse. Generally correct.

Gáyatrí-panjara. Origin and derivation of the Gáyatri and the merits of repeating it. An extract from the Vas'ishṭha Saṁhitá. Annexed is a hymn in praise of the Gáyatri. Anonymous.

Beginning. अथ गायत्रीपञ्जरप्रारम्भः । भगवन्तं देवदेवं ब्रह्माणं परमेष्ठिनं ।
विधातारं विश्वसृजं पद्मयोनिं प्रजापतिं ॥ इत्यादि ।

(गायत्रीस्तो॰प्रा॰) । अथ गायत्रीवर्णप्रारम्भः । ॐकारस्य त्रयं रूपं श्वेतं पीतञ्च लोहितम् ।

End. किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितं ॥ ११४ ॥

Colophon. इति श्रीमद्वसिष्ठसंहितायां ब्रह्मनारदसंवादे श्रीमद्गायत्रीपञ्जरं समाप्तम् ॥

(गायत्रीस्तो॰ समाप्तिवा॰)। गायत्रीवर्णजं स्तोत्रं प्रत्यहं पठते नरः।

सर्वपापविशुद्धात्मा ब्रह्मलोके महीयते ॥ २७ ॥

इति गायत्रीवर्णजं स्तोत्रं सम्पूर्णम् ॥

विषयः। गायत्रीध्यानादि, गायत्रीवर्णफलं, एतत्पाठफलकथनादि च।

No. 885. विश्वामित्रकल्पः।

Substance, country paper. 12 × 4¼ inches. Folia, 38. Lines, 4 on a page. Extent, 1600 s'lokas. Character, Nágara. Date, S'K. 1746. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Vis'vámitra-kalpa. A Smriti treatise. Contents: meditation of the divine soul immediately on waking from sleep in the morning; meditation of some tutelary divinity; brushing of the teeth and other morning duties; bathing; putting on rosaries of Rudráksha; purification of the body by mantras; the three Sandhyá prayers; reciting of Vedic mantras; purification of food; offerings to the Vis'vedevás; offerings to cows; rules for eating; proper and improper food; altar for the ceremony of initiation in the Gáyatrí; rules for initiation; purification of one's self by repeating the Gáyatrí; diurnal duties; Gáyatrihoma, &c.—The work professes to be a part of the *Vis'vámitra-Sañhitá*, which, however, is a little-known treatise—at least, it has been nowhere quoted.

Beginning. अथ विश्वामित्रकल्पप्रारम्भः। अथ नित्यविधानं।

प्रातरुत्थाय कर्त्तव्यं यद् द्विजेन दिने दिने।

तमहं सम्प्रवक्ष्यामि द्विजानामुपकारकम् ॥ १ ॥

End. अङ्गहीनादिकं कर्म जपो द्विगुण उच्यते।

तर्पणं मार्जनञ्चैव भोजनञ्च चतुर्गुणं ॥

Colophon. इति विश्वामित्रकल्पे नित्यनैमित्तिकादिगायत्रीपुरश्चरणविधानं समाप्तम्।

विषयः। प्रातरुत्थायात्मचिन्तनप्रकारः। देवताध्यानप्रकारः। दन्तधावनादिप्रातःकृत्यं। स्नानविधिः। रुद्राक्षधारणविधिः। भूतशुद्ध्यादिप्रकारः। त्रिकालसन्ध्याविधिः। वेदादिमन्त्रपाठरूपब्रह्मयज्ञकथनादि। अन्नशुद्धिप्रकारादि। प्रसृताग्नहोमप्रकारस्वरूपवैश्वदेवकथनादि। गोग्रासादिकथनं। भोजनविधिः। भक्ष्यद्रव्यविधिनिषेधः। दीक्षार्थं वेदीनिर्माणं। दीक्षाप्रकारः। गायत्रीपुरश्चरणविधिः। नित्यकर्त्तव्यकर्मविधिः। गायत्रीमन्त्रेण होमविधिः कथनादि च।

No. 886. गायत्रीस्तवराजस्तोत्रं ।

Substance, country paper, 12 × 4¼ inches. Folia, 2. Lines, 13 on a page. Extent, 65 s'lokas. Character, Nágara. Date, S'K. 1745. Place of deposit, Calcutta, Asiatic Society. Appearance, new. Verse. Generally correct.

Gáyatrí-stavarája-stotra. A hymn in praise of the Gáyatrí, an extract from the Visvámitra Saṅhitá.

Beginnng. अस्य श्रीगायत्रीस्तवराजस्तोत्रमन्त्रस्य नूतनसृष्टिकर्त्ता विश्वामित्र ऋषिर्गायत्री-
छन्दो नानाछन्दांसि सकलजननी चतुष्पदा गायत्री परमात्मा देवता इत्यादि ।

End. विश्वामित्रसमुद्भूतं हितकरं सर्वार्थसिद्धिप्रदं
स्तोत्राणां परमं प्रभातसमये पारायणं नित्यशः ।
वेदानां विधिवाद्मन्त्रसकलां सिद्धिप्रदां सम्पदां
सम्प्राप्नोत्यपरं समग्रसुखदा(?) आयुष्यमारोग्यदाम् ॥ २५ ॥

Colophon. इति श्रीविश्वामित्रसंहितायां परमरहस्ये गायत्रीस्तवराजस्तोत्रं सम्पूर्णं ।

विषयः । गायत्र्याः स्तुतिः ।

No. 887. ऋग्वेदसंहिताहोमविधिः ।

Substance, country paper, 12 × 4¼ inches. Folia, 10. Lines, 10—11 on a page. Extent, 300 s'lokas. Character, Nágara, Date, S'K. 1744. Place of deposit, Calcutta, Government of India. Appearance, New. Prose and verse. Generally correct.

Ṛigveda-saṅhitá-homavidhi. Directions for performing Ṛig Vedic homas, according to the school of Yáskala.—The first two pages contain some excerpts unconnected with the text. The work begins on the 3rd page.

Beginning. अथ कमलाकरभट्टवचनं । तत्र मन्त्रः ।
ब्राह्मणाः सन्तु वै शान्ताः पापात् पान्तु समाहिताः ।
वेदानाञ्चैव दातारस्त्रातारः सर्वदेहिनाम् ॥ १ ॥
(इत्यादिश्लोकत्रयपाठानन्तरं ग्रन्थारम्भः)
नत्वोमामाधवौ देवौ ब्रह्मणे च स्वयम्भुवे ।
ऋग्वेदमन्त्रदृग्भ्यश्च शौनकादिभ्य एव च ॥ १ ॥

8/11/74

No. VII.

NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA,

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, and of the Royal Academy of Science, Hungary; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME II.—PART IV.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS.

1874.

ऋग्विधानादिकं दृष्ट्वा ऋग्वेदे देवताक्रमम्।
बालकृष्णः श्रोत्रियोऽत्र वक्ते होमविधानकम्॥ २॥

End. जातवेदाग्निं ३। सूर्यं ३। भावदृत्तं ३। मच्छानं ४। ऋचा २१८। सूक्ते ४९।

Colophon. इत्यष्टमाष्टकः समाप्तः। इति शाकलसंहिताया अन्वाधानं समाप्तं।

विषयः। ऋग्वेदपारायणविधानं। ऋग्वेदपारायणकरणप्रकारदर्शनं। एतत्पारायणाङ्गीभूतहोमादिकथनञ्च।

No. 888. गङ्गास्नानविधिः।

Substance, country paper, 12 × 4¼ inches. Folia, 6. Lines, 10 on a page. Extent, 250 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Gaṅgâ-snánavidhi. Directions for bathing in the River Ganges. Anonymous.

Beginning. अथ गङ्गास्नानविधिः। यानानि तु परित्यज्य भाव्यं पादचरैर्नरैः।
लुठित्वा लोटणोद्भैव कृत्वा कर्पाटिकाकृतिम्॥ इति। साष्टाङ्गं प्रणम्य।

Tántrikapújá-paddhati. Guide to daily rituals according to the Tantras. Contents: Rules for the threefold Sandhyá worship; washing of the face on such occasions for Vaishṇavas; offering of Argha; certain manipulations called *nyása;* intellectually placing certain letters of the alphabet on fourteen different lotus-like organs of the body; *nyása* in connexion with different members of the body; intellectually placing certain deities on six different parts of the body; placing of those divinities on the organic and sensuous functions of the body; Práṇáyáma; placing of divinities in their proper places and on their respective seats; intellectual worship; arrangement of the instruments of worship; the worship of the seats of the gods; worship of the gods.

Beginning. अथ तान्त्रिकसन्ध्याप्रयोगः । आचम्य जले गङ्गे चेत्यादिना सूर्यमण्डलात्तीर्थमावाह्य मूलेन कुशेन भूमौ त्रिवारं जलं क्षिपेत् ।

End. संहारमुद्रया कृत्वा(?) तत्तेजः पुष्पैः सार्द्धं स्वहृदयमानयेत् । तत ऐशान्यां चतुष्कोणमण्डलं कृत्वा तत्र निर्माल्यशेषं ॐ विश्वक्सेनाय नम इति दद्यात् ।

Colophon. इति पूजापद्धतिः समाप्ता ।

विषयः । तान्त्रिकसन्ध्याविधिः । वैष्णवाचमनविधिः । सामान्यार्घस्थापनादिविधिः । कराङ्गुलीषु हृदयादिषड्ङ्गेषु च मातृकान्यासः । शरीरान्तस्थचतुर्दलपद्मे वशषसादिचतुर्वर्णन्यासः । सर्वाङ्गप्रत्याङ्गादिषु मातृकावर्णन्यासः । षड्ङ्गेषु केशवादिकीर्त्यादिदेवताद्वन्द्वन्यासः । पुनस्तत्र प्राणादि-मत्यादितत्त्वन्यासः । प्राणायमः । देवतापीठन्यासः । मानसपूजा । शङ्खस्थापनादिप्रकारः । पीठपूजा । देवतापूजा ।

No. 925. प्राणतोषिणी ।

Substance, country paper, $18\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 304. Lines, 13 on a page. Extent, 19,513 s'lokas. Character, Bengali. Date of printing Sk. 1743. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and Verse. Correct.

Prâṇatoshaṇi. A summary of the Tántric cult. The work was compiled by Rámatoshaṇa S'armá, under the patronage of Prâṇakrishṇa Vis'vása, a zemindar of Khaḍadaha in the neighbourhood of Calcutta, and printed for private circulation in the S'aka year 1743. The name of the work is made up of the second word of the author's name, and the first of that of the patron. It comprises large extracts from the authentic Tantras.

Beginning. जड़े काव्यं दात्री द्रुतमुदकबिन्दौ जलधितां
पयोधौ पाथोणुत्वमपि न तु सर्वकवशगा ।
गिरौ धूलीलेशत्वमचलवरत्वं रजसि वा
विचित्रेच्छास्वैरं जयति जयतारेत + + + ॥ इत्यादि ।
(खण्डितत्वात्समाप्तिवाक्यादिकं नास्ति ।)

विषयः । (विषयस्त्वस्य सूचीपत्रे द्रष्टव्यः ।)

No. 926. लिङ्गादिसङ्ग्रहटीका ।

Substance, country yellow paper, 12½ × 3 inches. Folia, 17. Lines, 7—11 on a page. Extent, 330 sl'okas. Character Bengali. Date, Sk. 1759. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose. Generally correct.

Liṅgádisaṅgraha-ṭíká. A commentary on the Liṅgádisaṅgraha,—a treatise on grammar. By Bharata Mallika.

Beginning. सलिङ्ग इत्यादि । सलिङ्गशास्त्रैः पाणिनिवररुचिचन्द्रादिप्रणीतवक्ष्यमाणलिङ्ग-लक्षणसूत्रसहितैः । इत्यादि ॥

End. इति प्रयोगाच्च लज्जापर्यायत्वेन स्त्रीत्वे प्राप्ते पुंस्त्वं । एवमन्यत्रापि ज्ञेयम् । समाप्ता लिङ्गसङ्ग्रहादिटीका ।

Colophon. इति श्रीभरतमल्लिककृता टीका ।

विषयः । कृत्तद्धितान्तादिशब्दानां लिङ्गनिर्द्धारणपरस्य लिङ्गादिसङ्ग्रहस्य वाक्यार्थविवरणं ।

No. 927. शब्दार्थसारमञ्जरी ।

Substance, country yellow paper, 12½ × 3 inches. Folia, 30. Lines, 6 on a page. Extent, 525 s'lokas. Character, Bengali. Date, Sk. 1761. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose. Generally correct.

S'abdárthasára-manjarí. A treatise on the syntax of the Sanskrit language. By Jayakrishṇa S'armá.

Beginning. हेरम्बचरणद्वन्द्वं विघ्ननाशकरं परं ।
प्रणम्य जयकृष्णेन क्रियते सारमञ्जरी ॥ १ ॥
तत्र प्रथमतः कालनिरूपणम् ।

End. आलोक्य विविधग्रन्थान् विचार्य च पुनः पुनः ।
कृतेयं जयकृष्णे न शब्दार्थसारमञ्जरी ।

Colophon. इति जयकृष्णशर्मविरचितशब्दार्थसारमञ्जरी समाप्ता ।

विषयः । आख्यातार्थनिरूपणं । शाब्दबोधप्रकारः । कारकविचारः । समासवादः । एवं-शब्दविचारादि । सर्वनामपदशक्तिविचारः । एवशब्दविचारः । उपसर्गविचारः । क्तप्रत्ययविचारः । नञर्थकथनं । वैधहिंसाविचारः । पदशक्तिनिरूपणं । शक्तिग्राहकपदार्थनिरूपणं । शब्दविचारः । वाचकत्वस्य लक्षणं । वीप्साविचारः । शाब्दबोधप्रकारान्तरं । एकादिपराद्धपर्यन्तसङ्ख्याशब्दविचारः ।

No. 928. गीतगोविन्दटीका ।

Substance, country yellow paper, 12½ × 3 inches. Folia, 34. Lines, 8—11 on a page. Extent, 134 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Gítagovinda Ṭiká. A commentary on the Gítagovínda of Jayadeva. Anonymous.

Beginning. टीका । राधामाधवयो रहःकेलयो जयन्ति । निभृतक्रीडा जययुक्ता भवन्तु इत्यर्थः । कुत्र यमुनाकूले । किम्भूतयोः । इत्थं अनेन प्रकारेण पस्यङ्गेत्य-लितयोः(?) । नन्दनिदेशमाह । हे राधे तत् तस्मात् त्वमेव इमं श्रीकृष्णं गृहं प्रापय आनय इत्यर्थः ।

End. किम्भूतं । विरहानलदग्धपुरुषं यो मृतस्य वपुर्देहोऽग्निना दह्यते दग्धस्य मृतस्य विनाशस्य पुणो भवति इति विनाशः ॥ ५ ॥ (ख०)

विषयः । जयदेवकविविरचितगीतगोविन्दमहाकाव्यस्य व्याख्यानं ।

No. 929. बालबोधिनीनाम्नी गीतगोविन्दटीका, मूलसहिता ।

Substance, country paper, $10\frac{1}{4} \times 5\frac{3}{4}$ inches. Folia, 42. Lines, 14—17 on a page. Extent, 2250 s'lokas. Character, Bengali. Date, ? Place oi deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Bálabodhíni. A commentary on the Gítagovínda of Jayadeva. Anonymous. Jayadeva is said in this MS. to have been the son of Vámadeva and grandson of Bhojadeva.

Beginning. टीकाप्रा० । श्रीचैतन्यकृपासीधुकणोन्मत्तेन केनचित् ।
टीका सङ्गृह्यते गीतगोविन्दस्य समासतः ।
स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः ।
क्रमेणोपक्रमादेषा ग्रथ्यते बालबोधिनी ॥

मूलप्रा० । मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेमतदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥

End. टीकाम० । अतः सर्गोयं सम्पद्विमदाख्यसम्भोगरसानन्दितः पीताम्बरः प्रियाधीनत्वेन तद्वर्णवर्णवसनप्रियः श्रीकृष्णो यत्र स इति ।
इति स्वपितृमातृकस्मरणपूर्वकपराशरादिमतज्ञा एवास्याधिकारिण इति तान् प्रत्याशिषयति भोजेति । भोजदेवनामास्य पिता वामदेवीनाम्नी जननी परादीनां ये प्रियाः तन्मतज्ञास्तेष्वपि ये बन्धवस्तन्मतसारश्रीराधामाधवरहःकेलिज्ञानेन बन्धुत्वं प्राप्तास्तेषामेव कण्ठे भूषणवत् सदा गीतगोविन्दाख्यं कवित्वमस्तु ।

मूलम० । यच्छन्ति यावद्भावं शृङ्गारसारस्वतमिह जयदेवस्य विश्वग्वचांसि ।
इति श्रीजयदेवकृतौ गीतगोविन्दे महाकाव्ये स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ।
श्रीभोजदेवप्रभवस्य वामदेवात्मजश्रीजयदेवकस्य । पराशरादिप्रियबन्धुकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥

विषयः । जयदेवकविविरचितगीतगोविन्दाख्यमहाकाव्यस्य व्याख्यानं ।

No. 930. पुराणदानमाहात्म्यं ।

Substance, country paper, $10\frac{1}{4} \times 4\frac{3}{4}$ inches. Folia, 6. Lines, 10—11 on a page. Extent, 62 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Puráṇa-dána-máhátmya. Nature, character, and extent, of the Puráṇas, and the religious merit of presenting them in MS. to Bráhmaṇas. Anonymous. The style of the work is Puráṇic, and, I suspect, it is an extract from the Matsya Puráṇa. It is narrated by Brahmá in reply to the question of a sage named Matsya.

Beginning. मत्स्य उवाच । पुराणं धर्मशास्त्राणां प्रथमं ब्रह्मणा स्मृतं ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥
पुराणमेकमेवासीत्तदा कल्पान्तरेनघ ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरं ॥
निर्दग्धेषु च लोकेषु वाजिरूपेण वै मया ।
अङ्गानि चतुरो वेदा पुराणन्यायविस्तरः ॥
मीमांसा धर्मशास्त्रं च परिगृह्यात्मसात्कृतं ।
मत्स्यरूपेण (हि) पुनः कल्पादावुदकार्णवे ॥
अशेषमेतत्कथितमुदकान्तर्गतेन च ।
श्रुत्वा जगाद स मुनीन् प्रतिवेदं चतुर्मुखः ॥
प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ।
कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ॥
व्यासरूपमहं कृत्वा संहरामि युगे युगे ।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा ॥
तदाष्टशतधा कृत्वा भूर्लोकेस्मिन् विभाव्यते ।

End. तद् ब्रह्माण्डपुराणन्तु ब्रह्मणा समुदाहृतं ।
योदद्यात्तु व्यतीपाते + + + + + संयुतं ।
राजसूयसहस्रस्य फलमाप्नोति मानवः ॥ १८ ॥
चतुर्लक्षमिति प्रोक्तं व्यासेनाद्भुतकर्मणा ।
मत्पितुर्मम पित्रा च मया तुभ्यं निवेदितम् ॥

Colophon. इति पुराणदानमाहात्म्यम् ।

विषयः । पुराणश्लोकसङ्ख्या, पुराणनामव्युत्पत्तिः, पुराणदानविधिश्च ।

No. 931. काव्यकलापः ।

Substance, white and yellow country paper, 17 × 3 inches. Folia, 7. Lines, 7 on a page. Extent, 214 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Paṇḍit Purushottama Tarkálaṅkára. Appearance, fresh. Prose and verse. Incorrect.

Kávya-kalápa. A romance in prose and verse. By Mahánanda Dhíra. The MS. is a mere fragment and very corrupt.

Beginning. नत्वा श्रीदेवदेवीं त्रिभुवनजननीं श्यामरूपां वरेण्यां
यस्याः क्रोड़े निवसति सदा दिव्यरूपं सुरेशम् ।
आद्यं मेघाघनरुचिरतरं पीतवासं तड़ित्तं (?)
वच्ये काव्यं कलापं कलितप्र+सवं नीलकण्ठस्य वक्त्रात् ॥

End. सा इति वाक्यं कथयित्वा राजपुरतो नयचेष्टां कृतवतो ।
ततः श्रीकाव्यकलापो महानन्दधीरेण कथितुमारब्धः ॥

विषयः । (अतःपरमस्पष्टाक्षरत्वादुर्वाच्यम् । तत्पाठेऽयमसमाप्तमिति लक्ष्यते ।
चम्पूकाव्यमेतत् । असम्पूर्णत्वादस्य पुस्तकस्य प्रकरणच्छेदोऽज्ञेयः ।)

No. 932. क्रमसङ्ग्रहः ।

Substance, white and yellow country paper, 19½ × 3½ inches. Folia, 23. Lines, 6 on a page. Extent, 638 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvipa, Paṇḍita Purushottama Tarkálaṅkára. Appearance, old. Prose and verse. Correct.

Kramasaṅgraha. The law of succession according to the Bengal school. By S'ríkṛishṇa Tarkálaṅkára Bhaṭṭáchárya.

Beginning. जगदम्बापदद्वन्द्वमापदां क्षयसाधनम् ।
विश्वकोटिविनिर्माणस्थितिसंहारकारणम् ॥
निधाय हृदये दायाधिकारक्रमसङ्ग्रहः ।

क्रियत पण्डितामोदी श्रीमच्छ्रीकृष्णशर्मणा ॥
अथ दायाधिकारक्रमः—

End. स्वयमूढायान्तु दास्यां तथाविधापत्यस्य विभाज्यत्वमेवेति । स्मार्त्तसम्मतमप्यतदिति ॥

Colophon. इति श्रीश्रीकृष्णतर्कालङ्कारभट्टाचार्यविरचितो दायाधिकारक्रमसङ्ग्रहः समाप्तः ॥

विषयः । अत्र दायाधिकारक्रमादिर्वर्णितः ।

No. 933. उत्तरगीता ।

Substance, yellow country paper, 14 × 3¼ inches. Folia, 13. Lines, 6 on a page. Extent, 204 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Tarkálaṅkára. Appearance, old. Verse. Generally correct.

Uttara Gitá. A sequel to the Bhagavat Gitá, treating of theocratic Vedánta philosophy.

Beginning. अर्जुन उवाच । यदेकं निष्कलं ब्रह्म व्योमातीतं निरञ्जनं ।
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ॥ १ ॥
कैवल्यं केवलं शान्तं शुद्धमत्यन्तनिर्मलम् ।
कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम् ॥ २ ॥
हृदयाम्बुजमध्यस्थज्ञानं ज्ञेयस्वरूपकम् ।
तत्क्षणादेव मुच्येत यज्ज्ञानाद् ब्रूहि केशव ॥ ३ ॥
श्रीभगवानुवाच । साधु पृष्टं महाबाहो बुद्धिमानसि पाण्डव ।
यन्मां प्रच्छसि तत्त्वार्थमशेषं तद् ददाम्यहम् ॥ ४ ॥

End. भूतवस्तून्यशाचित्वे पुनर्जन्म न विद्यते ।

Colophon. इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे वैराग्योदयो नाम तृतीयोऽध्यायः समाप्तः ।

विषयः । श्रीकृष्णार्जुनयोः कथोपकथनव्याजेन ज्ञानोपदेशोऽध्यायत्रयात्मकः । तत्र १ अध्याये ब्रह्मनिरूपणम् । २, आत्मानुभवः । ३, वैराग्योदयः । (अस्यान्तिमपत्रे हंसमन्त्रः, तत्साधनप्रयोगादिश्च विद्यते ।)

No. 934. श्यामामन्त्राः ।

Substance, country paper, 18 × 3¼ inches. Folia, 13. Lines, 9 on a page. Extent, 432 s'lokas. Character, old Bengali. Date, ? Place of deposit, Navadvípa, Pandita Vrajanátha Vidyáratna. Appearance, very old, with annotations on the margin. Prose and verse. Correct.

S'yámámantráh. A collection of *Vijamantras* of the ten great Vídyás, or manifestations of the Goddess Durgá. Anonymous.

Beginning. अथ श्यामामन्त्राः । तत्र काले तन्त्रे कामत्रयं वह्निमंस्थं रतिबिन्दुसमन्वितं ।
कूर्चयुग्मं तथा लज्जायुगलं तदनन्तरम् ॥
दक्षिणे कालिके चेति पूर्ववीजानि वोच्चरेत् ।,
अन्ते वह्निवधून्दद्याद् विद्या राज्ञी प्रकीर्त्तिता ॥
अस्याः पूजाप्रयोगः । प्रातःकृत्यादिकं कृत्वा स्नात्वा मन्त्राचमनं कुर्याद् ।
तद्यथा ।

End. इति छिन्नमस्ताप्रकरणम् । भैरवतन्त्रे ।
अथ वक्ष्ये महाविद्याः कालिकायाः सुदुर्लभाः ।
यासां विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥
नात्र चित्ताविशुद्धिः स्यान् न वा मित्रादिदूषणम् ।
न वा प्रयासबाहुल्यं समयासमयादिकं ॥
न वित्तव्ययबाहुल्यं कायक्लेशकरं न च ।
य एनां चिन्तयेन्मन्त्री सर्वकामसमृद्धिदाम् ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्नसंशयः ।
गद्यपद्यमयी वाणी सभायां तस्य जायते ॥
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ॥
वन्हेः शैत्यं जलस्तम्भं गतिस्तम्भं विवस्वतः ।
दिवारात्रिव्यत्ययञ्च वशीकर्मक्षमो भवेत् ॥
अन्ते च लभते देव्या गणत्वं दुर्लभं नरः ।

Colophon. (समाप्तिसूचकं वाक्यं न विद्यते । परं शेषपङ्क्तिलिखनप्रकारदर्शनात् षोड़शतम-महाविद्यायाः छिन्नमस्तकायाः प्रकरणसमाप्तिपूर्वकफलश्रुतिकथनदर्शनेन शेषवक्तव्यस्यापरस्याभावाच्च समाप्तमेवेति गम्यते ।)

विषयः। कालीतारापभृतीनां षोड़शानां महाविद्यानां मन्त्राः, मप्रमाणं पूजापद्धत्यादिश्च। (परिच्छेदशून्यम्।)

No. 935. पितृपद्धतिः।

Substance, yellow country paper, 18 × 3 inches. Folia, 2. Lines, 8 on a page. Extent, 87 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Pandita Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Generally correct.

Pitripaddhati. An elementary treatise on S'ráddhas, or rites meet for the dead. By Gopála Áchárya.

Beginning. अखिलनिगमहस्तैर्दिव्यवीणां वहन्ती
स्मितविकसितवक्त्रा ज्ञानदीपप्रसन्ना।
अनुकुलफलयुक्ता शाखिनी सेवकानां
हृदि लसतु सदा मे भारती सर्वशुक्ला॥
ध्यात्वा नन्दीश्वरं देवं नत्वा पितृपदद्वयम्।
गोपालो बालतोषाय विलिखेत् पितृपद्धतीः॥
सांवत्सरिकं श्राद्धं मौरणैव कर्त्तव्यमिति वृद्धसम्मतम्।

End. अतो गोत्रस्वगोत्रयोर्विकल्प इति शूलपाणिः॥ ०॥

Colophon. इति गोपालाचार्यविरचितपितृपद्धतौ प्रमाणखण्डो नाम प्रथमपरिच्छेदः॥
ग्रन्थोऽयं लिखितो यत्नात् हरिनारायणशर्मणा॥
ॐ गङ्गा॥ (अत्र समाप्तिवाक्ये प्रथममितिपदश्रुतेरसमाप्तमिदमित्यनुमीयते)।

विषयः। श्राद्धविषयकप्रमाणादिः।

No. 936. तन्त्रसारः।

Substance, red and yellow country paper, 18 × 4½ inches. Folia, 297. Lines, 8—9 on a page. Extent, 13,815 s'lokas. Character, Bengali. Date, Sk. 1773. Place of deposit, Navadvípa, Pundit Vrajanátha Vidyáratna. Appearance, soiled. Prose and verse. Correct. Copies have also been found at Navadvípa in the possession of Yádavachandra Bhattácháryá and Yadunátha Sárvabhauma Naiyáyika. Several copies are also available in Calcutta.

Tantrasára A summary of the Tántric cult, comprising mantras, diagrams and rituals for the adoration of the different Hindu divinities, both Sákta and Vaishṇava. By Kṛishṇánanda Bhaṭṭáchárya. The work is held in high estimation, and has been very extensively quoted as a standard authority.

Beginning. नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितम्।
गुरुञ्च ज्ञानदातारं कृष्णानन्देन धीमता ॥
तत्तद्ग्रन्थगताद् वाक्यान्नानार्थं प्रतिपद्य च।
सौकर्यार्थकृत् सङ्क्षेपात् तन्त्रसारः प्रतन्यते ॥

End. गमनागमने जाह्नवी मा तनुयायो फलानि कुण्डली।
उदिता कुलकामधेनुरेषा भजतां काङ्क्षितकल्पवल्लवीम् ॥
वेदार्थशास्त्रविपरीतविलोकनेन प्रायोभवद्यजनलोपमवेक्ष्य मातः।
तद्गूढकूटविशदीकरणेषु जातान् मातः क्षमस्व तव पादयुगेषु याचे ॥
यद् यन्मया नाथ विमूढबुद्ध्या स्पष्टीकृतं गुह्यतमन्तु तन्त्रे।
क्षन्तव्यमेतत् करुणानिधान क्रोधो न चार्हः खलु पामरेषु ॥

Colophon. इति श्रीमहामहोपाध्यायश्रीकृष्णानन्दभट्टाचार्यविरचिते तन्त्रसारे तृतीयपरिच्छेदः ॥ समाप्तोऽयं तन्त्रसारः ॥

विषयः। वृहतरतन्त्रादिभ्यः तान्त्रिकदीक्षादिविषयकप्रमाणान्युद्धृत्य यथाक्रमेणेह सङ्गृहीतः। अत्र त्रयः परिच्छेदाः सन्ति। तत्र प्रथमे, प्रथमं लक्षणचक्रादि, ततो व्यवस्था। तद् यथा—गुरुलक्षणम्, शिष्यलक्षणम्, कुलाकुलचक्रम्, राशिचक्रम्, नक्षत्रचक्रम्, अकथहचक्रम्, ऋणिर्धनचक्रम्, अकड़मचक्रम्, दीक्षाकालः, वारनियमः, तिथिनियमः, नक्षत्रनियमः, योगनिर्णयः, करणनिर्णयः, लग्ननिर्णयः, निषिद्धमासतिथिनियमः, मालानिर्णयः, मालायां मणिनियमः, आसनभेदाः, मालासंस्कारः, पुरश्चरणम्, भक्ष्यादिनियमः, वर्ज्यद्रव्याणि, भूतलिपिः, स्त्रीणां होमाधिकारः, अन्यप्रकारपुरश्चरणं, पुरश्चरणप्रयोगः, कूर्मचक्रम्, मन्त्राणां दशसंस्काराः, मातृकायन्त्रम्, ग्रहणपुरश्चरणसङ्कल्पः, कलावतीदीक्षाप्रयोगः, चन्द्रसूर्याग्नीनां कलानां नाम, षोड़शाङ्गादिधूपः, पञ्चायतनी दीक्षा, सङ्क्षेपदीक्षा, सर्वतोभद्रमण्डलम्, नवनाभमण्डलम्, त्रिलौही मुद्रा चेति।

द्वितीये प्रथमं सामान्यपूजादि, ततो मन्त्राः। तद् यथा—सामान्यपूजा, सन्ध्याप्रयोगः, स्नानविधिः, गायत्री, गायत्रीध्यानम्, पूजाप्रयोगः; भुवनेश्वरी-

मन्त्राः, अन्नपूर्णा०, त्रिपुरा०, दुरिता०, वज्रप्रस्तारिणी०, दुर्गा०, महिषमर्दिनी०, जयदुर्गा०, शूलिनी०, वागीश्वरी०, पारिजातसरस्वती०, गणेश०, हेरम्ब०, हरिद्रागणेश०, लक्ष्मी०, महालक्ष्मी०, सूर्य०, अजपा०, विष्णु०, श्रीराम०, श्रीकृष्ण०, बालगोपाल०, वासुदेव०, हयग्रीव०, नृसिंह०, हरिहर०, वराह०, शिव०, मृत्युञ्जय०, चिन्तामणि०, नीलकण्ठ० चण्ड०, क्षेत्रपाल०, वटुक०, त्रिपुरभैरवी०, सम्पत्प्रदाभैरवी०, कौलेशीभैरवी०, सकलसिद्धिदाभैरवी०, चैतन्यभैरवी०, भयविध्वंसिनीभैरवी०, कामेश्वरीभैरवी०, षट्कूटाभैरवी०, नित्यभैरवी०, रुद्रभैरवी०, भुवनेश्वरीभैरवी०, सकलेश्वरीभैरवी०, त्रिपुरबाला०, नवकुटबाला०, अन्नपूर्णेश्वरीभैरवी०, श्रीविद्या०, कामराज०, लोपामुद्रा०, मनूपासिता०, कुबेरोपासिता०, चन्द्रोपासिता०, द्वितीयलोपामुद्रा०, वैष्णवीषट्कूटा०, नन्दिपूजिता०, सूर्योपासिता०, इन्द्रोपासिता०, शङ्करोपासिता०, दुर्वासउपासिता०, पञ्चमीविद्या०, पारिभाषिकषोड़शी०, महाषोड़शी०, बीजावलिषोड़शी०, कमलासुन्दरी०, भुवनसुन्दरी०, वाक्सुन्दरी०, शक्तिसुन्दरी०, श्री०, प्रचण्डचण्डिका०, श्यामा०, गुह्यकाली०, भद्रकाली०, श्मशानकाली०, महाकाली०, तारिणी०, एकजटा०, नीलसरस्वती०, कुब्जिका०, उग्रतारा०, महानीलसरस्वती०, ताराषोढ़ा०, अष्टतारिणीमन्त्राः, रहस्यपुरश्चरणम्, वीरसाधनम्, अधिकारिलक्षणम्, चितालक्षणम्, शवसाधनम्, विद्याभेदकथनम्, चण्डोग्रशूलपाणिमन्त्राः, मातङ्गी०, उच्छिष्टचाण्डालिनी०, धूमावती०, भद्रकाली०, धनदा०, श्मशानकाली०, बगलामुखी०, कर्णपिशाचीमन्त्राः, सिद्धिलक्षणम्, मङ्गुघोषः, तारिणीकल्पः, सारस्वतकल्पः, कात्यायनीकल्पः, दुर्गामन्त्राः, गौरी०, विशालाक्षी०, राजमुखी०, इन्द्र०, गरुड़०, माला०, विषहराग्नि०, हनुमत्कल्पः, हनुमद्वीरसाधनम्, आर्द्रपटी, श्मशानभैरवीमन्त्रः, ज्वालामालिनी०, महाकाली०, तत्प्रयोगः, ज्वालामालिनीप्रयोगः, निगड़मोक्षणम्, चिटिमन्त्रः, त्र्यम्बक०, मृतसञ्जीवनी०, आकर्षणम्, विद्वेषणम्, उच्चाटनम, सुखप्रसवमन्त्रः, अदर्शनम्, योगिनीसाधनम्, योगिनीसाधनकालः, तत्राधिकारिनिर्णयः, पूजाधारः, यन्त्रसंस्कारः, चक्रप्रतिष्ठाप्रयोगश्चेति ।

तृतीये जपहोमप्रकारादुपदेशो यन्त्रादिलिखनप्रकारादयश्च । तद्यथा—प्रकीर्णकम्, पूजायां विहितनिषिद्धम्, पञ्चशुद्धिः, मन्त्रसिद्धेरुपायः, मन्त्रसिद्धिलक्षणम्, मन्त्रदोषाः, मन्त्रदोषशान्तिः, होमार्थं कुण्डनिर्णयः, नवकुण्डानि, कुण्डानां विशेषफलम्, काम्यहोमार्थं कुण्डनिर्णयः, नागशिरआदिनिर्णयः, नवकुण्डयोनिनियमः, नमोऽन्ते नमोदयादित्यादिविचारः, नित्यहोमः, सङ्क्षेप-

होमः, बृहद्धोमः, होमद्रव्यप्रमाणम्, षट्कर्मलक्षणम्, आसनम्, ग्रथन-विदर्भ-सम्पुट-बोधन-योग-पल्लवनिर्णयः, षटकर्ममन्त्रलिखने द्रव्यम्, शान्तिकादौ पात्रनियमः, भूतानां मण्डलानि, भुवनेश्वर्याः स्तवकवचानि, अन्नपूर्णायाः०, त्रिपुटायाः०, दुर्गायाः०, महिषमर्दिन्याः०, लक्ष्म्याः०, सरस्वत्याः०, गणेशस्य०, हरिद्रा-गणेशस्य०. सूर्यस्य०, विष्णोः०, श्रीरामस्य०, श्रीकृष्णस्य०, गोपालस्य०, नृसिंहस्य०, शिवस्य०, वटुकस्य०, भैरव्याः०, श्रीविद्यायाः०, महात्रिपुरसुन्दर्याः०, प्रचण्डचण्डिकायाः०, काल्याः०, तारायाः०, बगलामुख्याः०, चतुषष्ट्युपचाराः, अष्टादशोपचाराः, षोड़शोपचाराः, दशोपचाराः, पञ्चोपचाराः, निर्माल्यकथनम्, त्रिपुरसुन्दर्याः षोड़शोपचाराः, रुद्राक्षमाहात्म्यम्, रुद्राक्षप्रतिष्ठा, रुद्राक्षसंस्कारः, परिभाषा, विघ्नाराधनमन्त्राः, विष्णुविषये नैमित्तिकादिकर्मभङ्गप्रायश्चित्तम्, शिवशक्तिविषये नैमित्तिकादिकर्मभङ्गप्रायश्चित्तम्, पञ्चप्रकार इज्या, वैष्णवानां द्वादशशुद्धिः, द्वादशतिलकानि, योगाङ्गासनानि, मुद्रा; घटार्गलायन्त्रम्, त्वरिता०, नवदुर्गा०, लक्ष्मी०, भैरवी०, त्रिपुरागायत्री०, त्रिपुरा०, श्रीविद्या० गणेश०, श्रीराम०, नृसिंह०, गोपाल०, कृष्ण०, शिव०, काली०, शान्तिकादौ तारायन्त्रम्, यन्त्रलिखनद्रव्यम्, शान्त्युदकस्नानम्, सङ्क्षेपतः सर्वदेवानां नित्यपूजाविधिः, नैमित्तिकविधिः, चरणामृतमाहात्म्यम्, स्त्रीनपुंसकमन्त्राणां लक्षणम्, शुप्तप्रबोधकालः, योगाङ्गासनानि, श्रीविद्यायजनम्, प्रयोगविधिः, भुवनेश्वरी०, त्वरिता०, दुर्गा०, सरस्वती०, लक्ष्मी०, गणेश०, सूर्य०, श्रीराम०, कृष्ण०, दधिवामन०हयग्रीव०, नृसिंह०, वराह०, मृत्युञ्जय०, दक्षिणमूर्ति०, भैरवी०, सुन्दरी०, त्रिपुरा०, छिन्नमस्ता०, श्यामा०, काम्यतर्पणम्, निग्रहादुपायाः, वेतालसिद्धिः, बालकसंस्कारः, शान्तिमन्त्रः, छागादिबलिः, कुलाचारः, दूतीयागः, यजनप्रकारः, द्रव्यशुद्धिः, शक्तिशोधनम्, वीराणां पुरश्चरणम्, मन्त्रिणां मन्त्रस्ताननिरूपणम्, सन्ध्या, अवपूजा, पञ्चमकारयजनप्रकारः, तत्प्रक्रिया, ग्रन्थकृतकृतस्तदोषक्षमापणञ्चेति।

इह बहुतरयन्त्राणि चित्रितानि सन्ति ॥

No. 937. दुर्गभञ्जनम् ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 84. Lines, 8 on a page. Extent, 4200 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Durgabhañjana. A treatise on Smṛiti rites, illucidating doubtful points, and solving many moot questions regarding proper times for performing particular ceremonies. By Chandras'ekhara S'armá, a Várendra Bráhmaṇa of Navadvípa. The work is divided into four chapters, (lit. forts). The first treats of the age of the moon, and the proper times when particular ceremonies ordained for specifical days of the moon, should be performed. The second treats of months, their conjunctions, and the ceremonies appertaining to them. The third is devoted to resolutions to perform ceremonies, persons qualified to perform them, and the details thereof. Prominent mention is made in this chapter of the rules for commencing the Durgá púJá. The fourth has for its subjects, optional fasts and penances.

Beginning. भजत भजत कृष्णं गोपनारीसतृष्णं
निखिलभुवनवन्द्यं नन्दगोपाभिनद्यम् ।
सुकृतिहृदयवन्द्यं प्रेमभक्त्यैकगम्यं
सकललालितगेहं सच्चिदानन्दगेहम् ॥
याता माता मया किं नवदधि विधृतं भुज्यते नेति मत्वा
दृष्ट्वा तद्वृत्तमाशु प्रियतमतनयाभुङ्क्ष्व वत्सेत्युवाच ।
लब्ध्वा मातुः प्रसादं सपदि गतभयं स्मेरवक्त्रं वदन्तं
मानर्दोषो न मेऽयं बलकृतमिति तं नन्दसूनुं नमामि ॥
सदानन्दमयीं स्मृत्वा चन्द्रशेखरशर्मणा ।
वरेन्द्रान्वयसम्भूतनवद्वीपनिवासिना ॥
श्रीकृष्णप्रीतये गूढशास्त्रार्थस्याभिसन्धितः ।
स्मृतीनां क्रियते दुर्गभञ्जनं बुधरञ्जनम् ॥
अथ तिथेर्दुर्गभञ्जनम् । तत्र, राशिचक्रचलत्सूर्यावधिकं वाश्रयविकर्षप्रयो-
जकतादृशचन्द्रक्रिया तिथिः । तथाहि—

End. वियोगे पारणं कुर्युर्मुनयो ब्रह्मवादिन इति । वियोगे उभयोर्विच्छेदे तद्योगस्य उपस्थितत्वात् स च एकतरक्षयादपि भवतीति ॥ ० ॥

Colophon. श्रीहरिनारायणशर्मणः पुस्तकमिदं स्वाक्षरञ्च इति ॥ ० ॥ यथा दृष्टमित्यादि ॥

विषयः । अत्र चत्वारि परिच्छेदाः । प्रथमं तिथिदुर्गभञ्जनम् । तत्र राशिचक्रस्य देशरूपता, अमावाड़शभागेनेत्यादिवचनार्थः, अष्टम्यांशे चतुर्दश्या इति वचनव्याख्या,चन्द्रकलास्वरूपः, देवतानां कलानिर्णयः, तिथिखण्डविशेषनियमश्चेति । द्वितीयं मासादुल्लेखदुर्गभञ्जनम् । तत्र निमित्तोल्लेखविचारः, दर्शात्सर्गादिविचारः, मासादुल्लेखविचारश्चेति । तदेतत् खण्डद्वयात्मकं प्रथमखण्डम् । सङ्कल्पस्मृतिदुर्गभञ्जनाख्यतृतीयपरिच्छेदारम्भे पृथङ्मङ्गलाचरणदर्शनात्; तथाहि— "सदानन्दमयीं स्मृत्वा चन्द्रशेखरशर्मणा । सङ्कल्पस्मृतिदुर्गानां भञ्जनं क्रियतेऽधुना ॥" इति । तत्र च काम्यकर्मणि सङ्कल्पः, निष्कामानां काम्येऽपि सङ्कल्पाभावः. सुगमसङ्कल्पः, अधिकारिलक्षणम्, विशिष्टफलं प्रति कामनाधिकारः, काम्यकर्मणि रागिणां प्रीतिकामनायां तत्फलप्राचुर्य्यम्, सङ्कल्पनिरूपणम्, जन्मतिथिविहितात्र्यत्यामादिपूजनफलं, सङ्कल्पवाक्यरचना, सङ्कल्पवाक्ये फलभागिन एव नामगोत्रोल्लेखो न तु प्रतिनिधेः, सङ्कल्पकालः, सप्तम्यादिमहाष्टम्यादिकल्पे षष्ठ्यां बोधनम्, विशेषबाधकाभाव एव प्रकरणाद् वाक्यस्य बलवत्त्वम्, दिवसाद्यन्तनाड़ीचतुष्टयस्य सन्ध्यात्वकीर्त्तनम्, सायंसन्ध्यायाः प्राशस्त्यादिकम्, उपवाससङ्कल्पकालः, गस्तान्ते पुत्रताभोजनान्तरम्, ग्रहणनिमित्तकस्नानादिकार्य्यम्, नैमित्तिकानि काम्यानि च कर्माणि चेति । चतुर्थं व्रतदुर्गभञ्जनम् । तत्र—अष्टमी, जन्माष्टम्युपवासो नित्यः,जन्माष्टम्युपवासफलम्, व्रतकालव्यवस्था, पारणव्यवस्थादिश्चेति ।

No. 938. प्रायश्चित्तव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 19 × $3\frac{1}{2}$ inches. Folia, 14. Lines, 6—7 on a page. Extent, 539 s'lokas. Character, Bengali. Date, Sk. 1728. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Práyas'chitta-vyavasthá-sankshepa. A summary of the laws bearing on expiations. This and the following five works are evidently due to the same author, who attempted to produce a series of manuals like the *Tattvas* of Raghunandana, or the *Vivekas* of S'úlápani, but his name does not appear in the codices under notice.

Beginning. अथ प्रायश्चित्तव्यवस्थासङ्क्षेपः । तत्रादौ प्रायश्चित्तलक्षणम् । तथाच हारीतः । प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तम् ।

End. तथाच पैत्रभ्रात्रादिना क्रियमाणा—(इतः खण्डितम्)

विषयः । प्रायश्चित्तलक्षणादिः, पातकानि, अतिपातकप्रायश्चित्तम्, महापातकप्रायश्चित्तम्, ब्रह्मवधप्रायश्चित्तम्, सुरापानप्रायश्चित्तम्, स्वर्णस्तेयप्रायश्चित्तम्, गुर्वङ्गनागमनप्रायश्चित्तम्, पतितसंसर्गप्रायश्चित्तम्, गोवधप्रायश्चित्तम्, प्रायश्चित्तपूर्वाह्नकृत्यम्, बाल्यादिभेदेन प्रायश्चित्तभेदः, ज्ञानकृतादिनिरूपणम्, ब्राह्मणस्वामिकगोवधप्रायश्चित्तम्, एकहायन्यादिगोवधप्रायश्चित्तं, बोधनादिनिमित्तकगोवधप्रायश्चित्तम्, अपालननिमित्तकगोवधप्रायश्चित्तम्, गोवधापवादः, क्षत्रियादिवधप्रायश्चित्तम्, स्त्रीवधप्रायश्चित्तम्, गर्भवधप्रायश्चित्तम्, मार्जारादिवधप्रायश्चित्तं, मत्स्यादिवधप्रायश्चित्तम्, मण्डपोद्यानादिदेवतड़ागादिभेदनप्रायश्चित्तम्, अभिचारप्रायश्चित्तञ्चेति ।

No. 939. तिथिव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 18 × 3½ inches. Folia, 51. Lines, 6 on a page. Extent, 1836 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Tithi-vyavasthá-sankshepa. · A summary of the laws regarding the moon's age, with references to the ceremonies to be performed on particular lunar days.

Beginning. प्रायःसङ्कल्पानामेव कर्मणामारम्भकत्वादादौ स एव निरूप्यते ।

End. अत्रामावास्याष्टमीव्यतिरिक्ता द्वादशतिथयः शुक्ला ग्राह्याः । एतासु पौर्णमास्यन्तमासो ग्राह्यः ॥

Colophon. इति तिथिव्यवस्थासङ्क्षेपः समाप्तः ।

विषयः । सङ्कल्पनिरूपणम्, मलमासो रविसङ्क्रान्तिशून्यः, विधिश्चतुर्विधः, अथवादः, निषेधपर्युदासौ, विकल्पः, जन्मतिथिव्यवस्था, प्रतिपद्-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमी-कृत्यम्, माघसप्तमी, अष्टमी, कृष्णजन्माष्टमी, पारणकालः, दूर्वाष्टमी, भीष्माष्टमी, अशोकाष्टमी, नवमी, श्रीरामनवमी, दशमी, दुर्गोत्सवः, बलिदानम्, धूपाः, उपचाराः, षोड़शोपचाराः, एकादशी,

चातुर्मास्यव्रतारम्भः, आरब्धव्रतत्यागे प्रायश्चित्तं, मत्स्यादित्यागफलम्, हरिशय-नादिव्यवस्था, द्वादशी, श्रवणद्वादशी, त्रयोदशी, वारुणत्रयोदशी, चतुर्दशी, सावित्रीचतुर्दशी, अनन्तव्रतम्, शिवचतुर्दशी, मदनचतुर्दशी, पौर्णमासी, महाज्येष्ठी, कोजागरः, रविसङ्क्रान्तिरात्रिसङ्क्रमणव्यवस्था, कार्त्तिकक्रत्यम्, ग्रहणम्, अमावास्या, अर्द्धोदययोगः, युगाद्याः, युगाद्यारहस्यञ्चेति ।

No. 940. उद्वाहव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 18 × 3½ inches. Folia, 3. Lines, 5 on a page. Extent, 79 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Udváha-vyavasthá-sankshepa. A summary of the laws regarding marriage.

Beginning. अथोद्वाहव्यवस्थासङ्क्षेपः । तत्र सापिण्ड्यं निरूप्यते ।

End. वरे मृते कन्या देवराय प्रदातव्या । एतच्च कन्यानुमतौ । वागदत्ताया अपि कन्यायाः कुमारीवद् विवाहः ॥ ० ॥

Colophon. इत्युद्वाहव्यवस्थासङ्क्षेपः ॥

विषयः । सापिण्ड्यनिरूपणादिः, पितृबान्धवादिनिर्णयश्चेति ।

No. 941. श्राद्धव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 18 × 3½ inches. Folia, 37. Lines, 6 on a page. Extent 1207 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

S'ráddha-vyavasthá-sankshepa. A summary of the laws regarding the various s'ráddhas, or offerings to the manes.

Beginning. अथ श्राद्धव्यवस्थासङ्क्षेपः । विप्रेभ्यो दद्यादग्रौ जलेपि वेत्यनेन तस्यापि ब्राह्मणस्वीकारपर्यन्तं, स्वीक्रियते तदा पित्रे बलिदानेऽतिव्याप्तिः ।

End. येन सेतुनानेकेषामुपकारः चेत्रिणश्चार्द्धपीड़ा स सेतुः चेत्रिणा न निराकरणीयः ।

Colophon. इति श्राद्धव्यवस्थासङ्क्षेपः ॥

विषयः । श्राद्धलक्षणविचारः, देवतालक्षणम्, यागलक्षणम्, साहित्यलक्षणम्, तन्त्रतालक्षणम्, नवान्नश्राद्धकालः, मघात्रयोदशीश्राद्धम्, अश्वयुक्कृष्णपक्षश्राद्धम्, शस्त्रहतचतुर्दशीश्राद्धम्, अष्टकाश्राद्धम्, श्राद्धवेला, मलमासे कर्त्तव्यम्, मलमासनिषिद्धकर्माणि, अमावस्याश्राद्धवेला, प्रतिमासे पार्वणासमर्थस्य पार्वणव्यवस्था, निमन्त्रणव्यवस्था, दर्भाः, श्राद्धशेषभक्षणे नियमविधिः, आमान्नव्यवस्था, जीवत्पितृकश्राद्धम्, मासिककालः, मासिकसपिण्डीकरणयोरपकर्षः, पिण्डमिश्रीकरणम्, विघ्नपतितमृताहाविदितयोः श्राद्धकालः, मृताहाज्ञाने श्राद्धदिनमासनिर्णयः, एकोद्दिष्टकालनिर्णयः, अम्बुघटश्राद्धम्, सपिण्डीकरणम्, श्राद्धेऽधिकारिनिरूपणम्, वृद्धिश्राद्धव्यवस्था, शूद्रकर्त्तृकतर्पणवाक्यम्, वृद्धिनिर्णयः, अकृतवृद्धिः, अधिविधिः, प्रतिभूः, स्वामिकविक्रयः, सम्भूय समुन्मानम्, दत्ताप्रदानिकं, भृतकविधिः, भाटकविधिश्चेति ।

No. 942. दायव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 14. Lines, 6 on a page. Extent, 456 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

Dáya-vyavasthá-sankshepa. A summary of the laws regarding succession and inheritance.

Beginning. अथ दायव्यवस्थासङ्क्षेपः । तत्र पितृणामेकैकस्मिन् द्रव्ये एकैकस्य स्वत्वं न तु सर्वेषाम् ।

End. आकालिकं निमित्तकालमारभ्य परदिन तत्कालपर्यन्तं, सज्योतिः दिनमानं रात्रिमानञ्चेत्यर्थः ॥ ॐ गुरवे नमः ॥

Colophon. (समाप्तिवाक्यमिह न दृश्यते परं लेखभङ्ग्या समाप्तमेवेति प्रतीयते)

विषयः । पित्रादीनां स्वत्वनिर्णयः, पितृकृतपितामहधनविभागः, पितृकृतस्वोपार्जितधनविभागः, विभागानर्हाः, विभाज्यानि, स्त्रीधननिरूपणम्, दानविक्रयाधिकारः, स्त्रीधनविभागः, अप्रजास्त्रीधनाधिकारः, विभागानन्तरं जातविभागः, पुत्रिकानन्तरजातौरसविभागः, अपुत्रधनविभागः, संसृष्टिविभागः, विभागकालापकृतिविभागः, पितृधनविभागकालः, पितृस्वत्वनिवृत्तौ भ्रातृकृतविभागव्यवस्था, पितृकृतपैतामहधनविभागः, समयाशुद्धिनिर्णयश्चेति ।

No. 943. शुद्धिव्यवस्थासङ्क्षेपः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 30. Lines, 7 on a page. Extent, 1155 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

S'uddhi-vyavasthá-sankshepa. A summary of the laws regarding mourning, and the duties appertaining to that state.

Beginning. अथ शुद्धिव्यवस्थासङ्क्षेपः। तत्रादौ शुद्धिपदार्थो निरूप्यते। तत्र विहितकर्मार्हत्वप्रयोजको धर्मविशेषः शुद्धिः।

End. युगादावयने पुण्ये मन्वादा च विशेषतः।

Colophon. इति शुद्धिव्यवस्था समाप्ता।

विषयः। शुद्धिलक्षणादिः, सहमरणानुमरणयोर्व्यवस्था, अनयोरशौचशङ्करः, अतिक्रान्ताशौचम्, अशौचे विधिनिषेधौ, अशौचशङ्करः, गर्भस्रावाशौचम्, स्त्र्यशौचम्, बालाद्यशौचम्, विदेशस्थाशौचम्, सपिण्डाद्यशौचम्, मातामहाद्यशौचम्, मृत्युविशेषाशौचम्, अशौचापवादः, शवानुगमनाशौचम्, अस्थिसञ्चयाङ्गास्पर्शयोः कालः, द्रव्यशुद्धिः, वापीकूपतड़ागेषु मृते जलशुद्धिः, गृहमरणे गृहस्यशुद्धिः, सूतिकादिमरणे दाहव्यवस्था, पर्णनरदाहव्यवस्था, मुमूर्षुकृत्यम्, प्रेततर्पणव्यवस्था, पुत्रस्य वर्षकृत्यम्, पिण्डदानम्, अन्तिमदिनकृत्यम्, अशौचान्तद्वितीयदिनकृत्यम्, वृषोत्सर्गकालः, वृषलक्षणम्, अस्यैव प्रयोगविशेषः, दानव्यवस्था, दानभाषा, दानपरिपाटी, दानप्रयोगः, प्रेतक्रियाधिकारिणः, दत्तककरणपरिपाटी, मृतक्रिया त्रिविधा, विपुलगृहदानम्, वृहदामान्नदानञ्चेति।

No. 944. उद्वाहव्यवस्था अथवा सम्बन्धव्यवस्थाविकाशः ।

Substance, country yellow paper, 19 × 3½ inches. Folia, 10. Lines, 7 on a page. Extent, 437 s'lokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Udváha-vayavasthá alias *Sambandha-vyavasthá-vikás'a.* A treatise on marriage. Anonymous. This is different from the work noticed under No. 649.

Beginning. अथोद्वाहव्यवस्था। तत्र भार्यात्वसम्पादकग्रहणं विवाहः। भार्यात्वञ्च विवाहजन्य-

कन्याहत्तिसंस्कारविशेषो वरनिरूपितः, अमुकस्य भार्यात्वमिति प्रतीतेः। अयमेव चूड़ादिसंस्कारवत् विवाहसंस्कारोऽपि लाघवात्।

End. षट्सङ्ख्यासङ्केताङ्कवद् वक्ररेखया स्त्रियं लिखेत्।

Colophon. इति सम्बन्धव्यवस्थाविकाशः।

विषयः। विवाहलक्षणादिविचारः। ६४९ अङ्कीयग्रन्थादर्शो भिन्नः।

No. 945. अनुमानदीधितिटिप्पनीपूर्वभागः।

Substance, country yellow paper, 20 × 5 inches. Folia, 149. In 7 parts. Lines, 9 on a page. Extent, 7375 s'lokas. Character, Bengali. Date, Sk. 1721. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old and decayed. Prose. Correct.

Anumána-dídhiti-ṭippaní. A gloss on the commentary of Raghunátha Siromaṇi on the first book of Gaṅges'a Upádhyáya's great Nyáya work the *Chintámaṇi.* By Jagadís'a Tarkálaṅkára. This MS. comprises 13 out of the 25 sections of the work. Nos. 507 to 511 are portions of this work. (Ante I, p. 293).

Beginning. सस्मिताननसरोजमङ्गणे रिङ्गमाणमतिलोलकुण्डलम्।
रोचनोल्लसितभालमस्तु मे कैशवं मनसि शैशवं वपुः॥
प्राचैरनुचितविविधक्षोदैः कलुषीकृतोऽपि अधुना।
दीधितियुतमणिरेष श्रीजगदीशप्रकाशितः स्फुरतु॥
परमात्मने सर्वातक्षष्टात्मने नमः।

End. ननु प्रकृतस्थले विशिष्टप्रत्यक्षजनकत्वमेव नास्तीत्याह विशिष्टसामग्रीति।

Colophon. इति श्रीलश्रीजगदीशतर्कालङ्कारभट्टाचार्यविरचिता सामान्यलक्षणा समाप्ता
शके चन्द्रमेन्नागविधुमित आदित्यतनये
नभस्यीये सप्ताहनि च सुरनाथं हृदि वहन्।
दशम्यां शुक्लायां कुसुरकमलानाथ इमकं
प्रयत्नेनालेखीन्निजपरिपठनायेति पुस्तम्॥
कदा वाराणस्यामिह सुरधुनीरोधसि वसन्
वसानः कौपीने शिरसि निदधानोऽञ्जलिपुटम्।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि निवसान॥

विषयः। जगदीशतर्कालङ्कारकृततत्त्वचिन्तामण्याष्टिप्पन्या द्वितीयखण्डम् "अनुमान-दीधितिटिप्पनीति" तस्यैषः पूर्वो भागो व्याप्तिकाण्डमिति प्रसिद्धम्। अत्र—१ अनुमितिः, २ व्याप्तिपञ्चकम्, ३ सिंहव्याघ्रौ, ४ पूर्वपक्षः, ५ व्याधिकरणधर्मावच्छिन्नाभावः, ६ सिद्धान्तलक्षणम्, ७ अवच्छेदकनिरुक्तिः, ८ विशेषनिरुक्तिः (अथवा विशेषव्याप्तिः), ९ अतएवचतुष्टयी, १० व्याप्तिग्रहोपायः, ११ तर्कः, १२ व्याप्त्यनुगमः, १३ सामान्यलक्षणेति त्रयोदशपरिच्छेदाः सन्ति। तदत्र पुस्तके द्वितीयादिपरिच्छेदत्रिकं खण्डितम्। अनुमितिपरिच्छेदेऽपि सप्तमपत्रतः परस्तात् खण्डितञ्च।

No. 946. कातन्त्रवृत्तिपञ्चिका, परार्द्धा।

Substance, country paper, 14 × 2½ inches. Folia, 96. Lines, 9 on a page. Extent, 4644 s'lokas. Character, old Bengali. Date, Sk. 1400. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Kátantra-vṛitti-pañchiká. A gloss on Durga Siñha's commentary on the Sanskrit grammar called Kátantra. By Trilochana Dása. The MS. contains the only second half of the work. Durga Siñha's work has been noticed under No. 510, *ante* I, p. 296.

Beginning. प्रारम्भपत्रस्य प्रथमोभागश्छिन्नः खण्डितः। ततश्च पङ्क्त्युपरार्द्ध—अथाप्यानन्तर्यार्थ एव गृह्यते तथाहि प्रश्नः पर्यन्तयोग उच्यते।

End. आव। अत्रापि द्वे इत्यनुवर्त्तते द्विवचनसन्निधानात् उत्तरशब्दोयं पूर्ववत्।

Colophon. इति त्रिलोचनदासकृतायां (इतः खण्डितम्)।

विषयः। कलापव्याकरणीयतिङन्तादिद्वितीयभागस्य व्याख्यानम्।

No. 947. सर्वतोभद्रमण्डलम्।

Substance, country paper, 14 × 2½ inches. Folium 1. Lines, 16. Extent, 31 s'lokas. Character, old Bengali. Date, Sk. 1400. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Correct.

Sarvato-bhadra-mandala. A description of a mystic diagram so called. It is held in high estimation in astrological works for casting nativities, and calculating future events in the life of man.

Beginning. चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते । चतुर्ष्वपि च कोष्ठेषु कर्णसूत्रचतुष्टयम् ।

End. तिस्रो रेखा वहिः कुर्यात् सितरक्तासितैः क्रमात् । मण्डलं सर्वतोभद्रमेतत् साधारणं स्मृतम् ।

विषयः । सर्वतोभद्रमण्डलप्रणयनप्रयोगः ।

No. 948. एकाक्षरकोषः ।

Substance, country paper, 12 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 34 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Correct. Copies have been found at Vikramapura, Ḍháká, with Paṇḍit Kálíkumár Bhaṭṭáchárya, and in Calcutta, with the Honorable Rája Jotindramohan Tagore Báhádur, and in the Library of the late Rájá Sir Rádhákánta Deva Bahádur.

Ekáksharakosha. A vocabulary of words of one syllable or one Sañskṛit letter each. By Purushottama Deva. The work is of some repute. Professor Aufrecht in his Bodleian Catalogue gives the following account of this work. " Major numerus earum vocum, quas Purushottama hoc libello collegit, e mystica doctrina delectus videtur. Cf. supra, p. 97. n. 3. In quibusdam exemplis, ut si *ga* esse *gaṇapati* et *gandharva*, *cha* significare *chandramas* et *choara*, *ta taskara*, *dha dhana*, *ya yama*, *va váta* et *veruṇa* esse dicuntur, facile vides lusum hunc esse, ubi nomina prima ipsorum syllaba significentur. Aliae voces radices sunt, quae in compositorum fine adjectivorum locum tenent, ut *ga* (*gita*), *cha* (*cheda*, *chedana*), *da* (*dána*, *dátṛi*). Minor pars re vera nomina vel particulæ sunt, et ab optimis quibusque scriptoribus usurpantur, velut *kha*, *bha* (*nakshatra*), *bhá* (*dípti*), *sam* (*kalyáṇa*), etc.

Beginning. कः प्रजापतिरुद्दिष्टो को वायुरिति शब्दितः ।
कश्चैवात्मा समाख्यातः प्रकाशे क उदाहृतः ॥

End. अमिति स्यात् परं ब्रह्म अः स्याच्चैव महेश्वरः ।

Colophon. इति पुरुषोत्तमदेवकृत एकाक्षरकोषः सम्पूर्णः ।

विषयः । एकाक्षराणां बह्वर्थानां शब्दानां परिचयः ।

No. 949. शुद्धिविवेकः ।

Substance, country paper, 13 × 2½ inches. Folia, 94. Lines, 6 on a page. Extent, 2456 s'lokas. Character, old Bengali. Date, SK. 1533. Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose and verse. Correct.

S'uddhi-viveka. A treatise on purification and mourning. By Aniruddha.

Beginning. प्रणम्य पुण्डरीकाक्षं पूर्वाचार्य-प्रकीर्त्तिता ।
व्याख्या मन्वादिशास्त्राणां समालोच्य विविच्यते ॥
विशुद्धिरनिरुद्धेन स्वबोधविभवावधि(?) ।
बोधार्थमल्पबुद्धीनां प्रबुद्धानान्तु तुष्टये ॥

End. अनेनाप्यविशुद्धस्य न कार्यमित्युक्तमतः कथमशुद्धस्याप्यात्मघातिनोपि संवत्सरे परिक्रियते ।

Colophon. महोपाध्यायश्रीअनिरुद्धकृता विशुद्धा * * * * समाप्ता ॥ श्रीः ॥ सुरापगातीर विहार * * के———कृतोनिरुद्धेन———विनेचनेत्रद्वयशीतभानुना, शकस्य वर्षे———लिलेख

विषयः । जननमरणाद्यशौचनिर्णयः ।

No. 950. शार्ङ्गधरपद्धतिः ।

Substance, country red and yellow paper, 13 × 5½ inches. Folia, 269. Lines, 8—9 on a page. Extent, 7263 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Correct.

S'árṅgadhara Paddhati. A collection of miscellaneous poems, descriptive of various objects. A part of the work is devoted to ornithomancy, chaomancy and other forms of divination ; another to bows and arrows—their merits and demerits: the bulk is made up of amatory verses. By S'árṅgadhara, son of Dámodara, and grandson of Rághava Deva, who was the court poet of Hammira, the Chauhan king of Sambher or Harowti, who flourished in the 12th century, and is repeatedly mentioned in

Chand's history of Prithvíráj : he was killed in the year 1192 A. D. Śárṅgadhara has high reputation as a great poet, and was the author of several works, two of which (one on medicine, and the other on arms and military tactics) have been already noticed (Nos. 360 and 790). The MS. is incomplete.

Beginning. यस्मिन् बुद्बुदसङ्करा इव बहुब्रह्माण्डखण्डाः क्वचिद्,
भान्ति क्वापि च सीकरा इव विरिञ्च्याद्याः स्फुरन्ति भ्रमात्।
चिद्रूपा लहरीव विश्वजननी शक्तिः क्वचिद् द्योतते,
स्वानन्दामृतनिर्भरं शिवमहापाथोनिधिं तं नुमः ॥ १ ॥
पुराशाकम्भरीदेशे श्रीमान् हम्मीरभूपतिः।
चाहुवाणान्वये जातः ख्यातः शौर्य्य इवार्जुनः ॥ २ ॥
तस्याभवत् सभ्यजनेषु मुख्यः परोपकारव्यसनैकनिष्ठः।
पुरन्दरस्येव गुरुर्गरीयान् द्विजाग्रणी राघवदेवनामा ॥ ३ ॥
गोपालदामोदरदेवदाससञ्ज्ञा बभूवुस्तनयास्तदीयाः।
नेत्रावतारा इव चन्द्रमौलेरपाकृतध्वान्तगुणास्त्रयोऽपि ॥ ४ ॥
तेषां मध्ये यस्तु दामोदरोऽभूदुत्पाद्य चोनात्मजान् वीतरागः।
भागीरथ्यां शुद्धदेहं विहाय ज्ञानादात्मन्येव निष्ठां जगाम ॥ ५ ॥
ज्येष्ठः शार्ङ्गधरस्तेषां लघुर्लक्ष्मीधरस्तथा।
कृष्णोऽनुजस्ततस्तेषां त्रयस्तेताग्नितेजसः ॥ ६ ॥
जयति शार्ङ्गधरस्त्रिपुरापदद्वयकुशेशयलुब्धमधुव्रतः।
सरससूक्तिसुधौघकलानिधिः कविकरीन्द्रकदम्बमृगाधिपः ॥ ७ ॥
यद्यपि गुणौघनिलयः खलशैलध्वंसने जिष्णुः।
तदपि विमलहृदयान्तरसज्जनलोकस्य यशोऽसौ ॥ ८ ॥
ते सज्जनाः सुकविशाखिकवित्वपुष्पाण्यादाय गुम्फितवतः स्वगुणैर्ममैतत्।
सम्भारयन्तु कुसुमोज्ज्वलहाररूपं कण्ठे सुभाषितमपास्तसमस्तदोषम् ॥ ९ ॥
न शार्ङ्गधरपद्धतिः खलजनस्य योग्या भवेत्
सुभाषितरसोर्मयः सुकृतिलोकपेया यतः।
सुधामदितिनन्दना दिवि पिबन्ति हृष्टान्तरा-
स्तथैव तमसः शिरो झटिति खण्डितं श्रूयते ॥ १० ॥
आनन्दाय सतां भूयात् सुभाषितमिदं मम।

पृथक् पद्धतिमम्मिश्रं परिच्छेदैर्मनोरमम् ॥ ११ ॥
आद्यैर्मद्विहितैः पद्यैः कियद्भिरपररपि ।
युता पद्धतिरेषासु सज्जनानन्ददायिनी ॥ १२ ॥

End. मन्दोऽयं मलयानिलः किशलयं चूतद्रुमाणां वन
साश्रत्कोकिलकूजितं विचकिलामोदः पुराणं मधु,
वाणानि धिनोति धरं (?) (इतः परं न लिखितम्, तत एव खण्डितम्, लेखनाभावे च आदर्शालाभ एव हेतुरिति च गम्यते, शेषाक्षरलिपिभङ्गीदर्शनाच्छेद (')-चिह्नसमालङ्कृतत्वाच्च) ।

विषयः । कविना स्वप्रणीतान् पूर्वकविगणभाषितांश्च श्लोककाव्यानिह यथायथं पद्धत्यनुसारेण ग्रथितं, तदसावुत्कृष्टतरः काव्यसङ्ग्रहः सम्पन्नः । अत्र—१ कविवंशवर्णनम्, २ अनुक्रमः, ३ नमस्कृतिः, ४ आशीः, ५ सुभाषितप्रशंसा, ६ काव्यप्रशंसा, ७ सामान्यकविप्रशंसा, ८ विशिष्टकविप्रशंसा, ९ कुकविनिन्दा, १० पण्डितप्रशंसा, ११ कुपण्डितनिन्दा, १२ महतां प्रशंसा, १३ धीरप्रशंसा, १४ सज्जनप्रशंसा, १५ मनस्विप्रशंसा, १६ उदारप्रशंसा, १७ तेजस्विप्रशंसा, १८ गुणप्रशंसा, १९ सन्तोषप्रशंसा, २० संसर्गप्रशंसा, २१ धनप्रशंसा, २२ दुर्जननिन्दा, २३ कृपणनिन्दा, २४ याचकनिन्दा, २५ दरिद्रनिन्दा, २६ मूर्खनिन्दा, २७ तृष्णानिन्दा, २८ लोभनिन्दा, २९ दैवाख्यानम्, ३० उद्यमाख्यानम्, ३१ प्रकीर्णकाख्यानम्, ३२ समस्याख्यानं, ३३ प्रहेलिका, ३४ अपह्नुतिः, ३५ कूटः, ३६ क्रियादिगुप्तचित्राख्यानम्, ३७ प्रश्नोत्तराख्यानम्, ३८ जातिः, ३९ सदाचारः, ४० धर्मनिवृत्तिः, ४१ पातकनिवृत्तिः, ४२ सूर्यान्योक्तयः, ४३ चन्द्रान्योक्तयः, ४४ मेघान्योक्तयः, ४५ वाय्वन्योक्तिः, ४६ हंसान्योक्तयः, ४७ मधुकरान्योक्तयः, ४८ कोकिलान्योक्तयः, ४९ चातकान्योक्तयः, ५० मयूरान्योक्तयः, ५१ शुकान्योक्तिः, ५२ काकान्योक्तिः, ५३ बकान्योक्तिः, ५४ खद्योतान्योक्तिः, ५५ सिंहान्योक्तिः, ५६ गजान्योक्तिः, ५७ मृगान्योक्तिः, ५८ करभान्योक्तिः, ५९ वृषभान्योक्तिः, ६० सामान्यवृक्षान्योक्तिः, ६१ कल्पवृक्षः, ६२ पर्वतान्योक्तिः, ६३ अगस्त्यान्योक्तिः, ६४ समुद्रान्योक्तिः, ६५ रत्नान्योक्तिः, ६६ शङ्खान्योक्तिः, ६७ तड़ागान्योक्तिः, ६८ कमलान्योक्तिः, ६९ कूपान्योक्तिः, ७० मरुस्थलान्योक्तिः, ७१ दावानलोक्तिः, ७२ सङ्कीर्णान्योक्तिः, ७३ सामान्यराजप्रशंसा, ७४ विशिष्टराजप्रशंसा, ७५ अरिपलायनम्, ७६ राजनीतिः, ७७ नीतिः, ७८ मिश्रकनीतिः, ७९ गजप्रशंसा, ८० भद्रलक्षणम्, ८१ मन्दलक्षणं, ८२ मृगलक्षणम्,

८३ मिश्रलक्षणम्, ८४ अश्वप्रशंसा, ८५ खड्गलक्षणम्, ८६ खड्गप्रशंसा, ८७ धनुर्वेदः, ८८ [तत्र—(क)धनुर्दानविधिः, (ख) आचार्यलक्षणम्, (ग) चापप्रमाणम्, (घ) गुणलक्षणम्, (ङ) शरलक्षणम्, (च) फलकलक्षणम्, (छ) नाराचनालोकस्थानम्, (ज) मुष्ट्याकर्षणम्, (झ) गुणमुष्टिः, (ञ) अनध्यायाः, (ट) दृढभेदितादियुद्धलक्षणम्] गान्धर्वशास्त्रम्। ८९ वृक्षशास्त्रम् [तत्र-(क) उपवनविनोदः, (ख) तरुमहिमा, (ग) भूमिनिरूपणम्, (घ) बीजोप्तिविधिः, (ङ) निषेचणम्, (च) द्रुमरक्षा, (छ) उपवनक्रिया, (ज) कूपार्थं भूमिपरीक्षणम्। ९० शकुनज्ञानम् [तत्र-(क) भूपतिप्रश्नचेष्टा, (ख) वरकन्याप्रश्नः, (ग) वर्षाप्रश्नः, (घ) राज्ञो जयप्रश्नः (ङ) राज्ञः सन्तानप्रश्नः, (च) विविधप्रश्नः, (छ) रोगिप्रश्नः, (ज) शकुनं, (झ) शिवारुतम्, (ञ) पल्ली, (ट) अङ्गस्फुरणम्, (ठ) सङ्कीर्णशकुनानि, (ड) यात्रानियमः, (ढ) शुभाशुभविचारः, (ण) उलूकपिङ्गल, (त) काकशब्दः, (थ) हंसाचारः, (द) तित्तिरिरावः, (ध) लट्टारावः, (न) करायिकारावः, (प) टक्करावः, (फ) हरिणरावः, (ब) नकुलरावः, (भ) मिश्रशकुनानि, (म) चुतम्, जाङ्घिकशकुनं वा, (य) दिशां स्वभावकथनम्, (र) स्वरोदयः], ९१ पशूनां लक्षणचिकित्से [(क) छागानाम्, (ख) शुनकानाम् (ग) गवाम्, (घ) यूथरक्षा, (ङ) पशुवशीकरणम्] स्थावरजङ्गमविषापहरणम्, ९२ भूतविद्या, ९३ कल्पस्थानम्, ९४ केशरञ्जनम्, ९५ शृङ्गारनिर्देशः, ९६ स्त्रीप्रशंसा, ९७ स्त्रीपुरुषजातिभेदलक्षणानि, ९८ स्त्रीपुरुषसंयोगवृत्तिः, ९९ स्त्रीसेवाप्रकारः, १००। सङ्केतस्थानादिविवरणम् [तत्र—(क) सङ्केतस्थानविवरणम्, (ख) हावादिविवरणम्, (ग) स्त्रीपुरुषवशीकरणम्, (घ) द्रावणम्, (ङ) वीर्य्यस्तम्भः, (च) कुसुमजननम्, (छ) गर्भपातरक्षा, (ज) सुखप्रसूतिः, (झ) यौवनरक्षा, (ञ) सुखवासजलवासौ, (ट) अङ्गरागः, (ठ) धूपप्रकरणम्]। १०१ बालावर्णनम्, १०२ युवतीवर्णनम्, १०३ तरुणीवर्णनम्, १०४, समग्रस्त्रीप्रशंसनम् तत्र—(क) ललाटवर्णनम्, (ख) भ्रूवर्णनम्, (ग) नासावर्णनम्, (घ) कपोलवर्णनम्, (ङ) अधरवर्णनम्, (च) दन्त-वर्णनम्, (छ) स्मितवर्णनम्, (ज) मुखवर्णनम्, (ञ) मुखवर्णनम्, (ट) कण्ठवर्णनम्, (ठ) बाहुवर्णनम्, (ड) करवर्णनम्, (ढ) अङ्गुलीवर्णनम्, (ण) स्तनवर्णनम्, (त) मध्यवर्णनम्, (थ) वलिचयवर्णनम्, (द) नाभिवर्णनम्, (ध) जरुवर्णनम, (न) जङ्घावर्णनम्, (प) चरणयुगलवर्णनम्, (फ) नखश्रेणिवर्णनम्, (ब) गमनवर्णनम्, (भ) कान्तिवर्णनम्, (म) सामग्रीस्वरूपवर्णनम्] १०५। विप्रलम्भकशृङ्गारे—(क) प्रियप्रस्था-

नवर्णनम्, (ख) श्यामावस्थाकथनम्, १०६ (क) नायिकावचनम्, (ख) नायकवचनम्, (ग) नायिकां प्रति मानम्, १०७ विरहिण्यवस्थावर्णनम्, १०८ नायिकान्तिके सखीवचनम्, १०९ वियोगिनीप्रलापाः, ११० नायकं प्रति दूतीप्रेषणम्, १११ वियोग्यवस्थावर्णन-प्रलापाख्याने, ११२ नायकस्याग्रे दूत्युक्तिः, ११३ नायिकां प्रति दूत्युक्तिः, ११४ दूती-नायिकासंवादः, ११५ शृङ्गारे परस्परविलोकनम्, ११६ प्रियातिथ्यादिकम्, ११७ मानिनीमानवर्णनम्, ११८ कलहोक्त्यादिकथनम्, ११९ मिथुनस्योक्तयस्तथा, १२० प्रियस्य शिक्षानुनयौ, १२१ परस्परं प्रसादः, १२२ सूर्यास्ते चक्रदुःखम्, १२३ तमसो वर्णनम्, १२४ अभिसारीणां सञ्चारः, १२५ शशाङ्कोदयवर्णनम्, १२६ पानगोष्ठीकथनम्, १२७ (क) चाटुप्रभृतिवर्णनम्, (ख) सुरतप्रशंसा, १२८ नववधूक्रीड़ायां सखीवाक्यम्, १२९ सुरतकेलिकथनम्, १३० विपरीतरतिवर्णनम्, १३१ सुरतनिवृत्तिः, १३२ मध्यरात्रिक्रीड़ानायिकानुनयाः, १३३ प्रभातसमयोक्तयः, १३४ प्रभातवर्णनम्, १३५ (क) प्रभातानिलवर्णनम्, (ख) प्रभातोदयवर्णनम्, १३६ रात्रिसंयोगचेष्टायाः प्रातः प्रकटनम्, १३७ (क) मिश्रकशृङ्गारवर्णनम्, (ख) सतीवर्णनम्, (ग) कुलबधूवर्णनम्, १३८ असतीचरितम्, १३९ वसन्तादेर्वर्णनम्, १४० ग्रीष्मादेर्वर्णनम्, १४१ वर्षादेर्वर्णनम्, १४२ शरदादेर्वर्णनम्, १४३ हेमन्तादेर्वर्णनम्, १४४ शिशिरादेर्वर्णनम्, १४५ सम्मिश्राणाम्, १४६ जलकेलिः, १४७ प्रपोक्तिः, १४८ दोलाकेलिः, १४९ भ्रमरिकाक्रीड़ा, १५० कन्दुकक्रीड़नम्, १५१ नेत्रसम्मीलनम्, १५२ क्रीड़ा, १५३ सम्मिश्रोक्तयः, १५४ भयानकरसोक्तयः, १५५ बीभत्सरसोक्तयः, १५६ रौद्ररसोक्तयः, १५७ शान्तरसे—वैराग्यस्य प्रशंसनम्, १५८ अनित्यतावर्णनम्, १५९ विषयादिविड़म्बनवर्णनम्, १६० पश्चात्तापवर्णनम्, १६१ कालचरितवर्णनम्, १६२ विवेककथनम्, १६३ उपदेशः, १६४ कालसङ्ख्या, १६५ शारीरम्, १६६ चतुर्विधयोगे—योगत्रयनिरूपणम्, १६७ गोरक्षादिसाधितहठयोगवर्णनम्, १६८ मार्कण्डेयादिसाधितहठयोगप्रकरणम्, १६९ मनःस्थैर्यप्रभावः, १७० अष्टसिद्धिवर्णनम्, १७१ योगिचर्याकथनम्, १७२ अरिष्टजं ज्ञानम्, १७३ विदेहमुक्तिकथनञ्चेति परिच्छेदाः। [अत्र तु पुस्तके वसन्तवर्णनस्य कियदंशं यावद् दृश्यन्ते, ततः सार्द्धचतुस्त्रिंशत्परिच्छेदानामभावः।]

No. 951. प्रायश्चित्ततत्त्वादर्शः ।

Substance, country yellow paper. Folia, 13. Lines, 8—10 on a page. Extent, 630 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikrampura, Ḍháká, Kálikṛishṇa Gañgopádhyáya. Appearance, old. Prose. Correct.

Práyas'chittatattvádars'a. A commentary on Raghunandana's treatise on purification and expiations. By Vishṇuráma Siddhántavágís'a, son of Jayadeva Vidyávágís'a, and grandson of Kavindra Bhaṭṭácháryya.

Beginning. प्रणम्य विष्णुरामेण परमात्मानमव्ययं ।
प्रायश्चित्तस्य यत्तत्त्वं तस्य व्याख्या वितन्यते ॥
(तद्व्याख्या परितन्यते वा) ॥
तत्र ग्रन्थारम्भेऽभिमतं देवं नमस्करोति प्रणम्यति ॥
तत्त्वतु विविधमुनिवाक्यार्थावलोकनपूर्वकपञ्चाङ्गाधिकरणाधीनव्यवस्थासङ्ग्रहः ॥
तत्र प्राधान्येन यद्वक्तव्यं तत् सङ्कलयन्नाह, प्रायश्चित्तस्येत्यादि ॥

End. प्रायश्चित्तान्तरन्तु प्रायश्चित्तविवेकादावनुसन्धेयमिति ॥

Colophon. इति कविचन्द्रभट्टाचार्यात्मजजयदेवविद्यावागीशसुतश्रीविष्णुरामसिद्धान्तविरचितः प्रायश्चित्तादर्शः समाप्तः ।

विषयः । रघुनन्दनकृतप्रायश्चित्ततत्त्वव्याख्यानं ।

No. 952. श्राद्धतत्त्वादर्शः ।

Substance, country yellow paper. Folia, 10. Lines, 5—8 on a page. Extent, 370 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájnagara, Vikrampura, Ḍháká, Kálikṛishṇa Gañgopádhyáya. Appearance, old. Prose. Correct.

S'ráddhatattvádars'a. A commentary on the S'ráddhatattva of Raghunandana. By Vishṇuráma Siddhántavágís'a, the author named in the last preceding notice. The MS. is incomplete.

Beginning. प्रणम्य कमलाकान्तं विष्णुरामेण धीमता ।
व्याख्यानं श्राद्धतत्त्वस्य तन्यते विदुषां मुदे ॥

तत्रादौ ग्रन्थमारभमाणोभिमतदेवतां नमस्करोति, प्रणम्येत्यादि ॥

तत्त्वं विविधमुनिवाक्यादि ॥

